
**जतृतीय ।**

**अंगज**–केश, कामदेव, चिह्न, पुत्र, रोग, पसीना, ( पुं० ) ॥ १६ ॥

"Aho Shrutgyanam"

**अङ्गजं** रुधिरेऽथ स्या**दण्डजः** पक्षिमीनयोः ।
कृकलासे भुजङ्गे च कस्तूर्या**मण्डजा**ऽपि च ॥ १७ ॥
**अम्बुजो** निचुले पुंसि क्लीबं तु सरसीरुहे ।
**कम्बोजो** देशमातङ्गशंखभेदेषु देशितः ॥ १८ ॥
**करजस्तु** करञ्जे स्यादपि व्याघ्रनखे नखे ।
**काम्बोजः** सोमवल्के स्याच्छङ्खपुन्नागवाजिषु ॥ १९ ॥
माषपर्णीहिङ्गुपर्ण्योः **काम्बोजी** तद्भवे त्रिषु ।
**कारुजः** शिल्पिनां चित्रे स्वयञ्जाततिलेऽपि च ॥ २० ॥
वल्मीके गैरिके फेने कलभे नागकेशरे ।
**कुटजः** शाखिनाम्भेदे स्याद्द्रोणे कुम्भसम्भवे ॥ २१ ॥
**गिरिजा** शैलतनयामातुलिङ्ग्योरुदाहृता ।
**गिरिजं** त्वभ्रके लौहे शिलाजतुसुगन्धयोः ॥ २२ ॥

---

रुधिर, ( न० )
**अंडज**—पक्षी, मच्छी, गिरगट, सर्प, ( पुं० )
**अंडजा**—कस्तूरी, ( स्त्री० ) ॥ १७ ॥
**अंबुज**—बेतसवृक्ष, ( पुं० ) कमल ( न० )
**कंबोज**—देशभेद, हस्तीभेद, शंखभेद, ( पुं० ) ॥ १८ ॥
**करज**—करंजुवा वृक्ष, बघेराका नख, नख, ( पुं० )
**कांबोज**—कायफल, शंख, चंपा, अश्व, ( पुं० ) ॥ १९ ॥
**कांबोजी**—वनमाष या मशवन, हींग-पत्री, या वंशपत्री ( स्त्री० ) इनसे उत्पन्न होनेवाला ( त्रि० )
**कारुज**—शिल्पियोंका चित्र, स्वयं उत्पन्नहुवा तिल ॥ २० ॥ बांबी, गेरू, झाग, हाथीका बच्चा, नाग-केसर, ( पुं० )
**कुटज**—कूडा-वृक्ष, बनकाक, अगस्त्य-मुनि, ( पुं० ) ॥ २१ ॥
**गिरिजा**—पार्वती, बनबीजपूर या बि-जोरनींबू, ( स्त्री० )
**गिरिज**—भोडल, लोहा, शिलाजीत, गन्धक, ( न० ) ॥ २२ ॥

"Aho Shrutgyanam"

**जलजं** पङ्कजे शङ्खे **नीरजं** पद्मकुष्ठयोः ।
**परञ्जस्**तैलयन्त्रासिफेनेषु छुरिकाफले ॥ २३ ॥
**वणिक्** पुंस्येव वाणिज्यजीवके करणान्तरे ।
वाणिज्ये तु **वणिक्** स्त्रीत्वे **बलजा** बल्गयोषिति ॥ २४ ॥
क्षितौ तु **बलजं** तु स्यात्क्षेत्रसस्यादिगोपुरे ।
स्याद् **भूमिजा** तु जानक्यां **भूमिजो** नरके कुजे ॥ २५ ॥
**वनजा** मुद्गपर्ण्यां स्याद् **वनजो** गजमुस्तयोः ।
**वनजं** पङ्कजे क्लीबं वाच्यवद्वनसम्भवे ॥ २६ ॥
**बाहुजः** क्षत्रिये ख्यातः स्वयञ्जाततिले शुके ।
**सहजस्**तु निसर्गे स्यात्सहजातेऽन्यलिङ्गकः ॥ २७ ॥
**सामजः** सामसम्भूते वाच्यलिङ्गः पुमान् गजे ।
**हिमजा** पार्वतीशच्योर्मैनाके **हिमजः** पुमान् ॥ २८ ॥

---

**जलज**—कमल, शंख, ( न० )
**नीरज**—कमल, कूट-औषधि, ( न० )
**परंज**—तेलनिकालनेका यंत्र, तलवार, झाग, छुरीका अग्रभाग, ( पुं० ) ॥ २३ ॥
**वणिज्(क्)**—वाणिज्यसे जीनेवाला, करणभेद, ( पुं० )
**वणिज्(क्)**—वाणिज्य, (स्त्री०)
**बलजा**—श्रेष्ठस्त्री, पृथ्वी, (स्त्री०) ॥२४॥
**बलजा**-क्षेत्र, सस्य ( खेती ) आदि, पुरदरवाजा, ( न० )
**भूमिजा**—सीता, ( स्त्री० )
**भूमिज**—भौमासुर-दैत्य, मंगलग्रह ( पुं० ) ॥ २५ ॥
**वनजा**—वनमुद्ग, ( स्त्री० )
**वनज**—हस्ती नागरमोथा, ( पुं० ) कमल ( न० ) बनमें होनेवाला द्रव्य (त्रि० ) ॥ २६ ॥
**बाहुज**—क्षत्रिय, स्वयं उत्पन्न हुवा-तिल, सूवा ( तोता ) पक्षी, (पुं०)
**सहज**—स्वभाव, ( पुं० ) साथ उत्पन्नहुवा, ( त्रि० ) ॥ २७ ॥
**सामज**—सामसे उत्पन्नहुवा, ( त्रि० ) हस्ती, ( पुं० )
**हिमजा**—पार्वती, इन्द्राणी, ( स्त्री० )
**हिमज**—मैनाक नाम पर्वत, ( पुं० ) ॥ २८ ॥

"Aho Shrutgyanam"

जचतुर्थम् ।

**अहिभुग्** विनतापुत्रे मेघनादानुलासिनि ।
**काश्मीरजा** चाऽतिविषाकुष्ठकुङ्कुमपुष्करे ॥ २९ ॥
**ग्रहराजः** शशिन्यर्केऽनुजे शूद्रे **जघन्यजः** ।
**द्विजराजो** निशानाथे विनतात्मजशेषयोः ॥ ३० ॥
**धर्म्मराड्यमराजौ** द्वौ यमे बुद्धे युधिष्ठिरे ।
**भरद्वाजो** गुरुसुते व्याघ्राटाभिख्यपक्षिणि ॥ ३१ ॥
**भारद्वाजो** मुनौ चोग्रे स्त्रियां कार्प्पासिकान्तरे ।
**भृङ्गराजस्तु** मधुपे मार्कवे विहगान्तरे ॥ ३२ ॥
**यक्षराट्** त्र्यंबकसखे मल्लानां रङ्गचत्वरे ।
**राजराजस्तु** धनदे सार्वभौममृगाङ्कयोः ॥ ३३ ॥
**क्षीराब्धिजः** शशधरे श्रियां **क्षीराब्धिजा** स्त्रियाम् ।
**क्षीराब्धिजं** तु सामुद्रलवणे मौक्तिकेऽपि च ॥ ३४ ॥

**जचतुर्थ ।**

**अहिभुज्** (क्) गरुड, मोर ( पुं० )
**काश्मीरजा**–अतीस, ( स्त्री० )
**काश्मीरज**–कूट, केसर, कमल, ( न० ) ॥ २९ ॥
**ग्रहराज**–चंद्रमा, सूर्य, ( पुं० )
**जघन्यज**–छोटाभ्राता, शूद्र, ( पुं० )
**द्विजराज**–चंद्रमा, गरुड, शेष नामसर्प ( पुं० ) ॥ ३० ॥
**धर्मराज्** ( ट् )–**यमराज**–धर्मराज, बुद्ध, युधिष्ठिर, ( पुं० )
**भरद्वाज**–बृहस्पतिका पुत्र, व्याघ्रट ( कुकडकोंवा ) पक्षी ( पुं० )॥३१॥
**भारद्वाज**–मुनि, उग्र, ( पुं )
**भारद्वाजी**–वनकपास ( स्त्री० )
**भृंगराज**–भौंरा, भँगरा-औषधि, पक्षीविशेष, ( पुं० ) ॥ ३२ ॥
**यक्षराट्** (ज्) कुबेर, मल्लोंका अखाडा, ( पुं० )
**राजराज**–कुबेर, चक्रवर्ती राजा, चंद्रमा, ( पुं० ) ॥ ३३ ॥
**क्षीराब्धिज**–चंद्रमा, ( पुं० )
**क्षीराब्धिजा**–लक्ष्मी ( स्त्री० )
**क्षीराब्धिज**–समुद्रनमक, मोती, ( न० ) ॥ ३४ ॥

"Aho Shrutgyanam"

जपञ्चमम् ।

**ऋषभध्वज**शब्दोऽसौ शङ्करेप्यर्हदन्तरे ।
अगस्तौ च हरीतक्यां लङ्घने **मुनिभेषजम्** ॥ ३५ ॥

इति विश्वलोचने जान्तवर्गः ॥

## अथ झान्तवर्गः ।

झैकम् ।

**झ**कारस्त्वारवायौ स्यान्नष्टेऽपि क्वचिदिष्यते ।

झद्वितीयम् ।

**झञ्झा** ध्वनिविशेषे स्याज्झञ्झाणुजलवर्षणे ॥ १ ॥

इति विश्वलोचने झान्तवर्गः ।

## अथ ञान्तवर्गः ।

ञैकम् ।

**ञ**कारस्तु क्वचित्ख्यातो गायने घर्घरध्वनौ ।
**ज्ञः** पण्डिते बुधे वेधस्यज्ञो मूढे जडे त्रिषु ॥ १ ॥

---

**जपञ्चम ।**

**ऋषभध्वज**–महादेव, प्रथमजिनेन्द्र (पुं०)

**मुनिभेषज**–हथिया वृक्ष, हरड, लंघन, (न०) ॥ ३५ ॥

इस प्रकार विश्वलोचनकी भाषाटीकामें जान्तवर्ग समाप्त हुवा ।

**अथ झान्तवर्गः ।**

झैक ।

**झ**–तीव्रवायु, नष्ट, (पुं०)

**झद्वितीय ।**

**झञ्झा**–ध्वनिविशेष, अल्प जलकी वर्षा, (स्त्री०) ॥ १ ॥

इस प्रकार विश्वलोचनकी भाषाटीकामें झान्तवर्ग समाप्त हुवा ॥

**अथ ञान्तवर्गम् ।**

ञैक ।

**ञ**–गाना, घर्घर ध्वनि, (पुं०)

**ज्ञ**–पण्डित, बुध ग्रह, ब्रह्मा, (पुं०)

ञद्वितीय ।

**अज्ञ**–मूढ, जड, (त्रि०) ॥ १ ॥

"Aho Shrutgyanam"

ञद्वितीयम् ।

**प्रज्ञा** तु बुद्धौ **प्राज्ञस्तु** पण्डिते वाच्यलिङ्गकः ।
**प्रज्ञुश्चप्रज्ञश्च** तथा ख्यातः प्रगतजानुके ॥ २ ॥
**सञ्ज्ञा** नामनि गायत्र्यां चेतनारवियोषितोः ।
अर्थस्य सूचनायां च हस्तमस्तकलोचनैः ॥ ३ ॥

ञतृतीयम् ।

**कृतज्ञः** सारमेयेपि वाच्यवत्कृतवेदिनि ।
स्त्रियामीक्षणिकायां स्या**द्दैवज्ञो** गणके पुमान् ॥ ४ ॥
**सर्वज्ञः** सुगते शम्भौ **क्षेत्रज्ञो** नागरात्मनोः ।

इति विश्वलोचने ञान्तवर्गः ।

## अथ टान्तवर्गः ।

टैकम् ।

**टा** पृथिव्यां ध्वनौ **टः** स्यात्करङ्के **टं** नपुंसकम् ॥ १ ॥

---

**प्रज्ञा**–बुद्धि (स्त्री०)

**प्राज्ञ**–पण्डित, (त्रि०)

**प्रज्ञु-प्रज्ञ**–जिसके घोंटुवोंमें बहुत फासला हो वह, (पुं०) ॥ २ ॥

**संज्ञा**–नाम, गायत्री, बुद्धि, सूर्यकी स्त्री, हाथ मस्तक नेत्र आदिकोंसे अभिप्रायका बताना, (स्त्री०) ॥ ३ ॥

### ञतृतीय ।

**कृतज्ञ**–कुत्ता, (पुं०) कियेहुए उपकारको जाननेवाला, (त्रि०)

**दैवज्ञा**–शुभाशुभलक्षण बतानेवाली (स्त्री०)

**दैवज्ञ**–ज्योतिषिक, (पुं) ॥ ४ ॥

**सर्वज्ञ**–बुद्ध, महादेव, (पुं०)

**क्षेत्रज्ञ**–चतुर, आत्मा, (पुं०)

इस प्रकार विश्वलोचनकी भाषाटीकामें ञान्तवर्ग समाप्त हुवा ॥

### अथ टान्तवर्ग ।

टैक ।

**टा**–पृथ्वी, (स्त्री०) **ट** ध्वनि, (पुं) **ट**–करंक (अस्थिपंजर) (न०) ॥१॥

"Aho Shrutgyanam"

टद्वितीयम्

**अट्टं** गृहान्तरे क्षौमे शुष्के चात्यल्पभक्तयोः ।
**इष्टो** ना यागसंस्कारयोगयोः क्रतुकर्म्मणि ॥ २ ॥
क्लीबं त्रिषु प्रियतमे पूज्येप्याशंसितेपि च ।
**इष्टिर्**यागार्चनेच्छासु संग्रहश्लोकसूर्ययोः ॥ ३ ॥
**कटुः** पुंसि रसे क्लीबं **कटु** कार्येपि दूषणे ।
प्रियङ्गुराजिकाऽशोकरोहिणीकटुकासु च ॥ ४ ॥
स्त्रियां **कटु** त्रिष्वप्रिये ना सुगन्धौ मत्सरेऽपि च ।
**कटः** श्रोणौ शवेत्यल्पे किलिञ्जगजगण्डयोः ॥ ५ ॥
श्मशानेऽपि क्रियाकारेऽप्यद्भुतेपि **कटाऽ**व्ययम् ।
**कटी** स्यात्कटिमागध्योः **कष्टं** गहनकृच्छ्रयोः ॥ ६ ॥
**कुटो** घटे शिलाकुट्टे **कुटी** वेश्मनि तु द्वयोः ।
**कुटी** तु स्यात्पयोदास्यां सुरायां चित्रगुच्छके ॥ ७ ॥

---

**टद्वितीय ।**

**अट्ट**—अटारी, रेसमी वस्त्र, सूखाहुवा द्रव्य, अत्यल्प, भात, ( त्रि० )
**इष्ट**—यज्ञसंस्कार, योग, ( पुं० ) यज्ञकर्म, ( न० ) ॥ २ ॥ अति प्रिय, पूज्य, वांछित, ( त्रि० )
**इष्टि**—यज्ञ, पूजन, इच्छा, संग्रहश्लोक, सूर्य, ( स्त्री० पुं० ) ॥ ३ ॥
**कटु**—कटु-रस, ( पुं० ) दूषित—कार्य, कंगनी धान्य, राई, अशोकवृक्ष, एकप्रकारकी हरड,कुटकी(स्त्री०)॥४ अप्रिय ( त्रि० ) सुगन्धवाला द्रव्य, मत्सरीपुरुष ( पुं० )
**कट**—कटि-भाग, मुर्दा, अति अल्प, बांसका बोराट, हस्तीका गंडस्थल, ॥ ५ ॥ श्मशान ( जहां मुर्दे फूकते हैं ) क्रियाकरानेवाला, ( पुं० )
**कटा**—अद्भुत ( अ० )
**कटी**—कटि-भाग, छोटीपीपल, (स्त्री०)
**कष्ट**—वन, कष्ट ( दुःख ) ( न० ) ॥ ६ ॥
**कुट**—घडा-मिट्टीका, हथौडा, ( पुं० )
**कुटी**—घर ( मकान ) ( पुं० स्त्री० ) जललानेवाली दासी, मदिरा, चित्रगुच्छा, ( स्त्री० ) ॥ ७ ॥

"Aho Shrutgyanam"

**कूटो**ऽस्त्री राशिपूर्द्वारदम्भमायाऽनृतेष्वपि ।
तुच्छेऽद्रिशृङ्गेसीराङ्गे यन्त्रायोघननिश्चले ॥ ८ ॥
**कृष्टि**र्बुधे ना कर्षेऽस्त्री **कोटिः** संख्यान्तराग्रयोः ।
अत्युत्कर्षप्रकर्षाश्रिकार्मुकाग्रेषु च स्त्रियाम् ॥ ९ ॥
**क्रुष्टं** तु रोदने रावे **कृष्टिः** स्यात्कृशसेवयोः ।
**खटो**ऽन्धकूपे टङ्के च **खटः** श्लेष्मचपेटयोः ॥ १० ॥
**खाटिः** स्त्रियां शवरथे **खाटि**रेकग्रहे किणे ।
**खेट**स्तु निन्दिते ग्रामभेदेऽपि वसुनन्दके ॥ ११ ॥
**गृष्टि**रेकप्रसवगोवराहक्रान्तयोः स्त्रियाम् ।
विष्णुक्रान्तौषधौ **घृष्टिघोंण्टा** बदरपूगयोः ॥ १२ ॥
**चटु**श्चाटौ पिचिण्डे च व्रतिनामासने **चटुः** ।
**चाट**श्चाटे च धूर्ते च मूलमांसिकयोर्**जटा** ॥ १३ ॥

**कूट**–राशि (ढेर), पुरदरवाजा, दंभ (पाखंड), माया, असत्य, तुच्छ, पर्वतशिखर, हलका एक अंग, यंत्र, लोहमुद्गर, निश्चल, (पुं० ) ॥ ८ ॥
**कृष्टि**–पंडित, (पुं० ) आकर्ष (खैंचना ) (पुं० न० )
**कोटि**–कोटि-संख्या, अग्र-भाग, अति उत्कर्ष, प्रकर्ष (उन्नति ), कोण, धनुषका अग्रभाग (स्त्री० ) ॥ ९ ॥
**क्रुष्ट**–रोना, शब्द, (न० )
**कृष्टि**–दुबला, सेवा, (स्त्री० )
**खट**–अन्धाकूवा, पत्थरफोडनेकी टांकी, कफ, चपेटा (थप्पड ) लगाना, (पुं० ) ॥ १० ॥
**खाटि**–मुर्देकी तखती, एकग्रह, आंटन (जोकस्सी आदिके डांडेके रगडनेसे हाथमें होजाताहै ) (स्त्री० )
**खेट**–निंदित, ग्रामभेद, वसुभेद, विष्णुखड्ग (पुं० ) ॥ ११ ॥
**गृष्टि**–एकबार व्याईहुई गौ, वराह क्रान्ता नाम औषधि, (स्त्री० )
**घृष्टि**–विष्णुक्रान्ता औषधि, (स्त्री० )
**घोण्टा**–बेर–झाडीफल, सुपारी, (स्त्री० ) ॥ १२ ॥
**चटु**–प्रियवाक्य, पेट, (उदर), व्रतियोंका आसन, (पुं० )
**चाट**–चाट (विश्वासदेकर धनठगनेवाला ), धूर्त, (पुं० )
**जटा**–मूल (जड़), जटामांसी, (स्त्री० ) ॥ १३ ॥

"Aho Shrutgyanam"

**झाटो** निकुञ्जे कान्तारे व्रणसंमार्जने वने ।
**त्रुटि**स्त्वपचये लेशे सूक्ष्मैलायां च संशये ॥ १४ ॥
कालमानेऽप्यथ **त्रोटिः** स्त्री चञ्चुमीनकट्फले ।
**त्वष्टा** वर्द्धकिगीर्वाणशिल्पिनोस्तिग्मधामनि ॥ १५ ॥
**दिष्टि**र्मुदि परीमाणे **दिष्टः** कालोपदिष्टयोः ।
**दिष्टं** भाग्येथ **दृष्टिः** स्यान्नेत्रदर्शनबुद्धिषु ॥ १६ ॥
**धटः** शुद्धितुलायां स्याद् **धटी** खण्डे च वाससः ।
**नटी** हट्टविलासिन्यां **नटः** शैलूषशोणयोः ॥ १७ ॥
**पटः** शोभनचेले स्यात्पुरस्कारपियालयोः ।
**पटु**र्वाग्मिनि नीरोगे तीक्ष्णे दक्षे स्फुटे त्रिषु ॥ १८ ॥
**पटुः** पुंसि पटोले स्त्री छत्रायां लवणे पटु ।
**पट्टः** पेषणपाषाणे फलकेऽपि चतुष्पथे ॥ १९ ॥

---

**झाट**—कुंज (लता आदिकोंकी (कुटी), दुर्गमस्थान, व्रण (घाव)का झारना, वन, ( पुं० )
**त्रुटि**—अपचय ( घटना ), स्वल्प, छोटी इलायची, संदेह, ॥ १४ ॥ कालप्रमाण, ( स्त्री० )
**त्रोटि**—पक्षीकी चोंच, मच्छी,कायफल-औषधि, ( स्त्री० )
**त्वष्टा**—बढई, देवताओंका कारीगर, सूर्य ( पुं० ) ॥ १५ ॥
**दिष्टि**—आनंद, परिमाण, ( स्त्री० )
**दिष्ट**—काल, उपदेशकियाहुवा, (पुं०)
**दिष्ट**—भाग्य, ( न० )
**दृष्टि**—नेत्र, दर्शन, बुद्धि (स्त्री०) १६
**धट**—शुद्धि ( सौगन आदिसे ) विश्वास, तराजू, ( पुं० )
**धटी**—वस्त्रका खंड, ( स्त्री० )
**नटी**—नखी-गंधद्रव्य, या हलदी,(स्त्री०)
**नट**—नाटककरनेवाला, अशोक वृक्ष ( पुं० ) ॥ १७ ॥
**पट**—सुंदरवस्त्र, पुरस्कार ( सँवारना ), चिरोंजी-वृक्ष, ( पुं० )
**पटु**—बहुतबोलनेवाला, नीरोग, तीक्ष्ण, चतुर, स्पष्ट, ( त्रि० ) ॥ १८ ॥
**पटु**—परवल-शाक ( पुं० ) सोआ-शाक या सोंफ,(स्त्री०) नमक (न०)
**पट्ट**—पीसनेका पत्थर, ढाल, चौराहा, ॥ १९ ॥

"Aho Shrutgyanam"

व्रणादिबन्धराजादिशासनासनभेदयोः ।
**पट्टी** भालविभूषायां **पट्टी** लाक्षाप्रसादने ॥ २० ॥
**पट्टिः** पटविभेदे स्याद् वल्गुलौ कुम्भिकाद्रुमे ।
**पुष्टिः** स्यात्पोषणे वृद्धौ **फटा** तु फणदम्भयोः ॥ २१ ॥
तटेऽश्रमकृते **फाण्टं** **वट**स्तु स्याद्गुणे त्रिषु ।
**वटो** वराटन्यग्रोधे वर्तिकायां **वटी** मता ॥ २२ ॥
वीरे पामरभेदे ना **भटः** स्त्री प्रगमे **भटिः** ।
**भृष्टि**स्तु भर्जने शून्यवाटिकायामपि स्त्रियाम् ॥ २३ ॥
**मुष्टि**र्बद्धकरे पुंसि स्त्रियामपि तथा पले ।
**म्लिष्टं** स्याद्वाच्यवन्म्लाने **म्लिष्ट**मव्यक्तभाषणे ॥ २४ ॥
**यष्टिः** शस्त्रान्तरे हारे हारे हारान्तरेऽपि च ।
भार्ङ्ग्यां च मधुपर्ण्यां च ध्वजदण्डे तु पुंस्ययम् ॥ २५ ॥

---

घावके बांधनेका वस्त्र, राजा आदिका हुकुम ( पट्टा ), आसनभेद (तखत या सिंहासन), (पु०)

**पट्टी**–मस्तकका भूषण, लोध-वृक्ष, ( स्त्री० ) ॥ २० ॥

**पट्टि**–वस्त्रभेद, वागुल-पक्षी, पांडर-वृक्ष, ( स्त्री० )

**पुष्टि**–पोषण, वृद्धि, ( स्त्री० )

**फटा**–सर्पका फण, दम्भ ( पाखंड ) ( स्त्री० ) ॥ २१ ॥

**फांट**–तट, विनापरिश्रमकियाहुवा, ( न० )

**वट**–रस्सी आदि, ( त्रि० ) कौडी, बड-वृक्ष, ( पुं० )

**वटी**–बत्ती दीपककी ( स्त्री० ) ॥२२॥

**भट**–वीर-नीचभेद ( पुं० )

**भटि**–वेगसे गमन करना ( स्त्री० )

**भृष्टि**–धानआदिका भूनना, सूनी बाडी, ( स्त्री० ) ॥ २३ ॥

**मुष्टि**–हाथकी मुट्ठी, (पुं० ) चारतोला प्रमाण, ( स्त्री० )

**म्लिष्ट**–मलिन, ( त्रि० )

**म्लिष्ट**–अप्रकट वाणी, (न०) ॥२४॥

**यष्टि**–शस्त्रभेद, हार, '**हारयष्टि**' हार, भारंगी, ( ब्रह्मनेटि ), मुलहटी, ( स्त्री० ) ध्वजाका डंडा, ( पुं० ) ॥ २५ ॥

"Aho Shrutgyanam"

**रिष्टं** क्षेमे मृत्युचिह्ने विनाशे ना तु सायके ।
**रिष्टस्तु रिष्टिवत्खड्गे** समृद्धौ पुंस्त्रियोः क्रमात् ॥ २६ ॥
**लटो** दोषेपि वाग्दोषे **लाटस्त्वंशुकदेशयोः** ।
**वाटस्तु** वर्त्मनि वृतौ **वाटी** स्याद्गृहनिष्कुटे ॥ २७ ॥
**विटस्तु** खिङ्गलवणशङ्खाखुखदिराद्रिषु ।
**विष्टिः** कर्म्मकरे भद्रे वेतने प्रेषणे स्त्रियाम् ॥ २८ ॥
**व्युष्टं** दिने प्रभाते च फले पर्युषिते त्रिषु ।
**व्युष्टिः** समृद्धौ विहिता नियमादिफलेऽपि च ॥ २९ ॥
**सटा** जटाकेसरयोः **सृष्टिर्निर्म्माणसर्गयोः** ।
**सृष्टं** तु निर्मिते त्यक्ते त्रिषु प्राज्येऽपि निश्चिते ॥ ३० ॥
**स्फुटो** व्यक्ते प्रफुल्ले च व्याप्तवत्त्रिष्वपि त्रिषु ।
**स्फुटिः** स्फुटिककर्कट्यां पादस्फोटेऽपि च **स्फुटिः** ॥ ३१ ॥

---

**रिष्ट**—कल्याण, मृत्युचिह्न, विनाश, ( न० ) बाण, ( पुं० )

**रिष्ट(ष्टि)**—खड्ग, ( पुं० ) समृद्धि, ( स्त्री० ) ॥ २६ ॥

**लट**—दोष, वाणी दोष, ( पुं० )

**लाट**—वस्त्र, देशभेद, ( पुं० )

**वाट**—मार्ग, वृति ( काटोंवाली लकडियोंसे बाडा ( घेर ) करना ) (पुं०)

**वाटी**—घरकेपासका बगीचा, (स्त्री०) ॥ २७ ॥

**विट**—धूर्त, लवण, शंख, मूसा, खदिर ( खैर ) वृक्ष, पर्वत, ( पुं० )

**विष्टि**—नौकरीलेकर कामकरनेवाला, भद्रा, नौकरी, प्रेरणाकरना (स्त्री०) ॥ २८ ॥

**व्युष्ट**—दिन, प्रभात, फल, बासी भोजन आदि, ( त्रि० )

**व्युष्टि**—समृद्धि, नियमआदिकोंका फल, ( स्त्री० ) ॥ २९ ॥

**सटा**—जटा-तपस्वीकी, केसर, (स्त्री०)

**सृष्टि**—रचना-साधारण, रचना-जगत्की, ( स्त्री० )

**सृष्ट**—रचाहुवा, दानकिया हुवा, प्राज्य ( बहुत), निश्चित, ( त्रि० ) ॥३०॥

**स्फुट**—प्रकट, फूलाहुवा, व्याप्त, (त्रि०)

**स्फुटि**—खिलीहुई ककड़ी, पादफोट ( बिबाई ) ( स्त्री० ) ॥ ३१ ॥

"Aho Shrutgyanam"

**हृष्टो** रोमाञ्चिते जातहर्षे प्रहसिते स्मृते ।

टतृतीयम् ।

**अवटः** कुहके कूपे खिले गर्त्तेऽप्यथाऽ**वटुः** ॥ ३२ ॥
गर्त्ते कूपे च घाटायाम**र्गटो**ऽन्तर्गले गले ।
**अरिष्टः** फेनिले निम्बे लशुने काककङ्कयोः ॥ ३३ ॥
**अरिष्टं** सूतिकागारे तक्रे चिह्ने शुभेऽशुभे ।
**उत्कट**स्तीव्रे मत्ते च **करटो** निन्द्यजीविते ॥ ३४ ॥
एकादशाहश्राद्धे च काकवाद्यान्तरेऽपि च ।
कुब्राह्मणे कुसुम्भेऽपि दुर्दान्तगजगण्डयोः ॥ ३५ ॥
**कर्कटः** करणे स्त्रीणां राशिभेदकुलीरयोः ।
खगे तु **कर्कटी** तु स्याद्वालुङ्क्यां शाल्मलीफले ॥ ३६ ॥

---

**हृष्ट**–रोमांचवाला, आनंदवाला, हंसाहुवा, स्मरण कियाहुवा ।

**टतृतीय ।**

**अवट**–कपटी, कूवा, अधूरा, खड्डा, ( पुं० )

**अवटु**–खड्डा, कूवा, ग्रीवा और शिरकी संधिका पिछला भाग, (पुं०)

**अर्गट**–गलका अंतर्भाग, गल, (पुं०) ॥ ३२ ॥

**अरिष्ट**–रीठा, नीब-वृक्ष, लहस्सन, काग-पक्षी, श्वेत चील-पक्षी, (पुं०) ॥ ३३ ॥

**अरिष्ट**–प्रसूतिका ( जच्चाका ) स्थान, छाछ चिह्न–शुभ अशुभ, ( न० )

**उत्कट**–तीव्र, मदोन्मत्त, ( पुं० )

**करट**–निंद्य आजीविका करनेवाला ॥ ३४ ॥ मरनेसे ग्यारहवें दिनका श्राद्ध, काग-पक्षी, बाजाका भेद, निंदितब्राह्मण, कसूंभा, कठिनतासे दमनकियाहुवा, हस्तीका गंडस्थल, ( पुं० ) ॥ ३५ ॥

**कर्कट**–स्त्रियोंका करण ( हावभेद), राशिभेद, कुलीर-जन्तु, पक्षी, ( पुं० )

**कर्कटी**–ककड़ी, सेमलका फल, ( स्त्री० ) ॥ ३६ ॥

"Aho Shrutgyanam"

**कर्द्दटः** पङ्कपङ्कारकरहाटेषु कीर्त्तितः ।
**कर्यटस्त्रिषु** कार्यज्ञे पुमाञ्जतुनि **कर्यटः** ॥ ३७ ॥
**कीकटो** मगधेऽपि स्यान्निःस्वे चाश्वे मितंपचे ।
**कुक्कुटस्ताम्रचूडे** स्यात्कुकुभे वाग्निकुक्कुटे ॥ ३८ ॥
निषादशूद्रयोश्चैव तनये त्रिषु **कुक्कुटः** ।
रसोनभेदोच्चटयोस्तालमध्येपि **कुक्कुटी** ॥ ३९ ॥
**कुक्कुटी** ताम्रचूडाख्ययोषिन्मिथ्योपचर्ययोः ।
**कुरुण्टी** शालभंज्यां स्यात्**कुरुण्टो** झिण्टिकान्तरे ॥ ४० ॥
**कूपीटमुदरे नीरे** **केशटस्तु** कणे हरौ ।
**चक्राटः** पुंसि दीनारे धूर्त्ते जाङ्गुलिके त्रिषु ॥ ४१ ॥
**चर्प्पटः** स्फारविपुले चपेटे चैव **चर्प्पटः** ।
**चर्प्पटः** पर्पटेऽपि स्यात्पिष्टभेदे तु **चर्प्पटी** ॥ ४२ ॥

---

**कर्द्दट**—कीच, सिवाल ( जलकाई ), कमलकी जड़, ( पुं० )
**कर्यट**—कार्यको जाननेवाला, (त्रि०) लाख, ( पुं० ) ॥ ३७ ॥
**कीकट**—मगध-देश, दरिद्री, अश्व ( घोडा), कंजूस, ( पुं० )
**कुक्कुट**—मुर्गा, वनमुर्ग, ॥ ३८ ॥ अग्निकुक्कुट, निषाद ( भील ) जाति, शूद्र-जाति, पुत्र, ( त्रि० )
**कुक्कुटी**—लहसुनभेद, भूई आवला, तालवृक्ष ॥ ३९ ॥ मुर्गी, मिथ्यासत्कार, (स्त्री०)
**कुरुंटी**—शालभंजी ( कठपूतली ), ( स्त्री० )
**कुरुंट**—कटसरैया-झाड़, (पुं०) ॥४०॥
**कूपीट**—उदर ( पेट ), जल, ( न० )
**केशट**—कण ( अल्प ), हरि ( पुं० )
**चक्राट**—अशरफी, धूर्त, ( पुं० ) विषवैद्य ( गारुडी ) ( त्रि० ) ४१
**चर्पट**—बहुतजियादह, चपेट (थप्पड), पापड़, ( पुं० )
**चर्पटी**—पिष्टभेद, ( स्त्री० ) ॥ ४२ ॥

"Aho Shrutgyanam"

चिपिटश्चिपिटे पुंसि पिच्चिते विस्तृतेऽन्यवत् ।
चिरण्टी तु सुवासिन्यां स्याद्वितीयवयःस्त्रियाम् ॥ ४३ ॥

वार्त्ताकु पुष्पे जकुटं जकुटो मलये शुनि ।
त्रिकूटं सिन्धुलवणे त्रिकूटः स्यात्सुवेलके ॥ ४४ ॥

त्रिपुटस्तु भवेत्तीरे पुमानपि सतीनके ।
त्रिपुटा मल्लिकाभेदे सूक्ष्मैलात्रिवृतोरपि ॥ ४५ ॥

त्र्यङ्कटं शिक्यभेदे स्याद्धौताञ्जन्यामपीष्यते ।
द्रोहाटस्तु मतो गाथाप्रभेदे मृगलुब्धके ॥ ४६ ॥

बैडालव्रतिकेऽपि स्याद्धाराटश्चातकाश्वयोः ।
निर्दटो निर्दये न्यायवादरक्ते च निष्फले ॥ ४७ ॥

निष्कुटस्तु गृहोद्याने स्यात्केदारकपाटयोः ।
पर्पटस्तु द्वयोः पिष्टविकृतौ भेषजान्तरे ॥ ४८ ॥

---

**चिपिट**–भिगोयकर भूना हुवा धान्य, ( पुं० ) नेत्ररोगी, विस्तारवाला, ( त्रि० )

**चिरंटी**–सुहागिनस्त्री, दूसरी अवस्थावाली स्त्री ( स्त्री० ) ॥ ४३ ॥

**जकुट**–बैंगनका पुष्प, ( न० )

**जकुट**–मलय-पर्वत, कुत्ता, ( पुं० )

**त्रिकूट**–समुद्रनमक, ( न० )

**त्रिकूट**–सुवेल नामका पर्वत, (पुं०) ४४

**त्रिपुट**–तीर, मटर-धान्य, ( पुं० )

**त्रिपुटा**–मल्लिका ( मोतिया ) भेद, छोटीइलायची, निसोथ, ( स्त्री० ) ॥ ४५ ॥

**त्र्यंगट**–शिक्य ( छींका ) भेद, औषधीभेद ( न० )

**द्रोहाट**–गाथाभेद, मृगका शिकारी, ॥ ४६ ॥ बैडालव्रती ( व्रतीभेद ) ( पुं० )

**धाराट**–पपीहा-पक्षी, अश्व, ( पुं० )

**निर्दट**–निर्दय-पुरुष, न्यायवादमें अनुरक्त, निष्फल, ( पुं० ) ॥ ४७ ॥

**निष्कुट**–घरका बगीचा, खेत, किवाड़ ( पुं० )

**पर्पट**–पापड़, औषधिभेद ( पित्तपापड़ा ) ( पुं० न० ) ॥ ४८ ॥

६

"Aho Shrutgyanam"

**परीष्टिः** परिचर्यायां प्राकाश्येऽपि गवेषणे ।
**पर्कटी** प्लक्षपाकल्पोः **पात्रटः** कर्परे कृशे ॥ ४९ ॥
**पिच्चटो** नेत्ररोगेपि **पिच्चटं** सीसके त्रपौ ।
बरटायां सयोषायां गन्धोल्यां **बरटो** द्वयोः ॥ ५० ॥
**बर्बटी** गणिकायां स्याद् व्रीहिभेदेऽपि **बर्बटी** ।
**बर्बटो** मकरे पोते वारुडेऽपि च **बर्बटः** ॥ ५१ ॥
स्त्रियां पुञ्जेपि **भाकूटा भाकूटो** मीनशैलयोः ।
**भार्याटः** पटहाजीवे लोभात्स्वस्त्रीसमर्पके ॥ ५२ ॥
**भावाटः** कामुके साधुनिवेशे भावके नटे ।
**मर्कटः** कपिलूतास्त्रीकरणेष्वथ **मर्कटी** ॥ ५३ ॥
रानरीशूकशिम्ब्यां स्याद् चक्राङ्ग्यां करजान्तरे ।
बीजे तु राजकर्कट्याः प्राचीनामलकस्य च ॥ ५४ ॥

---

**परीष्टि**—शुश्रूषा ( सेवा ), प्रकाशकरना, ढूंढना, ( स्त्री० )
**पर्कटी**—पिलखन-वृक्ष, ककड़ी, (स्त्री०)
**पात्रट**—कपाल, दुबला-पुरुष, ( पुं० ) ॥ ४९ ॥
**पिच्चट**—नेत्ररोग, ( पुं० ) शीशा, रांगा, ( न० )
**बरट**—हंस, छोटाकचूर, ( पुं० न० )
**बरटा** हंसी, ( स्त्री० ) ॥ ५० ॥
**बर्बटी**—वेश्या, धान ( चावल ) भेद, ( स्त्री० )
**बर्बट**—मगरमच्छ, बालक, नटजातिभेद ( पुं० ) ॥ ५१ ॥
**भाकूटा**—समूह ( स्त्री० )
**भाकूट**—मच्छी, पर्वत, ( पुं० )
**भार्याट**—ढोल बजाकर आजीविकाकरनेवाला, लोभसे अपनी स्त्रीको दूसरेको सोंपनेवाला ( पुं० ) ५२
**भावाट**—कामी-पुरुष, सुंदरसेनास्थान, पदार्थको सोचनेवाला, नट, (पुं०)
**मर्कट**—बन्दर, ( पुं० )
**मर्कटी**—॥ ५३ ॥ मकडी-जन्तु, स्त्रीकरण ( हावभेद ), कौंचकी फली, कुटकी, करंजुवाभेद, (स्त्री०) बडीककडीके बीज, पुरामे आंवलेके बीज, ॥ ५४ ॥

"Aho Shrutgyanam"

गवेधुकाफले चैव **मर्कटः** पुंसि दृश्यते ।
**मोचाटश्चन्दने** कृष्णजीररम्भास्थ्युपस्करे ॥ ५५ ॥
**मोरटं** त्विक्षुमूले स्यादङ्कोटकुसुमेऽपि च ।
सप्तरात्रात्परक्षीरे मूर्तिकायां तु **मोरटा** ॥ ५६ ॥
**रवटो** दक्षिणावर्तशङ्खे जाङ्गुलिकेऽपि च ।
वराहे मोरटे रेणौ वातूलेऽपि च **रेवटः** ॥ ५७ ॥
**वर्ण्णाटो** गायने कामिचित्रकृद्दारजीविनि ।
**विकटो** विकराले स्याद्विशाले सुंदरे वरे ॥ ५८ ॥
**वेकटः** स्याद्वैकटिके मीने च नवयौवने ।
**वरटो** मिश्रिते नीचे **वेरटं** बदरीफले ॥ ५९ ॥
**शैलाटो** देवले सिंहे सितकाचकिरातयोः ।
**संसृष्टं** त्रिषु वान्त्यादिसंशुद्धे सङ्गतेऽपि च ॥ ६० ॥
**हर्म्मटस्तु** पुमान्सूर्ये कच्छपेऽपि च **हर्म्मटः** ।

---

गंगेरनका फल, ( पुं० )
**मोचाट**–चंदन, कालाजीरा, केलेका गर्भभाग, उपस्कर, ( पुं० ) ५५
**मोरट**–गन्नाकी-जड़, ढेरावृक्षका पुष्प, सातरात्रिसे उपरांतका दूध, (पुं०)
**मोरटा**–मोरबेल तथा मूर, (स्त्री०) ॥ ५६ ॥
**रवट**–दक्षिणावर्त्त शंख, विषवैद्य (गारुडी ) ( पुं० )
**रेवट**–सूकर, क्षीरमोरट, पित्तपापड़ा, वायुको नहीं सहनेवाला ( पुं० ) ॥ ५७ ॥
**वर्ण्णाट**–गाना, कामी-पुरुष, चित्रकार, स्त्रीकी कीहुई जीविकावाला (पुं०)
**विकट**–भयंकर, बडा, सुंदर, श्रेष्ठ, (पुं०) ॥ ५८ ॥
**वेकट**–मच्छीभेद, मच्छीमात्र, नवीन-यौवन, ( पुं० )
**वरट**–मिलाहुवा, नीच, ( पुं० )
**वेरट**–झाडीका फल (बेर), (न०) ५९
**शैलाट**–देवल ( मंदिर ), सिंह, सफेद काच, किरात-जाति, ( पुं० )
**संसृष्ट**–वमन आदिसे शुद्धहुवा, संगत ( योग्य ) ( त्रि० ) ॥ ६० ॥
**हर्मट**–सूर्य, कछवा, ( पुं० ) ॥

"Aho Shrutgyanam"

टचतुर्थम् ।

पुमानुच्चिङ्गटे मीनभेदे कोपनपूरुषे ॥ ६१ ॥
करहाटोऽब्जकन्देऽपि शल्यद्रौ कुसुमान्तरे ।
कामकूटस्तु गणिकाविभ्रमे गणिकाप्रिये ॥ ६२ ॥
त्रिषु कार्यपुटो ह्रीके प्रमत्ताऽनर्थकारिणोः ।
कुटन्नटस्तु कैवर्तिमुस्तके शोणके पुमान् ॥ ६३ ॥
कुण्डकीटस्तु चार्वाकवाण्यभिज्ञेपि पुंश्चले ।
जारजे ब्राह्मणीपुत्रदासीकामुकयोरपि ॥ ६४ ॥
खङ्गरीटस्तु फलकासिधाराव्रतचारिणोः ।
गाढमुष्टिस्तु कृपणे कृपाणछुरिकादिषु ॥ ६५ ॥
चक्रवाटः क्रियारोहे पर्यन्ते च शिखातरौ ।
चतुःषष्टिस्तु संख्यायां बह्वृचेऽपि कलास्वपि ॥ ६६ ॥
नारकीटोऽश्मकीटे स्यात्स्वदन्ताशाविहन्तरि ।
परपुष्टः परभृते परपुष्टाऽपणस्त्रियाम् ॥ ६७ ॥

---

**टचतुर्थ ।**

**उच्चिंगट**–मच्छीभेद, क्रोधी पुरुष, ( पुं० ) ॥ ६१ ॥

**करहाट**–कमलकन्द, मैनफलका वृक्ष, पुष्पभेद, ( पुं० )

**कामकूट**–वेश्याका हावभाव आदि, वेश्यागामी, ( पुं० ) ॥ ६२ ॥

**कार्यपुट**–लज्जावान, प्रमत्त, अनर्थकारी, ( पुं० )

**कुटन्नट**–केवटीमोथा, सोनापाठा-वृक्ष, ( पुं० ) ॥ ६३ ॥

**कुण्डकीट**–चार्वाकवाणीका जाननेवाला, जार-पुरुष, जारसे उत्पन्नहुवा ब्राह्मणीका पुत्र, दासीके संग रमण करनेवाला ( पुं० ) ॥ ६४ ॥

**खङ्गरीट**–ढाल और तलवारकी धारका व्रत धारण करनेवाला (पुं०)

**गाढमुष्टि**–कंजूस, तलवार छुरी आदि ( पुं० ) ॥ ६५ ॥

**चक्रवाट**–क्रियाका प्रारंभ, गोरा, शिखावृक्ष, ( पुं० )

**चतुःषष्टि**–चौसठ-संख्या, (बह्वृच वेद-ऋचा), चौसठकला (स्त्री०) ॥६६॥

**नारकीट**–पत्थरका कीडा, अपनी दईहुई आशाको नष्ट करनेवाला, ( पुं० )

**परपुष्ट**–कोयल-पक्षी, (पुं०)

**परपुष्टा**–वेश्या (स्त्री०) ॥ ६७ ॥

"Aho Shrutgyanam"

**प्रतिकृष्टं** मतं गुह्ये द्विरावृत्त्यवकर्षिते ।
**प्रतिशिष्टः** प्रतिहते दन्ते ख्याते च वाच्यवत् ॥ ६८ ॥
**प्रतिसृष्टं** भवेत्प्रत्याख्यातप्रोषितयोस्त्रिषु ।
**बर्करा(ट)ः** कटाक्षेऽपि तरुणादित्यदीधितौ ॥ ६९ ॥
नारीपयोधरोत्सङ्गकान्तदन्तनखक्षते ।
**शिपिविष्टस्तु** खलतौ दुश्चर्मणि महेश्वरे ॥ ७० ॥
प्राञ्चलोहे **श्रुतिकटः** प्रायश्चित्ते भुजङ्गमे ।
**सिंहच्छटा** तु पुन्नागकेसरे नागकेसरे ॥ ७१ ॥

टपञ्चमम् ।

अथ स्या**द्दशनोच्छिष्टश्चुं**बे निःश्वासितेऽधरे ।
लोहे कांस्ये मृदङ्गारशकट्यां रत्नकङ्कणे ॥ ७२ ॥
पावके पटहस्यापि बदरे **पात्रचर्घटः** ॥ ७३ ॥

इति विश्वलोचने टान्तवर्गः ॥

---

**प्रतिकृष्ट**–गुह्य ( गुदआदि ), दूसरीबार बाहाहुवा क्षेत्र, (न०)

**प्रतिशिष्ट**–दियाहुवाका फिर लेना, विख्यात, ( त्रि० ) ॥ ६८ ॥

**प्रतिसृष्ट**–नटाहुवा, प्रोषित ( परदेश गयाहुवा ) ( त्रि० )

**बर्कराट**–कटाक्ष ( नेत्रकी कोरसे देखना ), मध्याह्नसूर्यकी किरण, ॥ ६९ ॥ स्त्रीके कुच और पेट आदिपर पतिका कियाहुवा नखघाव ( पुं० )

**शिपिविष्ट**–गंजा ( जिसके केश उडगयेहों ), बुरी चर्मवाला, महादेव, ( पुं० ) ॥ ७० ॥

**श्रुतिकट**–धातुभेद, लगेहुए पापका दूर करना, सर्प, ( पुं० )

**सिंहच्छटा**–नागकेसरभेद, नागकेसर, ( स्त्री० ) ॥ ७१ ॥

**टपंचम ।**

**दशनोच्छिष्ट**–चुंबन करना, बाहरको श्वास छोडना, होंठ (पु०)

**पात्रचर्घट**–लोहा, कांसी, मिट्टीकी सिगड़ी, रत्नकंकण, ॥ ७२ ॥ अग्नि, ढोलका घेरा, (पुं० )॥७३॥

इस प्रकार विश्वलोचनकी भाषाटीकामें टान्तवर्ग समाप्त हुवा ॥

"Aho Shrutgyanam"

# अथ ठान्तवर्गः ।

ठैकम् ।

**ठ**श्चन्द्रे मण्डले शून्ये स्यात् करेणूच्चशब्दिते ।

ठद्वितीयम् ।

**कठो** मुनावृचां भेदे तदध्येतरि तद्विदि ॥ १ ॥
खरेऽपि **कण्ठस्तु** गले पार्श्वे शल्यद्रुशब्दयोः ।
**काष्ठोत्कर्षे** दिशि स्थाने कालमाने च सीमनि ॥ २ ॥
**काष्ठा** दारुहरिद्रायां **काष्ठं** तु क्लीबमिन्धने ।
**कुण्ठो** मूर्खेप्यकर्मण्ये **कुष्ठं** भेषजरोगयोः ॥ ३ ॥
**कोष्ठो**ऽन्तःकुक्षिगृहयोः कुसूलात्मीययोरपि ।
**गोष्ठी** सभायां संलापे **गोष्ठं** गोस्थानके मतम् ॥ ४ ॥
**ज्येष्ठो** मासेऽग्रजे श्रेष्ठे वृद्धे **ज्येष्ठा** तु तारके ।
मुसल्यामङ्गुलीभेदे **दुष्ठः** स्याद् दुर्बलेऽधमे ॥ ५ ॥

---

## अथ ठान्तवर्ग ।

ठैक ।

**ठ**–चंद्रमा, मंडल, शून्य ( पोल ), हथनियोंका ऊंचाशब्द, ( पुं० )

### ठद्वितीय ।

**कठ**–कठनामका-मुनि, ऋचाओंका भेद, कठशाखाको पढनेवाला, कठशाखाको जाननेवाला, ॥१॥ खर, ( पुं० )

**कण्ठ**–गल, समीपता, मैनफलका वृक्ष, ( पुं० )

**काष्ठा**–बडप्पन, दिशा, स्थान, कालप्रमाण, सीम ( हद ) ॥ २ ॥ दारुहलदी, (स्त्री० )

**काष्ठ**–ईंधन ( न० )

**कुंठ**–मूर्ख, अकर्मी, ( पुं० )

**कुष्ठ**–औषधि–कूट, कुष्ठ ( कोढ ) रोग ( न० ) ॥ ३ ॥

**कोष्ठ**–पेटका भीतरभाग, घर, कुठला, अपनी वस्तु, (पुं० )

**गोष्ठी** सभा, वार्तालाप, ( स्त्री० )

**गोष्ठ**–गौवोंका ठान ( न० ) ॥ ४ ॥

**ज्येष्ठ**–ज्येष्ठ–मास, बडा भाई, श्रेष्ठ, वृद्ध, (पुं०)

**ज्येष्ठा**–ज्येष्ठा–नक्षत्र, छपकली, अंगुलीभेद, ( स्त्री० )

**दुष्ठ**–दुर्बल, अधम, ( पुं० ) ॥ ५ ॥

"Aho Shrutgyanam"

**निष्ठा** निर्वहनिष्पत्तिनाशान्तोत्कर्षयाचने ।
क्लेशेऽथ **पाठाम्बष्ठायां पाठस्तु** पठने पुमान् ॥ ६ ॥

**पृष्ठं** शरीरावयवान्तरेऽपि चरमेऽपि च ।
**प्रष्ठो**ऽग्रगामिनि श्रेष्ठे **प्रष्ठा** चाण्डालिकौषधौ ॥ ७ ॥

**वण्ठः** स्यादकृतोद्वाहे कुन्तधारकखर्वयोः ।
**शठस्तु** पुंसि धत्तूरे धूर्तमध्यस्थयोस्त्रिषु ॥ ८ ॥

**शोठो**ऽलसे च मूर्खे च **श्रेष्ठो** वरकुबेरयोः ।
**षष्ठी** तु षण्णां पूरण्यां त्रिषु स्त्री हरयोषिति ॥ ९ ॥

**हठस्तु** स्याद्बलात्कारे वारिपर्ण्यां तु पुंस्ययम् ।

### ठतृतीयम् ।

**अपष्ठुः** समये वामेऽ**म्बष्ठो** वैश्यासुते द्विजात् ॥ १० ॥

---

**निष्ठा**–नाटकसंधि, सिद्धि, नाश, अन्त, बडप्पन, याचना, क्लेश(कष्ट) ( स्त्री० )
**पाठा**–पहाडमूल, ( स्त्री० )
**पाठ**–पढना ( पुं० ) ॥ ६ ॥
**पृष्ठ**–शरीरका पिछला भाग, पिछला ( न० )
**प्रष्ठ**–आगे चलनेवाला, श्रेष्ठ, ( पुं० )
**प्रष्ठा**–चांडाली औषधि, (स्त्री०) ॥७॥
**वंठ**–जिसका बिवाह न हुवा वह, भाला ( हथियार ) धारनेवाला, ठिंगना–पुरुष (पुं०)
**शठ**–धतूरा, धूर्त, मध्यस्थ, ( त्रि० ) ॥ ८ ॥
**शोठ**–आलसी, मूर्ख, (पुं०)
**श्रेष्ठ**–उत्तम, कुबेर, ( पुं० )
**षष्ठी**–छह संख्याओंको पूरी करनेवाली ( त्रि० ) देवी–भेद, (स्त्री०) ॥ ९ ॥
**हठ**–जबरदस्ती, जलकुंभी, ( पुं )

**ठतृतीय ।**

**अपष्ठु**–काल, (पुं०) वामभाग,(त्रि०)
**अम्बष्ठ**–ब्राह्मणसे उत्पन्नहुवा बनियानीका पुत्र, ॥ १० ॥

"Aho Shrutgyanam"

देशेऽम्बष्ठा तु चाङ्गेर्यां पाठयूथिकयोरपि ।
**कनिष्ठो**ऽल्पेऽनुजे यूनि **कनिष्ठा** त्वन्तिमाङ्गुलौ ॥ ११ ॥
**कमठः** कच्छपे पुंसि **कमठं** भाजनान्तरे ।
**जरठः** कठिने पाण्डौ कर्कशेप्यभिधेयवत् ॥ १२ ॥
**नर्मठ**श्चुबुके पुंसि **नर्मठो** नागरेऽन्यवत् ।
**प्रकोष्ठो** विस्तृतकरे कूर्परादधरेऽपि च ॥ १३ ॥
नृपकक्षान्तरे चाथ **प्रतिष्ठा** गौरवे मता ।
या(यो)गनिष्पादने स्थानचतुरक्षरपद्ययोः ॥ १४ ॥
**वरिष्ठः** प्रवरे चोरुतरे स्यादभिधेयवत् ।
**वरिष्ठं** मरिचे ताम्रे **वरिष्ठः** पुंसि तित्तिरौ ॥ १५ ॥
**मकुष्ठो** मन्थरेऽपि स्याद् व्रीहिभित्सवयोरपि ।
**लघिष्ठो** भेलकेऽत्यल्पे **वैकुण्ठो** विष्णुशक्रयोः ॥ १६ ॥

---

**अम्बष्ठा**–अम्ललोनियां-औषधि, पाढ, जूही–पुष्पझाड, ( स्त्री० )
**कनिष्ठ**–अल्प, छोटा भ्राता, जवान, (पुं०)
**कनिष्ठा** दुबला, पिछली अंगुली, ( स्त्री० ) ॥ ११ ॥
**कमठ**–कछुवा, ( पु० ) पात्रविशेष, ( न० )
**जरठ**–कठोर, पाण्डु ( पीला ), कर्कश ( दुःस्पर्श ) ( त्रि० ) ॥ १२ ॥
**नर्मठ**–कुचका अग्रभाग, धूर्त ( पुं० )
**प्रकोष्ठ**–फैलायाहुवा हाथ, कोंहनीसे नीचेका भाग, राजाकी ड्योढी, (पुं०) ॥ १३ ॥
**प्रतिष्ठा**–बडप्पन, योग या यज्ञकी सिद्धि, स्थान, चार अक्षरका छंद, ( स्त्री० ) ॥ १४ ॥
**वरिष्ठ**–श्रेष्ठ, बहुत जियादह, (त्रि०) मिरच, ताँबा, ( न० ) तीतर-पक्षी, ( पुं० ) ॥ १५ ॥
**मकुष्ठ**–मंद चलनेवाला, मोठ-धान्य, यज्ञभेद, ( पुं० )
**लघिष्ठ**–नदी तरनेकी छोटी नौका, बहुत छोटा, ( पुं० )
**वैकुंठ**–विष्णु, इंद्र (पुं०) ॥ १६ ॥

"Aho Shrutgyanam"

**श्रीकण्ठः** पार्वतीनाथे कुरुजाङ्गलकेऽपि च ।
भवेदार्येऽपि **साधिष्ठः साधिष्ठो**ऽपि दृढेऽपि च ॥ १७ ॥

ठचतुर्थम् ।

**कलकण्ठः** पिके पारावते हंसे कलध्वनौ ।
कण्ठे मृगान्तरे **कालपृष्ठः** क्लीबं तु कार्मुके ॥ १८ ॥
कर्णबाणेऽप्यथो **दन्तशठो** जम्भकपित्थयोः ।
कर्मरङ्गेऽपि नारङ्गे रुक्क्रियायां स्त्रियामियम् ॥ १९ ॥
**नीलकण्ठ**स्तु दात्यूहे खञ्जने प्रबलाकिनि ।
कलविंके हरे पीतसारके **कालकण्ठ**वत् ॥ २० ॥
**पूतिकाष्ठं** तु सरले देवदारुमहीरुहे ।
**सूत्रकण्ठः** कपोते स्यात्खञ्जरीटे द्विजन्मनि ॥ २१ ॥
**हारिकण्ठः** परभृते हारान्वितगले त्रिषु ॥ २२ ॥

इति विश्वलोचने ठान्तवर्गः ॥

---

**श्रीकंठ**–महादेव,कुरुजांगलदेश,(पुं०) **साधिष्ठ**–अतिश्रेष्ठ, अतिदृढ, ( पुं० ) ॥ १७ ॥

**ठचतुर्थ ।**

**कलकंठ**–कोयल-पक्षी, कबूतर, हंस, सूक्ष्मशब्द, कंठ, मृगभेद, ( पुं० ) **कालपृष्ठ**–धनुष, कर्णका बाण,( पुं० ) ॥ १८ ॥

**दंतशठ**–चांगेरी–औषधि, जंबीरी नींबू, कैथ–वृक्ष, कमरख, नारंगी, ( पुं० ) **दंतशठ**–रोगकी क्रिया,(स्त्री०)॥१९॥

**नीलकंठ–कालकंठ**–जलकाक, खंजन–पक्षी, मयूर–पक्षी, चिडी–पक्षी, महादेव, टेरा–वृक्ष, ( पुं० ) ॥ २० ॥

**पूतिकाष्ठ**–सरल–वृक्ष, देवदारु–वृक्ष, ( न० )

**सूत्रकण्ठ**–कबूतर-पक्षी, खंजन-पक्षी, ब्राह्मण आदि, ( पुं० ) ॥ २१ ॥

**हारिकंठ**–कोयल-पक्षी, ( पुं० ) हारधारीगलवाला, ( त्रि० ) ॥ २२ ॥

इस प्रकार विश्वलोचनकी भाषाटीकामें ठान्तवर्ग समाप्त हुवा ॥

"Aho Shrutgyanam"

## अथ डान्तवर्गः ।

डैकम् ।

**डकारः** पार्वतीनाथे चासे शब्देऽपि दृश्यते ।

डद्वितीयम् ।

**अण्डं** तु खगमीनादिकोशे स्यान्मुष्कवीर्ययोः ॥ १ ॥
**इडा** बुधवधूवाचो**रिला**वद्भूगवोरपि ।
**काण्डो**ऽस्त्री वर्गबाणार्थनालावसरवारिषु ॥ २ ॥
दण्डे प्रकाण्डे रहसि स्तंबे कुत्सितकुत्सयोः ।
पतिवत्नीसुते जारात्**कुण्डः कुण्डी** कमण्डलौ ॥ ३ ॥
**कुण्डं** देवजलाधारे पिठरे तु मतं न ना ।
**क्रीडा** केलाववज्ञायां खेलायामपि सम्मता ॥ ४ ॥
**क्रोडः** शनौ वराहे च **क्रोडं क्रोडा** च वक्षसि ।
**खण्डो**ऽर्द्धेऽस्त्री पुमानिक्षुविकारे मणिदूषणे ॥ ५ ॥

---

**अथ डान्तवर्ग ।**

डैक ।

**ड(कार)**—महादेव, चास-पक्षी, शब्द ( आवाज ) ( पुं० )

**डद्वितीय ।**

**अंड**—पक्षी और मच्छीआदिकोंका कोश ( अंडा ), अंडकोश, वीर्य, ( न० ) ॥ १ )

**इडा—इला**—बुधग्रहकी स्त्री, वाणी, पृथ्वी, गौ, ( ( स्त्री०)

**कांड**—वर्ग (विषयसमाप्ति), बाण, अर्थ, नाल—डंडी, अवसर, जल, ॥ २ ॥ दण्ड ( डंडा ), वृक्षका—स्थूलभाग, एकांत, गुच्छ, निंदित, निंदा (पुं० न० )

**कुंड**—पतिके जीतेहुए जारसे उत्पन्न हुवा, ( पुं० )

**कुंडी**—कूंडी या कमंडलु( स्त्री० )॥३॥

**कुंड**—वर्षाके जलका रहनेका स्थान, पेट ( स्त्री० न० )

**क्रीडा**—क्रीडाप्रकार, तिरस्कार, खेलना, ( स्त्री० ) ॥ ४ ॥

**क्रोड**—शनि—ग्रह, सूकर, (पुं०) **क्रोड** (न०) और **क्रोडा** (स्त्री०) छाती,

**खंड**—टुकडा (पुं० न० ) खाँड ( चीनी ), मणिदोष, (पुं० )॥५॥

"Aho Shrutgyanam"

**गडो** मीनेऽन्तराये च कुब्जे पृष्ठगुडे **गडुः** ।
**गण्डस्तु** पिटके योगभेदे खड्गिकपोलयोः ॥ ६ ॥

वरे प्रवीरे चिह्ने च वाजिभूषणबुद्बुदे ।
**गुडः** स्याद्गजसन्नाहे गोलकेक्षुविकारयोः ॥ ७ ॥

**गुडा** स्नुहीगुडिकयोः कंदुके चोडनात्परः ।
**गोण्डः** पामरभेदे स्याद् वृद्धनाभौ तु वाच्यवत् ॥ ८ ॥

**चण्डस्तीव्रे** दैत्यभेदे यमदासेऽतिकोपने ।
स्त्रियां **चण्डा** धनहरीशङ्खपुष्पिकयोर्म्मता ॥ ९ ॥

भवे**च्चण्डी** तु पार्वत्यां हिंस्रकोपनयोषितोः ।
**चूडा** वलयभेदे स्याच्छिखायां वड(ल)भावपि ॥ १० ॥

**चोडो**(लो) देशविशेषे स्या**च्चोडः** प्रावरणान्तरे ।
मूर्खे मूके हिमग्रस्ते **जडा** स्त्री कन्दरौषधौ ॥ ११ ॥

---

**गड**–मच्छी, विघ्न, ( पुं० )
**गडु**–कुबडा, पीठमें गूमडावाला (पुं०)
**गंड**–छोटी फुन्सी, योगभेद, गैंडा, गाल ( मुखका एक भाग ) ॥ ६ ॥ श्रेष्ठ, शूरवीर, चिह्न, अश्वका आभूषण, बुद्बुदा, ( पुं० )
**गुड**–हस्तीका कवच, गोला, गुड, ( पुं० ) ॥ ७ ॥
**गुडा**–थोहर, गोली, **उडनगुडा**-खिन्नू, ( स्त्री० )
**गोंड**–नीच जाति, ( पुं० ) बडी तूंडी-वाला, ( त्रि० ) ॥ ८ ॥
**चंड**–तीक्ष्ण, दैत्यभेद, धर्मराजका किंकर, अति क्रोधी, ( पुं )
**चंडा**–चोरनामक गन्धद्रव्य, शंखाहुली, ( स्त्री० ) ॥ ९ ॥
**चंडी**–पार्वती, हिंसा करनेवाली स्त्री, अतिक्रोधवाली स्त्री ( स्त्री० )
**चूडा**–कंकणभेद, चोटी, घरका छज्जा ( अग्रभाग ) ( स्त्री० ) ॥ १० ॥
**चोड(ल)**–देशभेद, अंगरखा, (पुं०)
**जड**–मूर्ख, गूँगा, ठंडका सताया, (पुं०)
**जडा**–कौंचकी फली (स्त्री०) ॥ ११ ॥

"Aho Shrutgyanam"

**ताडो** मुष्ट्यादिसंमेयतृणादौ ताडने रवे ।
**ताडी** ताडीतरौ **दण्ड**श्चण्डांशोः पारिपार्श्विके ॥ १२ ॥
**दण्डः** सैन्यव्यूहभेदे मानभेदे दमे यमे ।
मंथानेऽश्वेऽभिमाने च कोणदण्डप्रकाण्डयोः ॥ १३ ॥
विग्रहे च ग्रहे यज्ञे लगुडेऽपि मतोऽस्त्रियाम् ।
**नाडी** नाड्यां शिरायां स्याद्वार्त्तायां कुहनस्य च ॥ १४ ॥
**नीडं** स्थाने कुलायेऽस्त्री समीपे तु सपूर्वकः ।
**पण्डः** षण्ढे धियां **पण्डा** **पाण्डुः** कुन्तीपतौ सिते ॥ १५ ॥
**पिण्डो** देहांसयोरस्त्री निवापे सिह्लके पुमान् ।
**पिण्डो** जपाप्रसूनेऽपि **पिण्डः** स्याद्भोजने त्रिषु ॥ १६ ॥
**पिण्डं** सान्द्रे बले बोले गृहाङ्गे जीविकायसोः ।
**पिण्डी** तु पिण्डिकाऽलावूखर्जूरीतगरान्तरे ॥ १७ ॥

---

**ताड**–मुट्ठीभरा तृण, ताडन, शब्द ( पुं० )
**ताडी**–ताडका वृक्ष, ( स्त्री० )
**दंड**–सूर्यका अनुचर, ॥ १२ ॥ सेना, सेनारचनाभेद, मानभेद, दम (इंद्रियोंका रोकना), यम नियय, दधि मथनेकी रई, अश्व, अभिमान, वीणादंड, वृक्षका पेडा, ॥ १३ ॥ विग्रह, ग्रह, यज्ञ, लाठी (पुं० न०)
**नाडी**–घटी, नस, पाखंडसे ध्यान, ( स्त्री० ) ॥ १४ ॥
**नीड**–स्थान, पक्षीका घूँसला, **सनीड**-समीप, ( पुं० न० )
**पंड**–हिजड़ा, ( पुं० )
**पंडा**–बुद्धि ( स्त्री० )
**पांडु**–कुंतीका पति–राजा, सफेदरंग-वाला, ( पुं० ) ॥ १५ ॥
**पिंड**–शरीर, कंधा ( पुं० न० ) पितरोंको देनेका पिंड, हींग, जपापुष्प या जास्वंद ( पुं० ) भोजन (त्रि० ) ॥ १६ ॥
सघन, बल, स्वनामख्यात गंध द्रव्य ( बोल ), घरका अंग, आजीविका, लोहा, ( न० )
**पिंडी**–घीया या कदू, पिंडखजूर, पिंडि–का, कोंकणदेशीय तगर, (स्त्री०) ॥ १७ ॥

"Aho Shrutgyanam"

**पिण्डी** स्याज्ज्ञानजिज्ञासे जिज्ञासेऽपि सतां मता ।
**पीडा**ऽपमर्दकृपयोः सरलद्रुशिरोध्वजे ॥ १८ ॥
**बण्डा** तु कुलटायां स्याद् **बण्डो** हस्तादिवर्जिते ।
**भाण्डं** तु भाजने वणिग्मूलवित्ते विभूषणे ॥ १९ ॥
भूषणे च तुरङ्गाणां नदीपात्रे च कुत्रचित् ।
भवेन्मण्डस्तु कूष्माण्डे कर्कट्यामपि पुंस्ययम् ॥ २० ॥
सारे पिच्छेऽपि **मण्डे**ऽस्त्री पुमानेरण्डभूषयोः ।
**मण्डा** धात्र्यामथो **मण्डं** शाकभेदे च मस्तुनि ॥ २१ ॥
**मुण्डो** राहुशिरोदैत्यभेदेषु त्रिषु मुण्डिनि ।
**रण्डा** मूषिकपर्ण्याख्यभेषजे विधवास्त्रियाम् ॥ २२ ॥
**व्याड**स्तु हिंस्रपश्वाद्ये श्वापदेऽपि सरीसृपे ।
**शुण्डा** सुरायां वेश्यायां नलिनीहस्तिहस्तयोः ॥ २३ ॥

---

**पिंडी**–ज्ञानजाननेकी इच्छा, श्रेष्ठपुरुषोंके जाननेकी इच्छा ( स्त्री० )

**पीडा**–मर्दनकरना, कृपा, सरल-वृक्ष, शिरपै धारण किया हुवा मुकुट आदि, ( स्त्री० ) ॥ १८ ॥

**बंडा**–बदचलन स्त्री, ( स्त्री० ) हाथसे वर्जित किया हुवा, ( त्रि० )

**भांड**–पात्र, बनियांका मूलधन, आभूषण, अश्वोंका आभूषण, ॥ १९ ॥ नदीके दोनोतटोंके बीचका भाग, ( न० )

**मंड**–कोहला या पेठा-शाक, ककडी, ( पुं० ) ॥ २० ॥ द्रव्यका सार, मोरकी पंख, ( पुं० न० ) अरंड-वृक्ष, आभूषण, ( पुं० )

**मंडा**–आंवला ( स्त्री० )

**मंड**–शाकभेद, दधिसे उत्पन्न हुवा मांड, ( न० ) ॥ २१ ॥

**मुंड**–राहु-ग्रह, कटा हुवा शिर, दैत्यभेद, ( पुं० ) केशमुंडाया हुवा, ( त्रि० )

**रंडा**–मूसापर्णी-औषधि, विधवा स्त्री ( स्त्री० ) ॥ २२ ॥

**व्याड**–हिंसा करनेवाले पशु आदि, श्यावज ( वनके पशु ), सर्प ( पुं० )

**शुंडा**–मदिरा, वेश्या, कमोदिनी, हस्तीकी सूँड, ॥ २३ ॥ जल हस्तिनी ( जल जंतु, ) ( स्त्री० )

"Aho Shrutgyanam"

**शुण्डा** जलकरिण्यां च **शुण्डस्तु** मदनिर्भरे ।
**शौण्डी** कुशायां चविके **शौण्डो** मत्तेऽभिधेयवत् ॥ २४ ॥
**षडः** पेयान्तरे पुंसि **षडो** भिद्यपि विद्यते ।
पद्मादिवृन्दे **षण्डोऽस्त्री** **षण्डः** स्याद्गोपतौ चये ॥ २५ ॥
क्ष्वेडस्तु पुंसि गरले ध्वाने कर्णे महेश्वरे ।
**क्ष्वेडस्त्रिषु** स्यात्कुटिले **क्ष्वेडा** तु गजयोषिति ॥ २६ ॥
वीराणां सिंहनादेऽपि वंशशल्येऽपि च स्त्रियाम् ।
**क्ष्वेडस्तु** रक्तार्कफले घोषपुष्पे दुरासदे ॥ २७ ॥

डतृतीयम् ।

**कारण्डो** मधुकोषाऽसिकारण्डवदलाढके ।
**कूष्माण्डो** गणभेदे स्यात्कर्कारुभ्रूणयोरपि ॥ २८ ॥
**कूष्माण्डी** चण्डिकायां स्यादपि स्यादौषधीभिदि ।
**कोदण्डो** देशभेदेऽपि **कोदण्डः** कार्मुके भ्रुवि ॥ २९ ॥

---

**शुंड**—मदोन्मत्त, ( पुं० )
**शौण्डी**—कुशा, चव्य, ( स्त्री० )
**शौण्ड**—मदोन्मत्त, ( त्रि० ) ॥ २४ ॥
**षड**—पीनेयोग्य पदार्थभेद, ( पुं० )
**षंड**—कमल आदिकोंका समूह, ( पुं० न० ) इंद्र, सांड आदि, समूह ( पुं० ) ॥ २५ ॥
**क्ष्वेड**—विष, शब्द, कर्ण, महादेव, ( पुं० ) कुटिल ( त्रि० )
**क्ष्वेडा**—हस्तिनी, ॥ २६ ॥ शूरवीरोंकी गर्जना, बांसका भाला, ( स्त्री० )
**क्ष्वेड**—लाल आकका फूल, घोष (तोरी) लताका पुष्प, तेजस्वी, ( पुं० ) ॥ २७ ॥

**डतृतीय ।**

**कारंड**—शहदका कोश, तलवार बनानेवाला, करडुवा-पक्षी, स्वयं उपजा तिल ( पुं० )
**कूष्मांड**—महादेवके गणोंका भेद, कोहला, गर्भ, ( पुं० ) ॥ २८ ॥
**कूष्मांडी**—चंडिका(देवी), औषधीभेद, ( स्त्री० )
**कोदंड**—देशभेद, धनुष, भ्रुकुटी, ( पुं० ) ॥ २९ ॥

"Aho Shrutgyanam"

**गारुडं** स्यान्मरकते विषशास्त्रेऽपि **गारुडम्** ।
**गारुडं** गारुडभवे **तरण्डो** भेलके पुमान् ॥ ३० ॥
वडिशीसूत्रसंबद्धतरद्वस्तुनि नावि च ।
**तित्तिडो** दैत्यभेदे स्यात् **तित्तिडो** यमचेटके ॥ ३१ ॥
वृक्षभेदेऽपि वृक्षाम्लबिंबयोरपि **तिन्तिडी** ।
**द्राविडो** वेधमुख्ये स्यान्नीवृदन्तरसङ्ख्ययोः ॥ ३२ ॥
**निर्गुण्डी**न्द्राणिकानीलशेफाल्योः **करहाटके** ।
**पिचण्डः** पुंसि जठरे पशोरवयवेपि च ॥ ३३ ॥
**पूत्यण्डः** श्वाविद्गन्धमृगयोर्गन्धकीटके ।
**प्रकाण्डो**ऽस्त्री तरुस्कन्धे प्रशस्ते विटपेऽपि च ॥ ३४ ॥
**प्रचण्डो** दुर्वहे श्वेतकरवीरे प्रतापिनि ।
**वरण्डो** मुखरोगे स्यादंतरावेदिवृन्दयोः ॥ ३५ ॥

---

**गारुड**—मरकत ( नीली ) मणि, विषशास्त्र, विषशास्त्र विषै होनेवाला ( न० )
**तरंड**—नदी आदिमें तरनेका पूला आदि ॥ ३० ॥ मच्छीपकडनेका कांटाके सूत्रके संबंधसे तिरती हुई वस्तु, नौका, ( पुं० )
**तित्तिड**—दैत्यभेद, धर्मराजका किंकर ( पुं० ) ॥ ३१ ॥
**तिन्तिडी**—वृक्षभेद, चूका-शाक, इमली-वृक्ष,
**द्राविड**—वेधमुख्य, देशभेदमें उत्पन्न होनेवाला, संख्याभेद (पुं०) ॥३२॥
**निर्गुंडी**—पुष्पभेद, नीलासंभालू, कमलकंद, ( स्त्री० )
**पिचंड**—उदर ( पेट ), पशुका एक अंग, ( पुं० ) ॥ ३३ ॥
**पूत्यंड**—सेही, गन्धमृग, गन्धकीटक ( गंधकीडा ) ( पुं० )
**प्रकांड**—वृक्षकी जडसे शाखाओंतकका भाग, श्रेष्ठ, वृक्ष, ( पुं० न० ) ॥ ३४ ॥
**प्रचंड**—जिसके साथ दुःखसे बर्ताव हो वह, सफेद कनेर, प्रतापी, (पुं०)
**वरंड**—मुखरोग, अन्तरावेदि (भीतरका चौतरा) वृन्द (समूह) (पुं०) ॥३५॥

"Aho Shrutgyanam"

मतो दुष्ठिणि **वार्तण्डो वार्तण्डः** स्याद्विहङ्गमे ।
**वारुण्डी** द्वारपिण्ड्यां स्याद् **वारुण्डः** कर्णदृङ्मले ॥ ३६ ॥
फणिराजेऽथ **वारुण्डः** सेकपात्रेऽपि मुद्गरे ।
**भेरुण्डा** यक्षिणीदेवीभेदयोस्त्रिषु भीषणे ॥ ३७ ॥
**मार्त्तण्ड**स्तु मतश्चण्डकिरणक्रोडयोरयम् ।
**मारण्ड**स्तु भुजङ्गाण्डे पथि गोमयमण्डले ॥ ३८ ॥
**वरण्डा** सारिकाखड्गधेनुवर्त्तिषु वर्त्तते ।
**वितण्डा** वादभेदे स्यात् करवीर्यां शिलाह्वये ॥ ३९ ॥
कच्छीशाके च सा ज्ञेया **शिखण्डो** बर्हिचूडयोः ।
**सपिण्डः** पुंसि दायादे **सपिण्ड**स्तनयेऽपि च ।
**सरण्डः** सरटे धूर्त्ते **सरण्डो** भूषणान्तरे ॥ ४० ॥

डचतुर्थं ।

**आपोगण्ड**स्तु शिशुके विकलाङ्गेऽतिभीरुके ॥ ४१ ॥

---

**वार्तंड**—दुष्टी, पक्षी, ( पुं० )
**वारुंडी**—द्वारपिंडी ( देहली ) (स्त्री०)
**वारुंड**—कान और नेत्रका मल ॥३६॥
नागराज, सींचनेका पात्र, मुद्गर, ( पुं० )
**भेरुंडा**—यक्षिणीभेद, देवीभेद, (स्त्री०) भयंकर ( त्रि० ) ॥ ३७ ॥
**मार्तंड**—सूर्य, सूकर, ( पुं० )
**मारंड**—सर्पका अंडा, मार्ग, गोबरका मंडल, ( पुं० ) ॥ ३८ ॥
**वरंडा**—मैना-पक्षी, खड्ग, गौ, बत्ती, ( स्त्री० )
**वितंडा**—वादभेद, कनेर, शिलाजीत ॥ ३९ ॥ कच्छी—शाक (शाकभेद) ( स्त्री० )
**शिखंड**—मोरपंख, मोरचोटी, (पुं०)
**सपिंड**—हिस्सेदार, पुत्र, ( पुं० )
**सरंड**—गिरगट, धूर्त, आभूषणभेद, ( पुं० ) ॥ ४० ॥

## डचतुर्थं ।

**आपोगंड**—बालक, विकल अंग, बहुत डरपोक, ( पुं० ) ॥ ४१ ॥

"Aho Shrutgyanam"

**चक्रवाडो**ऽद्रिभेदे स्या**च्चक्रवाडं** तु मण्डले ।
**जलरुण्डो** जलावर्त्ते जलरेणुभुजङ्गयोः ॥ ४२ ॥
**देवताडो** बृहद्भानौ स्वर्भानौ घोषकेऽपि च ।
द्वयो**र्वातगुडः** ख्यातो वात्यायां वातशोणिते ॥ ४३ ॥
पिच्छिलास्फोटिकायां च धाममात्रेऽपि दृश्यते ।

इति विश्वलोचने डान्तवर्गः ॥

---

## अथ ढान्तवर्गः ।

ढैकम् ।

स्या**ड् ढकार**स्तु ढक्कायां निर्गुणे विषमध्वनौ ॥ १ ॥

ढद्वितीयम् ।

**गूढं** रहसि गुह्ये च संवृते त्वभिधेयवत् ।
भवे**द्दाढा** तु दंष्ट्रायामिच्छायामप्यथ त्रिषु ॥ २ ॥
स्या**द्दृढः** स्थूलबलिनो**र्दृढं** बाढप्रगाढयोः ।
**माढिः** पत्रादिभङ्गौ स्याद् बलिनां दैन्यदीपने ॥ ३ ॥

---

**[च]क्रवाड**–पर्वतभेद, ( पुं० ) मंडल, ( न० )
**[ज]लरुंड**–जलका भंवर, जलकी रेती, सर्प, ( पुं० ) ॥ ४२ ॥
**[दे]वताड**–अग्नि, राहु, तोरई, (पुं०)
**[वा]तगुड**–वात (वायु) समूह, वातशोणित ( वातरुधिर ), ॥ ४३ ॥ जलझिरतीहुई गूमडी, स्थानमात्र, ( पुं० स्त्री० )
[इस]प्रकार विश्वलोचनकी भाषाटीकामें डांतवर्ग समाप्त हुवा ॥

---

**अथ ढान्तवर्ग ।**

ढैक ।

**ढ(कार)**–ढोल-बाजा, निर्गुण-पुरुष, विषमशब्द, ( पुं० ) ॥ १ ॥

**ढद्वितीय ।**

**गूढ**–एकांत, गुप्त, ढकाहुवा, (त्रि०)
**दाढा**–डाढ, इच्छा ( स्त्री०) ॥ २ ॥
**दृढ**–मोटा, बली, ( त्रि० ) निरंतर, मजबूत ( न० )
**माढि**–स्त्रियोंके मुखआदिका चित्र, बलीके आगे दीनताका दिखाना ( स्त्री० ) ॥ ३ ॥



"Aho Shrutgyanam"

**मूढ**स्तु तन्द्रिते मूर्खे **राढा** स्याद्गुह्यशोभयोः ।
**वाढं** भृशे प्रतिज्ञायां **वोढा** भारिकसूतयोः ॥ ४ ॥
**व्यूढः** पृथुलविन्यस्तसंहतेषु हते त्रिषु ।
**षण्ढो** वृषे वर्षवरे क्लीबे स्याद्वन्ध्यपूरुषे ॥ ५ ॥
वाच्यवन्मर्षणे **सोढा सोढा** शक्तेऽपि वाच्यवत् ।

ढतृतीयम् ।

**अध्यूढ** ईश्वरेऽ**ध्यूढा** कृतसापत्न्ययोषिति ॥ ६ ॥
**आषाढो** व्रतिनां दण्डे मासेऽपि मलयाचले ।
**उदूढ** ऊढे स्थूले स्यादु**पोढो** निकटोढयोः ॥ ७ ॥
**प्रगाढ**स्तु दृढे कृच्छ्रे **प्रमीढो** मूत्रिते घने ।
**प्ररूढो** जाठरे बद्धमूले स्यादभिधेययोः ॥ ८ ॥

---

**मूढ**—तंद्रावाला, मूर्ख ( पुं० )
**राढा**—गुप्त, शोभा, ( स्त्री० )
**वाढ**—अत्यन्त, प्रतिज्ञा, ( न० )
**वोढा**—भारलेजानेवाला, सारथि, ( पुं० ) ॥ ४ ॥
**व्यूढ**—मोटा, स्थापनकियाहुवा, इकट्ठा कियाहुवा, नाशहुवा, ( त्रि० )
**षंढ**—सांडबैल, हिजडा, ( पुं० ) संतानरहित पुरुष ( पुं० ) ॥ ५ ॥
**सोढा**—सहनेवाला-पुरुष, समर्थ, (त्रि०)

**ढतृतीय ।**

**अध्यूढ**—ईश्वर या समर्थ, ( पुं० )
**अध्यूढा**—जिसके कई विवाह हुए हों उसकी पहली स्त्री, ( स्त्री० ) ॥ ६ ॥
**आषाढ**—व्रतियोंका दंड, आषाढमास, मलयाचल-पर्वत, ( पुं० )
**उदूढ**—विवाहाहुवा, स्थूल ( मोटा ) ( पुं० )
**उपोढ**—समीप होनेवाला, विवाहाहुवा, ( पुं० ) ॥ ७ ॥
**प्रगाढ**—दृढ, कष्ट, ( पुं० )
**प्रमीढ**—पेशाब करना, मेघ ( पुं० )
**प्ररूढ**—पेट, जिसकी जड दृढ है वह, नाम ( पुं० ) ॥ ८ ॥

"Aho Shrutgyanam"

**प्रारूढः** सम्बले वह्नौ वस्त्राञ्चलकपाटयोः ।
पञ्जरेऽपि **विगूढस्तु** गुप्तगर्हितयोस्त्रिषु ॥ ९ ॥
**विगूढस्त्रिषु** सञ्जाते वर्द्धिते छुरिते मतः ।
**संमूढस्तु** नवे भुग्ने पुंजितेऽप्यनुपप्लुते ॥ १० ॥
**संरूढो** वाच्यवत्प्रौढे तथैवाङ्कुरितेऽपि च ।

ढचतुर्थम् ।

**अध्यारूढं समारूढोऽत्यधिकेऽपि** त्रिलिङ्गकः ॥ ११ ॥

इति विश्वलोचने ढान्तवर्गः ॥

---

## अथ णान्तवर्गः ।

**णकारो** निर्णये ज्ञाने ।

णद्वितीयम् ।

सूक्ष्मे व्रीह्यन्तरेऽप्य**णुः** ॥
**अणिराणि**वदक्षाग्रकीलसीमास्त्रिषु द्वयोः ॥ १ ॥

---

**प्रारूढ**–खरची, अग्नि, वस्त्रखंड, किंवाड, पींजरा ( पुं० )

**विगूढ**–गुप्त, निंदित, ( त्रि० ) ॥९॥

**विगूढ**–उत्पन्नहुवा, बढाहुवा, अधिक हास, ( पुं० )

**संमूढ**–नवीन, मुडाहुवा, इकट्ठा किया हुवा, नहीं कष्टमें पड़ाहुवा, ( पुं० ) ॥ १० ॥

**संरूढ**–जवान, अंकुरवाला, ( त्रि० )

**ढचतुर्थ ।**

**अध्यारूढ**–अच्छीतरह चढाहुवा, अत्यंत अधिक ( जियादह ), ( त्रि० ) ॥ ११ ॥

इस प्रकार विश्वलोचनकी भाषाटीकामें ढान्तवर्ग समाप्त हुवा ॥

---

### अथ णान्तवर्ग ।

णैक ।

**ण(कार)**–निर्णय, ज्ञान, ( पुं० )

णद्वितीय ।

**अणु**–सूक्ष्म, व्रीहिभेद, ( पुं० )

**अणि–आणि**–धुराका अग्रभाग, कीला, सीम, कोण, (पुं०स्त्री०)॥१॥

"Aho Shrutgyanam"

**उष्णः** स्यादातपे ग्रीष्मे वाच्यवत्तप्तदक्षयोः ।
**ऊर्णा** भ्रूमध्यजावर्त्ते भवेन्मेष्यादिलोम्नि च ॥ २ ॥
पिप्पलीजीरकुम्भीरमक्षिकासु **कणा** स्मृता ।
**कणो**ऽतिसूक्ष्मे धान्यांशे **कर्णः** श्रोत्रे पृथासुते ॥ ३ ॥
सुवर्णालौ च **काणस्तु** मौद्गल्याधिकलोचने ।
**किणस्तु** व्रणे चिह्ने स्यादथ सूक्ष्मव्रणे गुणे ॥ ४ ॥
**कीर्णं** छन्ने परिक्षिप्ते हिंसितेऽप्यभिधेयवत् ।
**कुणिस्तु** कुकरे तुन्ने **कृष्णो** विष्णौ पिकेऽर्जुने ॥ ५ ॥
व्यासे **कृष्णं** तु मरिचे लोहे च त्रिषु तद्वति ।
**कृष्णा** तु द्रौपदीनीलीहारहूरासु पिप्पलौ ॥ ६ ॥
**कोणो**ऽस्त्रौ लगुडे वाद्यप्रभेदे चार्कसम्भवे ।
वीणादिवादनोपायेऽप्येकदेशेऽपि वाच्यवत् ॥ ७ ॥

---

**उष्ण**—धूप, ग्रीष्म-ऋतु, ( पुं० ) तपा हुवा, चतुर, ( त्रि० )

**ऊर्णा**—भ्रुकुटीके बीचका चक्र, भेडी आदिके केश, ( स्त्री० ) ॥ २ ॥

**कणा**—पीपल औषधि, जीरा, जल-जन्तु, सोनामक्खी, ( स्त्री० )

**कण**—अतिसूक्ष्म, धान्यका अंश ( कितनेकदाने ) ( पुं० )

**कर्ण**—कान, कुंतीका पुत्र, सुवर्णालि ( सोनाली-वृक्ष ) (पुं० ) ॥ ३ ॥

**काण**—काग आदिक अर्थात् काणाने नेत्रवाला, ( पुं० )

**किण**—व्रण ( घाव ), चिह्न, सूक्ष्मव्रण, गुण, ( पुं० ) ॥ ४ ॥

**कीर्ण**—ढकाहुवा, तिरस्कार कियाहुवा, माराहुवा, ( त्रि० )

**कुणि**—रोगआदिसे दूषित हाथोंवाला ( टूटा ), ( त्रि० ) तूनवृक्ष, (पुं०)

**कृष्ण**—विष्णु, कोयल, अर्जुन, ॥ ५ ॥ व्यास, ( पुं० ) स्याहमिरच, लोहा ( न० ) स्याहरंगवाला ( त्रि० )

**कृष्णा**—द्रौपदी, नीली, दाख, पिप्पली, ( स्त्री० ) ॥ ६ ॥

**कोण**—कूना, लाठी, बाजाभेद, शनैश्चर, बीणाबजानेका गज, ( पुं० ) किसी द्रव्यका एकदेश ( त्रि० ) ॥ ७ ॥

"Aho Shrutgyanam"

**गणः** समूहे प्रमथे संख्यासैन्यप्रभेदयोः ।
**गुणो** रूपादिसत्त्वादिबिंबादिहरितादिषु ॥ ८ ॥
सूदेऽप्रधाने सन्ध्यादौ रज्जौ मौर्व्यां वृकोदरे ।
**गेष्णुर्नटे** गायने स्याद् **घृणा** कारुण्यनिन्दयोः ॥ ९ ॥
**घ्राणं** घ्राणेऽपि नासायां **चूर्णी** तु स्यात्कपर्दके ।
**चूर्णः** क्षोदे क्षारभेदे **चूर्णानि** गन्धशुक्तिषु ॥ १० ॥
**जर्णः** कलानिधौ वृक्षे **जिष्णुः** पार्थेन्द्रवह्निषु ।
जित्वरे त्रिषु **जीर्णं** तु पक्के वृद्धे जरान्तरे ॥ ११ ॥
**झणिः** पूगे दुष्टदैवश्रुतौ स्त्री कठिनेऽन्यवत् ॥
**तीक्ष्णं** क्षारेऽथ निशिततिग्मात्मत्यागिषु त्रिषु ॥ १२ ॥
निरालस्ये सुबुद्धौ च त्रिषु **तीक्ष्णं** च मुष्कके ।
**तीक्ष्णं** लोहे विषे तिग्मे यवाग्रे लवणे रणे ॥ १३ ॥

---

**गण**–समूह, महादेवकेगण, संख्या, सेनाभेद ( पुं० )
**गुण**–रूप रस आदि, सत्त्व रज आदि, बिंबआदि, ॥ ८ ॥ हरित पीत आदि ( रंग ), रसोइया, मंत्री, सन्ध्याआदि, रस्सी, धनुषकी ज्या, भीमसेन, ( त्रि० )
**गेष्णु**–नट, गानेवाला, ( पुं० )
**घृणा**–दया, निन्दा, ( स्त्री० ) ॥ ९ ॥
**घ्राण**–सूंघाहुवा, नासिका, ( न० )
**चूर्णी**–कौडी, ( स्त्री० )
**चूर्ण**–पीसाहुवा ( आटा आदि ), क्षारभेद, ( पुं० ) गंधवालीशुक्ति ( सीपी ) ( न० ) ॥ १० ॥
**जर्ण**–चंद्रमा, वृक्ष, ( पुं० )
**जिष्णु**–अर्जुन, इन्द्र, अग्नि, ( पुं० ) जीतनेके स्वभाववाला, ( त्रि० )
**जीर्ण**–पक्क, वृद्ध, अतिवृद्ध, ( त्रि० ) ॥ ११ ॥
**झणि**–सुपारी-वृक्ष, दुष्टभाग्यका सुनना, ( स्त्री ) कठिन ( करड़ा ) ( त्रि० )
**तीक्ष्ण**–क्षार, पैना, तीखा, आत्मत्यागी, ( त्रि० ) ॥ १२ ॥ आलस्यरहित, अच्छीबुद्धिवाला,(त्रि०) मोखा-वृक्ष, लोहा, विष, तिग्म ( तीक्ष्ण ), जवाखार, नमक, रण, ( न० ) ॥ १३ ॥

"Aho Shrutgyanam"

**तूणी** नील्यां निषङ्गे ना **तृष्णा** लिप्सापिपासयोः ।
**द्रोणं** तु रक्षिते रक्ष्ये रक्षणत्रायमाणयोः ॥ १४ ॥
**दीर्णं** विदारिते भीते स्फुटितेऽप्यभिधेयवत् ।
**देष्णुर्दा**तरि दुर्दान्ते **द्रुणो** वृश्चिकभृंगयोः ॥ १५ ॥
**द्रुणी** तु कच्छपीद्रोण्योर्**द्रुणं** चापकृपाणयोः ।
**द्रोणस्तु** द्रोणकाके स्यादपि **द्रोणः** कृपीपतौ ॥ १६ ॥
आढकानां चतुष्केपि **द्रोणं** स्यादाढकेऽस्त्रियाम् ।
**द्रोणी** काष्ठाम्बुवाहिन्यां गवां घासभुजिस्थितौ ॥ १७ ॥
काष्ठागारे गिरेः सन्धौ नीवृद्भेदेऽपि दृश्यते ।
**वर्णः** स्वर्णेऽपि रूपेऽपि **पणो** मूल्ये भृतौ ग्लहे ॥ १८ ॥
**पणो**ऽशीतिवराटेऽपि **पणः** कार्षापणे धने ।
द्यूते विक्रय्यशाकादेर्बद्धमुष्टावपि स्मृतः ॥ १९ ॥

---

**तूणी**—नीली औषधि ( स्त्री० ) बाणों-का भाथा, ( पुं० )

**तृष्णा**—वांछा, तृषा (प्यास) (स्त्री०)

**द्रोण**—रक्षाकियाहुवा, रक्षाकरने योग्य, रक्षा, त्रायमान औषधि ( न० ) ॥ १४ ॥

**दीर्ण**—फाडाहुवा, डराहुवा, फूटाहुवा, ( त्रि० )

**देष्णु**—दाता ( देनेवाला ), दुःखसे रोकाहुवा ( पुं० )

**द्रुण**—बीछू, भौंरा ( पुं० ) ॥ १५ ॥

**द्रुणी**—कछवी, छोटी नौका, ( स्त्री० )

**द्रुण**—धनुष, तरवार ( खड्ग ) (न०)

**द्रोण**—काकभेद, द्रोणाचार्य, ( पुं० ) ॥ १६ ॥

**द्रोण**—चार आढक, ( पुं० न० )

**द्रोणी**—डोंडी, गौवोंके घास चरनेकी जगह ॥ १७ ॥ काष्टका स्थान, पर्वतकी संधि, देशभेद, ( स्त्री० )

**वर्ण**—सुवर्ण, रूप, ( पुं० )

**पण**—वस्तुका मोल, नौकरी, जूवामें लगानेका धन, ॥१८॥ ५० कौडी, पैसा, धन, जूवा, बेचनेके शाक आदिकी बाँधीहुई मुट्ठी, ॥ १९ ॥

"Aho Shrutgyanam"

**पणो** द्यूतादिषूत्सृष्टे व्यवहारेऽप्ययं **पणः** ।
**पर्णं** पत्रे पतत्रे च **पर्णः** स्यात्पुंसि किंशुके ॥ २० ॥
**पार्ष्णिश्च**रणमूले ना कुम्भीपाश्चात्त्यभागयोः ।
सेनापृष्ठेऽपि **पार्ष्णिः** स्यात्**पार्ष्णिः** स्यादुन्मदस्त्रियाम् ॥ २१ ॥
समग्रे पूरिते **पूर्ण**स्त्रिषु शक्ते तु पुंस्ययम् ।
**प्राणा** असुष्वथ प्राणे विद्धातेऽप्यनिले बले ॥ २२ ॥
काव्यजीवे च बोले च **प्राणं** तु त्रिषु पूरिते ।
**फाणि**र्गुडे करण्डे च **बाणी** द्यूतौ च वाचि च ॥ २३ ॥
**वाणि**स्तु हारके मूल्ये **भ्रूणः** स्त्रीगर्भडिम्भयोः ।
**मणि**र्द्वयोर्मेहनाग्रे रत्ने छागीगलस्तने ॥ २४ ॥
अलिञ्जरेऽपि मुक्तादौ **मोण**स्तु पटमुत्सके ।
**मोणो** बाणेपि कुम्भीरे मक्षिकाहिकरण्डयोः ॥ २५ ॥

---

**पणो**–जूवा आदिमें लगायाहुवा, व्यवहार ( पुं० )
**पर्ण**–पत्ता, पक्षीकी पर, ( न० )
**पर्ण**–केसू ( पलाशपुष्प ) ( पुं० ) ॥ २० ॥
**पार्ष्णि**– एडी–पाँवकी, ( पुं० ) कायफल,पिछलाभाग,सेनाकी पीठ, मदोन्मत्त स्त्री, ( स्त्री० ) ॥ २१ ॥
**पूर्ण**–संपूर्ण, पूराहुवा, ( त्रि० ) समर्थ, ( पुं० )
**प्राण**–श्वास, ( पुं० ब० ) हृदयमें रहनेवाला वायु, विट्वायु, वायु, बल, ॥ २२ ॥
काव्यजीव (रस), बोल (गंधद्रव्य) ( न० ) पूराहुवा, ( त्रि० )
**फाणि**–गुड, पिटारा, ( पुं० )
**बाणी**–जूवा, बाणी ( वाक् ) (स्त्री०) ॥ २३ ॥
**वाणी**–हार, मोल, ( पुं० )
**भ्रूण**–स्त्रीका गर्भ, बालक, ( पुं० )
**मणि**–लिंगका अग्रभाग, रत्न, बकरीके कंठके स्तन, ॥ २४ ॥ मटका, मोती आदि, ( पुं० स्त्री० )
**मोण**–बाण, नाकू ( जलजंतु ), मक्खी, सर्पकी पिटारी, ( पुं० ) ॥ २५ ॥

"Aho Shrutgyanam"

**रणः** कोणे क्वणे युद्धे **रेणुर्**धूल्यणुपर्प्पटे ।
अथ पुंस्येव **वर्णः** स्यात्स्तुतौ रूपयशोगुणे ॥ २६ ॥

रागे द्विजादौ मुक्तादौ शोभायां चित्रकम्बले ।
व्रते गीतक्रमे देशेऽप्यस्त्री स्याद्वर्णकेऽक्षरे ॥ २७ ॥

**बाणो** बलिसुते काण्डे काण्डांशे केवले पुमान् ।
**बाणो बाणा** च झिंट्यां स्याद् **बाणको** व्यन्तरे क्वचित् ॥२८॥

**विष्णुः** कृष्णे वसौ सूर्ये विष्णुर्न्नारायणार्कयोः ।
वसुर्देवतभेदेऽपि **वीणा** वल्लकिविद्युतोः ॥ २९ ॥

**वृष्णिः** स्याद्यादवे मेषे **वृष्णिः** पाषण्डिचण्डयोः ।
**वेणी** नदीनां सङ्गे स्यात् केशबन्धान्तरेऽपि च ॥ ३० ॥

देवताडेऽपि **वेणी** स्त्री **वेणुर्**वंशे नृपान्तरे ।
**शाणो**र्द्धमाषके कर्षे कषणे करपत्रके ॥ ३१ ॥

---

**रण**–कोण, शब्द, युद्ध, ( पुं० )
**रेणु**–धूलि, बारीक पापड, ( पुं० )
**वर्ण**–स्तुति, रूप, यश, गुण, ॥ २६ ॥ रागभेद, ब्राह्मण आदि, मोती आदि, शोभा, विचित्र कंबल, व्रत, गीतक्रम, देशभेद, रंग, अक्षर, ( पुं० न० ) ॥ २७ ॥
**बाण**–बलिका पुत्र, बाण, बाणका मूल, केवल, ( पुं० )
**बाणा**–कटसरैया-औषधि, ( स्त्री० )
**बाणक**–व्यन्तरदेव ( पुं० ) ॥ २८ ॥
**विष्णु**–कृष्ण, वसु, सूर्य, नारायण, सूर्य, देवभेद, ( पुं० )
**वीणा**– बीणा-बाजा, बिजली, (स्त्री०) ॥ २९ ॥
**वृष्णि**–यादव, मेंढा, पाषंडी, अति क्रोधी, ( पुं० )
**वेणी**–नदियोंका संग, केशबंधभेद, ॥ ३० ॥ देवताड-वृक्ष, ( स्त्री० )
**वेणु**–बाँस-वृक्ष, वेणु-राजा, ( पुं० )
**शाण**–आधामासा, सोलहमासा, कसोटी पत्थर, करोंत (आरा) ॥ ३१ ॥

"Aho Shrutgyanam"

शीतत्राणान्तरे **शाणी शीर्ण**मल्पविशीर्णयोः ।
**शोणो** नदे कोकनदच्छवौ श्योनाकबर्हिषोः ॥ ३२ ॥
लोहिताश्वेऽप्यथ **श्रोणि**र्द्वयोः स्यात्कारुसंहतौ ।
केशपात्रान्तरे **श्रोणिः श्रेणिः** पक्कावनिः स्त्रियाम् ॥ ३३ ॥
**श्राणा** यवाग्वां **श्राणं** तु पक्के स्यादभिधेयवत् ।
**स्थाणुः** कीले हरे पुंसि  स्थाणुस्त्वस्त्री ध्रुवेपि च ॥ ३४ ॥
**स्थूणा** तु स्याद् गृहस्तम्भे लोहप्रतिकृतावपि ।
**क्षणः** स्यादुत्सवे कालभेदावसरपर्वसु ॥ ३५ ॥

णतृतीयम् ।

**अभीक्ष्णं** तु भृशे नित्येऽप्य**रुणो**ऽनूरुसूर्ययोः ।
कुष्ठे चाव्यक्तरागे च सन्ध्यारागे च पुंस्ययम् ॥ ३६ ॥
नीरवाऽऽरक्तकपिलव्याकुलेषु च वाच्यवत् ।
**अरुणा** तिवृताश्यामामञ्जिष्ठाऽतिविषासु च ॥ ३७ ॥

---

**शाणी**–ठंढसे रक्षा करनेवाला पहनने-का वस्त्र ( स्त्री० )

**शीर्ण**–अल्प, गिराहुवा, ( न० )

**शोण**–नद, लालकमलकी छवि, सोना-पाठा, कुशा ॥ ३२ ॥ लालअश्व, (घोडा) ( पुं० )

**श्रोणि**–कारीगरोंका समूह, (पुं०स्त्री०)

**श्राणा**–यवागू, ( स्त्री० )

**श्राण**–पकाहुवा ( त्रि० )

**स्थाणु**–कीला, महादेव, ( पुं० )

**स्थाणु**–ध्रुव, द्रव्य, ( पुं० न० ) ॥ ३४ ॥

**स्थूणा**–घरका स्तंभ, लोहेकी मूर्ति, ( स्त्री० )

**क्षण**–उत्सव, कालभेद, अवकाश, पर्व, ( पुं० ) ॥ ३५ ॥

**णतृतीय** ।

**अभीक्ष्ण**–अत्यंत, नित्य, ( अ० )

**अरुण**–अनूरु ( सूर्यका सारथि ), सूर्य, कुष्ठभेद, थोड़ालाल रंग, संध्यासमयमें आकाशकी लाली, ( पुं० ) ॥ ३६ ॥ शब्दरहित, थोडा लाल कपिल, व्याकुल, (त्रि०)

**अरुणा**–निसोथ, सारिवा, मजीठ, अतीस, ( स्त्री० ) ॥ ३७ ॥

"Aho Shrutgyanam"

**अरणि**स्तु भवेदग्निमन्थे मन्थानदण्डके ।
**इन्द्राणी** तु शचीसिन्दुवारयोः करणे स्त्रियाम् ॥ ३८ ॥
**ईरिणं** तूषरे शून्येऽपीक्ष**णं** दर्शने दृशि ।
**ऊषणा** तु कणायां स्या**दूषणं** मरिचे मतम् ॥ ३९ ॥
**एषणी** व्रणमार्गोऽनुसारिण्यां तु तुलाभिदि ।
**एषणो** लोहबाणे स्यादन्वेषे त्वनुपूर्वकम् ॥ ४० ॥
**कङ्कणं** करभूषायां हस्तसूत्रेऽपि शेखरे ।
**कत्तृणं** तृणभेदेऽपि वारिपर्ण्यां च **कत्तृणम्** ॥ ४१ ॥
**करण**स्तु भवेद्वैश्याच्छुद्रायास्तनुजे पुमान् ।
**करणं** साधकतमे कार्यकायस्थकर्मसु ॥ ४२ ॥
क्रियायामिन्द्रिये क्षेत्रे **करणं** बालवादिषु ।
गीताङ्गहारसंवेशक्रियाभेदेऽपि चेष्यते ॥ ४३ ॥

---

**अरणि**–अरङूवृक्ष, मथनेकी डंडा, ( स्त्री० )
**इंद्राणी**–इंद्राणी ( इंद्रकी स्त्री ), सिम्हालू-वृक्ष, स्त्रियोंका-करण हाव-आदि ( स्त्री० ) ॥ ३८ ॥
**ईरिण**–ऊषर (जहां बीज नहीं उपजे), शून्य ( सूना ) ( न० )
**ईक्षण**–दर्शन (देखना), नेत्र, (न०)
**ऊषणा**–पीपल, ( स्त्री० )
**ऊषण**–स्याहमिरच, ( न० ) ॥३९॥
**एषणी**–व्रणछिद्रमें देनेकी सलाई, काँटा-तोलनेका ( स्त्री० )
**एषण**–लोहेका बाण,
**अन्वेषण**–ढूँढना, ( पुं० ) ॥ ४० ॥
**कंकण**–हाथका आभूषण ( कंगन ), हाथका सूत्र ( रक्षासूत्र ), शिखामें धारणकीहुई माला, ( न० )
**कत्तृण**–तृणभेद, पिठवन, ( न० ) ॥ ४१ ॥
**करण**–वैश्यसे उत्पन्नहुवा शूद्रीका पुत्र, ( पुं० )
**करण**–क्रियाको सिद्धकरनेवाला (बाण आदि ), कार्य, कायस्थ ( शरीरमें स्थित ), कर्म ॥ ४२ ॥ क्रिया, इंद्रिय, क्षेत्र, बालव आदि-करण, गाना, भावबताना, सोना क्रियाका भेद ॥ ४३ ॥

"Aho Shrutgyanam"

**करुण**स्तु रसे वृक्षे कृपायां **करुणा** स्त्रियाम् ।
**करेणु**स्तु वसायां स्त्री कर्णिकारेभयोः पुमान् ॥ ४४ ॥
**कल्याण**मक्षयस्वर्गे मङ्गले तद्वति त्रिषु ।
स्यान्मानदण्डपणयोश्चतुर्थांशे हि **काकिणी** ॥ ४५ ॥
गुञ्जायां वाटमात्रेऽपि कुष्ठभेदेऽपि काकणे ।
**कारणं** हेतुवधयोः पीडायां करणेऽपि च ॥ ४६ ॥
**कारणा** यातनायां स्यात्**कार्मणं** स्यात्तु कर्मठे ।
परदेहप्रवेशे च योजने मंत्रतन्त्रयोः ॥ ४७ ॥
भृत्ये कर्तरि **कुर्वाणः** **कृपणः** कुत्सिते कृमौ ।
खड्गे **कृपाणः** शस्त्री तु **कृपाणी** कर्त्तरावपि ॥ ४८ ॥
**कोङ्कणो** देशभेदे स्यादस्त्रभेदे तु **कोङ्कणम्** ।
**गोकर्णो**ऽश्वतरे सर्पमृगभेदे गणान्तरे ॥ ४९ ॥

---

**करुण**–रस, वृक्ष, ( पुं० )
**करुणा**–कृपा, ( स्त्री० )
**करेणु**–वसा (चर्मके नीचे श्वेतभाग), ( स्त्री० ) पुष्पकी कर्णिका, हस्ती, ( पुं० ) ॥ ४४ ॥
**कल्याण**–अक्षयस्वर्ग ( मोक्ष ), मंगल, ( न० ) मंगलवाली वस्तु ( त्रि० )
**काकिणी**–मान ( प्रमाण )के दंडका चौथा भाग, पैसाका चौथा भाग, रत्ती-प्रमाण, वाटमात्र, कुष्ठभेद, काकण, ( स्त्री० ) ॥ ४५ ॥
**कारण**–हेतु, वध (मारना,) पीडा, करण ॥ ४६ ॥
**कारणा**–तीव्रपीडा, ( स्त्री० )
**कार्मण**–कर्मकराने वाला, परशरीरमें प्रवेश, तंत्र मंत्र का योजन करना, ( न० ) ॥ ४७ ॥
**कुर्वाण**–भृत्य ( नौकर ), करनेवाला, ( पुं० )
**कृपण**–निंदित, (कृमि–कीडा) (पुं०)
**कृपाण**–खड्ग, ( पुं० )
**कृपाणी**–छुरी, कतरनी ( कैंची ) ( स्त्री० ) ॥ ४८ ॥
**कोंकण**–देशभेद, ( पुं० ) अस्त्रभेद, ( न० )
**गोकर्ण**–खिच्चर, सर्पभेद, मृगभेद, गणभेद ॥ ४९ ॥

"Aho Shrutgyanam"

अङ्गुष्ठाऽनामिकोन्माने **गोकर्णी** मूर्विकौषधी ।
**ग्रहणं** तूपलब्धौ स्यात्स्वीकारादरयोः करे ॥ ५० ॥
ग्रहोपरागे बन्द्यां च प्रत्याये ग्रहणीरुजि ।
**ग्रामणीर्**नापिते पुंसि श्रेष्ठाऽधिपे च भौगिके ॥ ५१ ॥
त्रिषु स्त्रियां तु गणिका **ग्रामिणी** नीलिका स्त्रियाम् ।
**चरणो**ऽस्त्री बह्वृचादौ मूलेऽपि पदगोत्रयोः ॥ ५२ ॥
**चरणं** भ्रमणेक्लीबस्या **चरणं** भक्षणेऽपि च ।
**जरणं जीरणो**ऽजाजीहिङ्गुसौवर्चले मतम् ॥ ५३ ॥
**तरणिः** सूर्येऽपि तरणे कुमारीनौकयोः स्त्रियाम् ।
**तरुणो** यूनि नवके कुब्जपुष्योरुबूकयोः ॥ ५४ ॥
**दक्षिणः** सरलावामपरच्छन्दानुवर्त्तिषु ।
त्रिषु स्याद्वाच्यलिङ्गोऽयमवाची संभवे मतः ॥ ५५ ॥

---

अंगूठा और अनामिका उंगलीके फैलानेसे उन्मान, ( पुं० )

**गोकर्णी**—मरोरफली, ( स्त्री० )

**ग्रहण**—प्राप्ति, अंगीकार, आदर, हाथ ॥ ५० ॥ ग्रहण-सूर्यचंद्रका, बंदी, प्रत्याय ( निश्चय कराना ) ( न० )

**ग्रहणी**—संग्रहणी-रोग ( स्त्री० )

**ग्रामणी**—नाई ( पुं० ) श्रेष्ठ, अधिप, भोगनेवाला, ( त्रि० ) ॥ ५१ ॥

**ग्रामिणी**—गणिका, नीली-औषधि, ( स्त्री० )

**चरण**—बह्वृचआदि, मूल, पाँव, गोत्र, ( पुं. न० ) ॥ ५२ ॥

**चरण**—भ्रमण करना, पाँव, भक्षण करना, ( न० )

**जरण**—( न० ) **जीरण** ( पुं० )जीरा, हींग, स्याहनमक, ॥ ५३ ॥

**तरणि**—सूर्य, जमीकंद, ( पुं० ) घी-कुँवार-औषधि, नाव, ( स्त्री० )

**तरुण**—जवान पुरुष, नवीन, कूजावृ-क्षका पुष्प, अरंड-वृक्ष (पुं०)॥५४॥

**दक्षिण**—सरल, दहना हाथ आदि, दूसरेकी इच्छाके अनुकूल, दक्षिण-दिशामें होनेवाला, ( त्रि० )॥५५॥

"Aho Shrutgyanam"

यज्ञदानप्रतिष्ठायामवाच्यामपि **दक्षिणा** ।
**दुर्वर्णं** वालुके रूप्ये **द्रविणं** स्यात्पराक्रमे ॥ ५६ ॥
**धरणं** धारणे मानभेदेऽपि **धरणी** क्षितौ ।
**धरुणः** सलिले स्वर्गे **धरुणः** परमेष्ठिनि ॥ ५७ ॥
**धर्म्मणः** सर्पभेदेपि **धर्म्मणः** पादपान्तरे ।
**धर्षणी** कुलटायां स्याद् **धर्षणं** गञ्जिते रते ॥ ५८ ॥
बुद्धोक्तमन्त्रभेदे च नाटिकायां च **धारणी** ।
**धिषणस्तु** सुराचार्ये **धिषणा** बुद्धिनिद्रयोः ॥ ५९ ॥
**निर्माणो** निर्मितौ सारे रचनायां समञ्जसे ।
**निर्याणं** निर्गमे मोक्षे गजापाङ्गे च तद्द्वयोः ॥ ६० ॥
**निर्वाणं** निर्वृतौ मोक्षे स्तम्भने गजमज्जने ।
**निश्रेणिरधिरोहिण्यां** खर्जूरीपादपे स्त्रियाम् ॥ ६१ ॥

---

**दक्षिणा**–यज्ञदानकी प्रतिष्ठामें द्रव्य-देना, दक्षिण-दिशा, ( स्त्री० )
**दुर्वर्ण**–एलुवा-औषधि, चाँदी, (न०)
**द्रविण**–पराक्रम, ( न० ) ॥ ५६ ॥
**धरण**–धारण करना, मानभेद, (न०)
**धरणी**–पृथ्वी, ( स्त्री० )
**धरुण**–जल, स्वर्ग, ब्रह्मा, (पुं०)॥५७॥
**धर्मण**–सर्पभेद, वृक्षभेद, ( पुं० )
**धर्षणी**–कुलटा स्त्री, ( स्त्री० )
**धर्षण**–निरादर, मैथुन ( स्त्रीसंग ) ( न० ) ॥ ५८ ॥
**धारणी**–बुद्धका कहाहुवा मंत्रभेद, एकप्रकारका नाटक, ( स्त्री० )
**धिषण**–बृहस्पति ( पुं० )
**धिषणा**–बुद्धि, निद्रा, (स्त्री०)॥५९॥
**निर्माण**–बनाना, सार, रचना, उचित ( मुनासिब ) ( पुं० )
**निर्याण**–निकसना, मोक्ष, हस्तीके-नेत्रका कोया, ( पुं०न० )॥ ६० ॥
**निर्वाण**–आनंद, मोक्ष, थाँभना, हस्तीका मंजन ( स्नान ) ( न० )
**निश्रेणि**–सीढी, खजूरका वृक्ष, ( स्त्री० )॥ ६१ ॥

"Aho Shrutgyanam"

**पत्रोर्णं** धौतकौशेये **पत्रोर्णः** शोणकद्रुमे ।
**पुराणं** चिरकालीयद्रव्ये स्यादभिधेयवत् ॥ ६२ ॥
**पूरणः** पूरके पुंसि पूरणे पिष्टकान्तरे ।
**पूरणी** शाल्मलीवस्त्रारम्भसूत्रान्तरेऽपि च ॥ ६३ ॥
**प्रघण**स्ताम्रकुण्डे स्यादलिन्दे लोहमुद्गरे ।
**प्रमाण**मेकतेयत्ताहेतियन्तृप्रमातृषु ॥ ६४ ॥
सत्यवादिनि नित्ये च मर्यादाहन्तृशास्त्रयोः ।
**प्रवणः** प्रगुणे प्रह्वे क्रमनिम्नःक्षितौ कृशे । ॥ ६५ ॥
एतेषु त्रिषु पुंस्येव **प्रवणः** स्याच्चतुष्पथे ।
**प्रवेणिः** स्त्री कुथे वेण्यां **प्रोक्षणं** वधसेकयोः ॥ ६६ ॥
**वरण**स्तिक्तशाकेऽपि प्राकारे **वरणं** वृतौ ।
**वरुण**स्तरुभेदे स्यात् प्रचेतःसूर्यवारिषु ॥ ६७ ॥

---

**पत्रोर्ण**–धोयाहुवा रेशमी वस्त्र, (न०)
**पत्रोर्ण**–सोनापाठा-वृक्ष ( पुं० )
**पुराण**–बहुतकालका द्रव्य,(त्रि०) ६२
**पूरण**–पूरण करनेवाला या प्राणायामभेद, पूरित करना, पीठीका भेद (पुं०)
**पूरणी**-सालवृक्ष, वस्त्र बुननेकेलिये फैलायाहुवा सूत्र, (स्त्री०) ॥६३॥
**प्रघण**–ताँबेका कुंड , द्वारकी चौखट, लेहेका मुद्गर ( पु० )
**प्रमाण**–एकता, इयत्ता ( प्रमाण ), शस्त्र या अग्निज्वाला, सारथि, प्रमाण करनेवाला ॥ ६४ ॥ सत्यवचनबोलनेवाला, नित्य, मर्यादाका नष्टकरनेवाला, शास्त्र, ॥
**प्रवण**–सीधा, नम्र, क्रमसेनीची पृथ्वी, दुबला, ( त्रि० ) ॥ ६५ ॥ चुरा हा( चौपटरास्ता ) ( पुं० )
**प्रवेणि**–हस्तीकी झूल या कुशा,वेणी ( गुँथेहुएकेश, ) ( स्त्री० )
**प्रोक्षण**–मारना, सींचना (न०)॥६६॥
**वरण**–पत्रसुंदरशाक, ( बंगभाषागिमा ), प्राकार, (किला) ( पुं० )
**वरण**–वरणकरना, ( न० )
**वरुण**–वृक्षभेद ( बरना ), वरुण-देव, सूर्य, जल, ( पुं० ) ॥ ६७ ॥

"Aho Shrutgyanam"

**वारणो** दन्तिनि ख्यातः प्रतिषेधे तु **वारणम्** ।
अथ प्रतीचीमदिरागण्डदूर्वासु **वारुणी** ॥ ६८ ॥
**ब्राह्मणी** फञ्जिकासृक्काद्विजपत्नीष्वथ द्विजे ।
**ब्राह्मणो ब्राह्मणं** मन्त्रभेदेऽपि द्विजसंहतौ ॥ ६९ ॥
**भरणी** शोणके ऋक्षे **भरणं** वेतने भृतौ ।
**भीषणो** दारुणे गाढे **भीषणं** सल्लकीरसे ॥ ७० ॥
कारुण्ड्यामीश्वरक्रीडाभ्रमणे **भ्रमणी** स्त्रीयाम् ।
**मार्गणो** याचके बाणे क्लीबमन्वेषयाच्ञयोः ॥ ७१ ॥
**यन्त्रणं** स्यान्नियमने बन्धने रक्षणेऽपि च ।
पटोलमूले **रमणं रमणस्तु** प्रिये स्मरे ॥ ७२ ॥
**रवणो** रासभे शब्दे **रोषाणो** रोषणे त्रिषु ।
पारदोषरयोः स्वर्णघर्षणेऽपि पुमानयम् ॥ ७३ ॥

---

**वारण**–हस्ती ( पुं० )
**वारण**–निषेध करना (वर्जना) (न०)
**वारुणी**–पश्चिमदिशा, मदिरा, गांडर-दूब, ( स्त्री० ) ॥ ६८ ॥
**ब्राह्मणी**–भारंगी या देवताड-वृक्ष, होठोंका जोड़ ( गलाफू ), ब्राह्मण-की स्त्री, ( स्त्री० )
**ब्राह्मण**–ब्राह्मण-जाति, ( पुं० ) मंत्र-भेद, ब्राह्मणोंका समूह, (न०)॥६९॥
**भरणी**–सोनापाठा-वृक्ष, भरणी-नक्षत्र, ( स्त्री० )
**भरण**–मजूरी, पोषणकरना, ( न० )
**भीषण**–भयंकर, कठोर, दृढ, (त्रि०) सेह-प्राणी, सालवृक्षका रस, (पुं०) ॥ ७० ॥
**भ्रमणी**–जलौका ( जोक ), ईश्वर-क्रीडा, भ्रमण, ( स्त्री० )
**मार्गण**–याचनाकरनेवाला, बाण, (पुं०) ढूँढना, याचना, (न०) ॥७१॥
**यंत्रण**–वशमेंकरना, बाँधना, रक्षा-करना, ( न० )
**रमण**–परवलकी जड, ( न० )
**रमण**–प्रिय (पति), कामदेव, (पुं०) ॥ ७२ ॥
**रवण**–गधा, शब्द, ( पुं० )
**रोषाण**–क्रोधी. ( त्रि० ) पारा, ऊ-षर-भूमि, कसौटी, (पुं०) ॥ ७३ ॥

"Aho Shrutgyanam"

**रोहिणी** कटुरोहिण्यां लोहितासोमवल्कयोः ।
गोनागकर्णरुग्भेदे **लवणं** तु द्विजान्तरे ॥ ७४ ॥
**लवणो** रसरक्षोऽब्धिभेदेषु **लवणा** द्युतौ ।
**लक्षणं** नाम्नि चिह्ने च रामभ्रातरि **लक्षणः** ॥ ७५ ॥
**लक्ष्मणः** पुंसि सौमित्रौ **लक्ष्मणं** नामलक्ष्मणोः ।
**लक्ष्मणा** सारसीज्योतिष्मत्योः श्रीमति वाच्यवत् ॥ ७६ ॥
**विपणिस्तु** स्त्रियां पण्यवीथ्यामापणपण्ययोः ।
**विषाणं** तु पशोः शृङ्गे **विषाणं** द्विरददन्तयोः ॥ ७७ ॥
त्रिषु त्रिषु **विषाणी** तु मेषशृङ्गाख्यभेषजे ।
**शरणं** गृहरक्षित्रोः **शरणं** रक्षणे वधे ॥ ७८ ॥
**सिङ्घाणं** काचपात्रेऽपि नासिकालोहकिट्टयोः ।
**श्रावणो** मासि पाषण्डे दध्यान्यां **श्रावणा** स्त्रियाम् ॥ ७९ ॥

---

**रोहिणी**—कुटकी, लालसांठी, करंजुवा या रीठा, गौ, लालअरंड, एक प्रकारका रोग, ( स्त्री० )
**लवण**—जलपृथ्वीके संयोगसे पैदा होनेवाला, ॥ ७४ ॥
**लवण**—रस-भेद, राक्षस भेद, समुद्र भेद, ( पुं० )
**लवणा**—कांति ( स्त्री० )
**लक्षण**—*नाम, चिह्न, ( न० ) राम-भ्राता ( लक्ष्मण ) ( पुं० )* ॥७५॥
**लक्ष्मण**—सुमित्राका पुत्र ( लक्ष्मण ) ( पुं० ) नाम, चिह्न, ( न० )
**लक्ष्मणा**—सारसी-पक्षी ( सारसकी स्त्री ), मालकांगनी, ( स्त्री० ) संपत्तिवाला, ( त्रि० ) ॥ ७६ ॥
**विपणि**—बाजार, हाट, दूकान, ( स्त्री० )
**विषाण**—पशुके सींग, हाथीके दांत, ( त्रि० ) ॥ ७७ ॥
**विषाणी**—मेढासींगी-औषधि ( स्त्री० )
**शरण**—घर, रक्षाकरनेवाला, रक्षा, मारना, ( न० ) ॥ ७८ ॥
**सिङ्घाण**—काचका पात्र, नासिकाका मल, लोहेका मल, ( न० ॥
**श्रावण**—श्रावण-मास, पाषंड, ( पुं० )
**श्रावणा**—दधियू-वृक्ष, ( स्त्री० ) ॥७९॥

"Aho Shrutgyanam"

**श्रीपर्णी** कुम्भिगम्भार्यो क्लीबं पद्माग्निमन्थयोः ।
**सङ्कीर्णं** सङ्कटेऽशुद्धे **सरणिः** श्रेणिवर्त्मनोः ॥ ८० ॥
**सारणो** रावणाऽमात्येऽप्यतीसारेऽपि **सारणः** ।
**सारणी** स्वल्पसरिति प्रसारण्यां च **सारणी** ॥ ८१ ॥
**सुपर्णः** स्वर्णचूडेऽपि गरुडे कृतमालके ।
**सुपर्णा** कमलिन्यां च **सुपर्णा** तार्क्ष्यमातरि ॥ ८२ ॥
**सुवर्णस्तु** सुवर्णालौ कृष्णाऽगुरुमखान्तरे ।
**सुवर्णं** वर्णितं स्वर्णे **सुवर्णं** कर्षवित्तयोः ॥ ८३ ॥
**सुषेणो** हरिसुग्रीववैद्ययोः करमर्दके ।
**हरणं** यौतकद्रव्येऽप्यङ्गरागे भुजे हृतौ ॥ ८४ ॥
**हरिणस्तु** मृगे पुंसि **हरिणः** पाण्डुरेऽन्यवत् ।
**हरिणी** हरितामृग्योर्वृत्तस्त्रीभेदयोरपि ॥ ८५ ॥

---

**श्रीपर्णी**–गूगल-वृक्ष, कंभारी या कुंभेर-वृक्ष, ( स्त्री० )
**श्रीपर्ण**–कमल, अरणी-वृक्ष, ( न० )
**संकीर्ण**–संकट ( सकडा-भीडा ), अशुद्ध, ( न० ),
**सरणि**–पंक्ति, मार्ग ( स्त्री० ) ॥८०॥
**सारण**–रावणका मंत्री, अतीसार-रोग, ( पुं० )
**सारणी**–छोटी नदी, पसरनं या छुइ मुइ, ( स्त्री० ) ॥ ८१ ॥
**सुपर्ण**–स्वर्णचूड-पक्षी, गरुड, अमलतास-वृक्ष, ( पुं० ॥
**सुपर्णा**–कमलिनी (कमोदनी), गरुडकी माता, ( स्त्री० ) ॥ ८२ ॥
**सुवर्ण**–हेमपुष्पी या सोनाली-स्याह अगर-वृक्ष, यज्ञभेद, ( पुं० )
**सुवर्ण**–सोना, कर्ष ( सोलहमासा ), द्रव्य, ( न० ) ॥ ८३ ॥
**सुषेण**–विष्णु, सुग्रीववैद्य, करौंदा-वृक्ष, ( पुं० )
**हरण**–वरवधूको देनेका द्रव्य, अंगराग, भुज, हरना, ( न० ) ॥८४॥
**हरिण**–मृग, ( पुं० ) पाण्डुर ( श्वेत-रंग ) ( त्रि० )
**हरिणी**–हरितरंगवाली, मृगी, छंदभेद, स्त्रीभेद, ॥ ८५ ॥



"Aho Shrutgyanam"

सुवर्णप्रतिमायां च **हर्षणस्तु** प्रमोदके ।
अक्षिरोगान्तरे योगान्तरेऽपि श्राद्धदैवते ॥ ८६ ॥
स्त्री कुलस्त्रीरेणुकयोः **हरेणुर्ना** सतीनके ।
**हिरणं** च **हरिण्यं** च वराटे स्वर्णरेतसोः ॥ ८७ ॥
**क्षेपणी** च भवेन्नौकादण्डे जालान्तरेऽपि च ।

णचतुर्थम्

**अङ्गारिणी** हसन्त्यां स्याद् भास्करत्यक्तदिश्यपि ॥ ८८ ॥
**आतर्पणं** तु सौहित्ये मङ्गलालेपनेऽपि च ।
**आथर्वणस्त्वथर्वज्ञद्विजन्मनि** पुरोहिते ॥ ८९ ॥
**आरोहणं** तु सोपाने समारोहप्ररोहयोः ।
**उत्क्षेपणं** तु व्यजने धान्यमर्दनवस्तुनि ॥ ९० ॥
वान्तोन्मूलननिस्तारोन्नयेषू**द्धरणं** मतम् ।
अथ **कामगुणो** रागेऽप्याभोगे विषयेऽपि च ॥ ९१ ॥

---

सुवर्णकी मूर्ति,( स्त्री० )
**हर्षण**–आनन्द, नेत्ररोगविशेष, हर्षण-योग, श्राद्धदैवत ( धर्मराज ) ( पुं० ) ॥ ८६ ॥
**हरेणु**–कुलकी स्त्री, रेणुका औषधि, ( स्त्री० ) मटर-अन्न ( पुं० )
**हिरण-हिरण्य**–कौडी, सुवर्ण, वीर्य, ( न० ) ॥ ८७ ॥
**क्षेपणी**–नौकादंड, जालभेद, (स्त्री०)

**णचतुर्थ ।**

**अंगारिणी**–सिगडी, सूर्यकी त्यागीहुई दिशा, ( स्त्री० ) ॥ ८८ ॥
**आतर्पण**–तृप्ति, मंगलद्रव्यका लीपना ( न० )
**आथर्वण**–अथर्ववेदका जाननेवाला ब्राह्मण, पुरोहित, ( पुं० ) ॥८९॥
**आरोहण**–सीढी, चढना, बीजआदिकी उत्पत्ति, ( न० )
**उत्क्षेपण**–पंखा, धान्यको मर्दनकरनेवाली वस्तु, ( न० ) ॥ ९० ॥
**उद्धरण**–छर्द, उखाडना, उद्धार, ऊपरप्राप्तकरना, ( न० )
**कामगुण**–राग ( रति ), आभोग ( परिपूर्णता ), विषय, (पुं) ॥९१॥

"Aho Shrutgyanam"

**कार्षापणः** पुराणे स्यादस्त्रियामपि कार्षिके ।
**चीर्णपर्णस्तु** खर्जूरीपादपे पिचुमर्दके ॥ ९२ ॥

**चूडामणिः** शिरोरत्ने काकचिञ्चाफलेऽपि च ।
**जुहुराणो**ऽनलेऽध्वर्यौ **तण्डुरीणस्तु** कीटके ॥ ९३ ॥

स्यात्तन्दुलोदके चैव याम्यदेशीयबर्बरे ।
**तैलपर्णी** मलयजे सिह्लश्रीवासयोरपि ॥ ९४ ॥

**दाक्षायणी** च दुर्गायां रोहिण्यां तारकासु च ।
**देवमणिः** शिवे वाजिकण्ठावर्त्ते च कौस्तुभे ॥ ९५ ॥

**नारायणो**ऽच्युतेऽभीरुगौर्यो**र्नारायणी** स्त्रियाम् ।
गले **निगरणः** पुंसि भोजने तु नपुंसकम् ॥ ९६ ॥

**निरूपणं** विचारे स्यादालोकननिदर्शने ।
**निस्तरणं** स्यान्निस्तारेऽप्युपाये निर्गमेऽपि च ॥ ९७ ॥

---

**कार्षापण**–पुराना, रुपया, ( पुं० न० )

**चीर्णपर्ण**–खजूरका वृक्ष, नींबका वृक्ष, ( पुं० ) ॥ ९२ )

**चूडामणि**–शिरपरधारनेका रत्न, गुञ्जा-फल, ( घुंघुची ) ( पुं० )

**जुहूराण**–अग्नि, अध्वर्यु ( यज्ञकर्ममें वराहुवा एक ब्राह्मण ) ( पुं० )

**तण्डुरीण**–कीटमात्र, ॥ ९३ ॥ चावलोंका जल, दक्षिण देशका बोल ( द्रव्य ) ( पुं० )

**तैलपर्णी**–चंदन, हींग, देवदारकी धूप, ( स्त्री० ) ॥ ९४ ॥

**दाक्षायणी**–दुर्गा, रोहिणी, तारा, ( स्त्री० )

**देवमणि**–महादेव, घोडेके कंठकी भौंरी, कौस्तुभ-मणि, (पुं०)॥९५॥

**नारायण**–विष्णु, (पुं०)

**नारायणी**–सतावर-औषधि, पार्वती, ( स्त्री० )

**निगरण**–गल ( कंठ ) (पुं०) भोजन, ( न० )॥ ९६ ॥

**निरूपण**–विचार, देखना, दिखाना, ( न० )

**निस्तरण**–उद्धार, उपाय, निकलना, ( न० ) ॥ ९७ ॥

"Aho Shrutgyanam"

**निस्सरणं** द्वारमुक्तिनिर्याणोपायमृत्युषु ।
**परीरणः** स्यात्कमठे दण्डे च पट्टशाटके ॥ ९८ ॥

**पर्वरीणस्**तु पर्णस्य शिरायां धूतकम्बले ।
पर्णवृन्तरसेऽपि स्यात् सितसौरभपर्वणोः ॥ ९९ ॥

**परवाणिस्**तु कथितो धर्माऽध्यक्षेऽपि वत्सरे ।
त्रिषु स्यात्तत्परेऽभीष्टेऽप्याश्रये तु **परायणम्** ॥ १०० ॥

**पारायणं** पारगतौ सम्यगासङ्गकात्स्न्र्ययोः ।
**पीलुपर्णी** तु मूर्वायां बिम्बायामोषधीभिदि ॥ १०१ ॥

**पुष्करिणी** सरोजिन्यां हस्तिन्यां च जलाशये ।
स्यात्**प्रतिपणः** संस्कारेऽप्युपग्रहनिषङ्गयोः ॥ १०२ ॥

**प्रवारणं** निषेधे स्यात् काम्यदाने **प्रवारणम्** ।
वारबाणस्तु कवचे सर्वसन्नहनेऽपि च ॥ १०३ ॥

---

**निस्सरण**—दरवाजा, मुक्ति, निकलना, उपाय, मृत्यु, ( न० )
**परीरण**—कछुवा, छडी, पाटकी साडी या धोती ( पुं० ) ॥ ९८ ॥
**पर्वरीण**—पत्तेकी नसैं, जूवाका कंबल, पत्तोंके नाकुवोंका रस, सफेद बोल औषधि, पर्व ( पोरी ) ( पुं० ) ॥ ९९ ॥
**परवाणि**—धर्मका अध्यक्ष ( स्वामी ), संवत्सर ( पुं० )
**परायण**—तत्पर, वांछित, आश्रय, ( त्रि० ) ॥ १०० ॥
**पारायण**—पारगति ( पारगमन ), अच्छीतरह संग, संपूर्णता ( न० )
**पीलुपर्णी**—मूर या मोरबेल, चुरनहार, मरोरफली, औषधीभेद ( स्त्री० ) ॥ १०१ ॥
**पुष्करिणी**—कमलिनी ( कमोदनी ), हस्तिनी, सरोवर, ( स्त्री० )
**प्रतिपण**—संस्कार, उपग्रह, बाणोंका तरकस ( पुं० ) ॥ १०२ ॥
**प्रवारण**—वर्जना, यथेच्छदान, (न०)
**वारबाण**—कवच, अँगरखा, ( पुं० ) ॥ १०३ ॥

"Aho Shrutgyanam"

**मीनाम्रीणो** मतः पुंसि दर्दराम्रेऽपि खञ्जने ।
**रक्तरेणुस्तु** सिन्दूरे पलाशकलिकोद्भवे ॥ १०४ ॥

**रागचूर्णः** स्मरे रक्तवालुके दन्तधावने ।
**रेरिहाणः** पशुपतौ **रेरिहाणो** विहायसि ॥ १०५ ॥

**लम्बकर्णो** मतश्छागे स्यादङ्कोरमहीरुहे ।
अस्त्री **विदारणं** युद्धे भेदने च विडम्बने ॥ १०६ ॥

भवेद्वै**तरणी** प्रेतनद्यां राक्षसमातरि ।
**शरवाणिः** शरमुखे पापिष्ठे शरजीविनि ॥ १०७ ॥

स्त्रियां **शिखरिणी** वृत्तभेदे तक्रप्रभेदयोः ।
स्त्रीरत्ने मल्लिकायां च रोमावल्यामपि स्मृता ॥ १०८ ॥

**समीरणः** स्यात्पवने प्रस्थपुष्पकपान्थयोः ।
**संसरणं** स्यात्संसारे पुरनिर्गमगोपुरे ॥ १०९ ॥

---

**मीनाम्रीण**–दर्दराम्र-वृक्ष, खंजन-पक्षी, ( पुं० )

**रक्तरेणु**–सिंदूर, ढाकके फूलकी कली, ( पुं० ) ॥ १०४ ॥

**रागचूर्ण**–कामदेव, लालबालू, दांतोंका मंजन ( पुं० )

**रेरिहाण**–महादेव, आकाश ( पुं० ) ॥ १०५ ॥

**लंबकर्ण**–बकरा, पिस्ताका-वृक्ष,(पुं०)

**विदारण**–युद्ध, फाडना, निरादरकरना ( न० ) ॥ १०६ ॥

**वैतरणी**–प्रेतनदी, राक्षसमाता, ( स्त्री० )

**शरवाणि**–शर बाणका मुख, पापी, बाणबनानेवाला, (पुं०) ॥ १०७ ॥

**शिखरिणी**–छंदभेद, तक्रभेद, स्त्रीरत्न, मल्लिका ( कुडावृक्ष ), रोमावली, ( स्त्री० ) ॥ १०८ ॥

**समीरण**–वायु, मरुवा, पांथ (बटेऊ) ( पुं० )

**संसरणं**–संसारपुरसे निकलना, पुरदरवाजा, ॥ १०९ ॥

"Aho Shrutgyanam"

घण्टापथे रणारम्भेऽप्यसंबाधचमूगतौ ।
**हस्तिकर्णो**ऽयमेरण्डे पलाशगणभेदयोः ॥ ११० ॥

णपंचमम् ।

**अवग्रहण**माख्यातं प्रतिरोधेऽप्यनादरे ।
अथाऽ**वतारणं** भूताद्यावेशेप्यम्बरेऽर्चने ॥ १११ ॥
आख्येयभागेऽध्याहारग्रन्थे स्याद**वतारणा** ।
निन्दोपालम्भनियमाऽऽलापेषु **परिभाषणम्** ॥ ११२ ॥
**प्रविदारण**मित्येतत्सम्मतं दारणे रणे ।
**मण्डूकपर्णः** स्योनाकेऽप्यलके च कपीतने ॥ ११३ ॥
**मण्डूकपर्णी** मञ्जिष्ठाब्राह्मीगोजिह्विकास्वपि ।
स्या**न्मत्तवारणः** पुंसि मददुर्दान्तवारणे ॥ ११४ ॥
क्लीबं प्रासादवीथीनां वरण्डे चाप्यपाश्रये ।
विभीतकतरौ पुंसि रोमाञ्चे **रोमहर्षणम्** ॥ ११५ ॥

---

राजमार्ग, रणका आरंभ, नहींरुकनेवाली सेनाकी गति, (न०)
**हस्तिकर्ण**–अरंड, ढाक, गणभेद, ( पुं० ) ॥ ११० ॥

**णपंचम ।**

**अवग्रहण**–रोकना, अनादर, (न०)
**अवतारण**–भूतआदिका प्रवेश, वस्त्र, पूजन, ( न० ) ॥ १११ ॥
**अवतारणा**–कहनेयोग्य भाग, अध्याहारकियाहुवा ग्रंथ, (स्त्री०)
**परिभाषण**–निंदासहित उलाहना, नियम, संभाषण, (न०) ॥११२॥
**प्रविदारण**–विदीर्णकरना, रण,(न०)
**मण्डूकपर्ण**–सोनापाठा, सफेदआक, पारिसपीपल, ( पुं० )॥ ११३ ॥
**मण्डूकपर्णी**–मँजीठ, ब्राह्मी, गोभी ( स्त्री० )
**मत्तवारण**–मदसे उन्मत्त हस्ती, (पुं०) ॥ ११४ ॥
**मत्तवारण**–महलकी गलियोंमें कुंदआदिफुलवादकी बाड़, आश्रयरहित, ( न० )
**रोमहर्षण**–बहेडाका वृक्ष, रोमपुलकावली, (न०) ॥ ११५ ॥

"Aho Shrutgyanam"

**वातरायण** उन्मत्ते मतः कूटे च मार्गणे ।
शरसंक्रमणे किञ्चित्करेऽपि करपत्रके ॥ ११६ ॥

णषष्ठम् ।

वयःसंधौ च गर्भे च भवेद्दोहदलक्षणम् ।
पयोधरे च लावण्ये मतं **यौवनलक्षणम्** ॥ ११७ ॥

इति विश्वलोचने णान्तवर्गः ॥

## अथ तान्तवर्गः ।

तैकम् ।

पालने पालके **तः** स्यात्तुश्चौरक्रोडपुच्छयोः ।

तद्वितीयम् ।

**अन्तं** विशुद्धे व्याप्ते स्याद**न्तो** नाशे मनोहरे ॥ १ ॥
स्वरूपेऽन्तं मतं क्लीबं न स्त्री प्रान्तेऽन्तिके त्रिषु ।
**आर्त्तिः** पीडाधनुष्कोट्यो**रस्तः** प्रत्यङ्महीधरे ॥ २ ॥

---

**वातरायण**–उन्मत्त, मायावी आदि, बाण, बाणोंका छाना, निष्प्रयोजन-मनुष्य, करोंत, (पुं० ) ॥ ११६ ॥

**णषष्ठम् ।**

**दोहदलक्षण**–अवस्थाकी संधि, गर्भ, ( न० )

**यौवनलक्षण**–कुच ( दूधी ), सुंदरता, ( न० ) ॥ ११७ ॥

इस प्रकार विश्वलोचनकी भाषाटीकामें णान्तवर्ग समाप्तहुवा ॥

**अथ तान्तवर्ग ।**

तैक ।

**त**( कार )–पालनकरना, पालनकरनेवाला, ( पुं )

**तु**–चोर, छाती, पूँछ, ( पुं० )

**तद्वितीय ।**

**अन्त**–विशुद्ध, व्याप्त, ( न० )

**अन्त**–नाश, सुंदर, ( पुं० )॥ १ ॥

**अन्त**–स्वरूप, ( न० ) प्रान्त, (पुं०-न० ) समीप, ( त्रि० )

**आर्त्ति**–पीडा, धनुषकी ज्या, ( स्त्री०)

**अस्त**–प्रत्येकका पूजनकरनेवाला, पर्वत, ( पुं० ) ॥ २ ॥

"Aho Shrutgyanam"

त्रिषु क्षिप्ते गतेऽप्यस्तमाप्तः सत्यगृहीतयोः ।
आप्तिः संवरणे प्राप्तौ विज्ञातगतयोर्गतम् ॥ ३ ॥
ईतिः स्यादतिवृष्ट्यादिषट्के डिम्बप्रवासयोः ।
उक्तमेकाक्षरच्छन्दस्युक्तस्तु त्रिषु भाषिते ॥ ४ ॥
स्फूर्तिरक्षणयोरूतिर्ऋतमुञ्छशिले जले ।
मतं त्रिलिङ्गकं सत्ये गतौ दीप्तेऽभिपूजिते ॥ ५ ॥
ऋतिर्गतौ जुगुप्सायां स्पर्द्धायामप्यमङ्गले ।
ऋतुः स्यादार्त्तवे वीरे वसन्तादिषु मासि च ॥ ६ ॥
एतस्तु कर्बुरे वाच्यलिङ्गः स्यादागतेऽपि च ।
शोभाऽभिलाषयोः कान्तिः कान्तो रम्ये प्रिये त्रिषु ॥ ७ ॥
कान्तोऽश्मनि पुमान्कान्ता प्रियङ्गौ नायिकान्तरे ।
कीर्त्तिर्यशसि विस्तारे प्रसादेऽपि च कर्दमे ॥ ८ ॥

---

**अस्त**–फेंकाहुवा, गयाहुवा, ( त्रि० )
**आप्त**–सत्य, ग्रहणकियाहुवा, ( पुं० )
**आप्ति**–ढकना, प्राप्ति, ( स्त्री० )
**गत**–जानाहुआ, गयाहुवा, ( न० ) ॥ ३ ॥
**ईति**–अतिवृष्टि आदि छह, लूटना आदिसे पीडा, मुसाफिरी, (स्त्री०)
**उक्त**–एकअक्षरका छंद, ( न० )
**उक्त**–कहाहुवा ( त्रि० ) ॥ ४ ॥
**ऊति**–स्फूर्त्ति, रक्षा, ( स्त्री० )
**ऋत**–उंछशिल ( स्वामीकाछोडाहुवा अन्नका लेना, ) जल, (न०) सत्य, गयाहुवा, दीप्त, अभिपूजित, ((त्रि० ) ॥ ५ ॥
**ऋति**–निंदा, वैर, अमंगल, ( स्त्री० )
**ऋतु**–स्त्रीका रज, वीर, वसन्तआदि-ऋतु, कान्ति, ( पुं० ) ॥ ६ ॥
**एत**–चित्रित, आयाहुवा ( त्रि० )
**कान्ति**–शोभा, अभिलाषा, (स्त्री०)
**कान्त**–सुंदर, प्रिय, ( त्रि० ) ॥७॥
**कान्त**–पत्थरभेद, कंगुनी धान्य, ( पुं० ) नायिका, ( स्त्री० )
**कीर्त्ति**–यश ( जश ), विस्तार, प्रसाद, कींच ( स्त्री० ) ॥ ८ ॥

"Aho Shrutgyanam"

**कुन्तो** गवेधुके प्रासे दण्डभावेऽल्पजन्तुषु ।
**कुन्ती** स्यात्पाण्डुकान्तायां शल्लक्यां गुग्गुलुद्रुमे ॥ ९ ॥
**कृतिर्वधे**ऽपि करणे क्लीबं सत्ययुगे **कृतम्** ।
त्रिषु हिंसितपर्याप्तविहिते निष्फलेऽव्ययम् ॥ १० ॥
**कृत्तं** तु कथितं छिन्ने वेष्टितेऽप्यभिधेयवत् ।
**कृत्तिस्त्वक्**चर्म्मभूर्जेषु कृत्तिकायां च कीर्त्तिता ॥ ११ ॥
**केतुर्ग्रहा**न्तरोत्पातद्युतिलक्ष्मध्वजादिषु ।
**क्रतुर्यज्ञे** मुनेर्भेदे **गतं** स्याज्जातयादसोः ॥ १२ ॥
**गतिर्दशायां** गमने ज्ञाने मर्म्माऽभ्युपाययोः ।
नाडीव्रणे सरण्यां च **गतिर्ज**न्मान्तरेऽपि च ॥ १३ ॥
**गर्त्तस्त्रिगर्त्त**देशे स्याद् भूश्वभ्रेऽपि कुकुन्दरे ।
**गातुर्ग**न्धर्वरोलम्बरोषणे कोकिलापतौ ॥ १४ ॥

---

**कुन्त**–गेरू, फरसा, दण्ड, भाव, अल्प जन्तु, ( पुं० ) ।
**कुन्ती**–पांडुराजाकी स्त्री, सलई-वृक्ष, गूगल-वृक्ष, ( स्त्री० ) ॥ ९ ॥
**कृति**–मारना, करण, ( स्त्री० )
**कृत**–सत्ययुग ( न० )
**कृत्त**–हिंसित, परिपूर्ण, विधानकिया-हुवा, ( त्रि० )
**कृतं**–निष्फल, ( अव्य० ) ॥ १० ॥
**कृत्त**–छिन्न, ( कटाहुवा ), लपेटाहुवा, ( त्रि० )
**कृत्ति**–त्वचा, वृक्षका बक्कल, भोजपत्र, कृत्तिका-नक्षत्र, (स्त्री) ॥ ११ ॥
**केतु**–केतुग्रह, उत्पात, कान्ति, चिह्न, ध्वजआदि, ( पुं० )
**क्रतु**–यज्ञ, एकमुनि, ( पुं० )
**गत**–उत्पन्नहुवा, जलजन्तु, ( न० ) ॥ १२ ॥
**गति**–दशा, गमन, ज्ञान, मर्म, उपाय, नाडीछिद्र, मार्ग, जन्मान्तर, ( स्त्री० ) ॥ १३ ॥
**गर्त**–त्रिगर्तदेश, पृथ्वीका छिद्र ( गड्ढा ), नितम्ब ( चूँतड ) का गड्ढा, ( पुं० )
**गातु**–गंधर्व, भर, क्रोधि, कोकिल, ( पुं० ) ॥ १४ ॥

"Aho Shrutgyanam"

**गीति**श्छन्दोन्तरे ज्ञाने **गीतं** गाने च शब्दिते ।
**गुप्त**स्तु रक्षिते गूढे वृषले चन्द्रपूर्वकः ॥ १५ ॥
**गुप्तिः** कारागृहे गर्त्ते गोपाये रक्षणे युगे ।
**ग्रस्तं** ग्रासीकृतेऽपि स्याल्लुप्तवर्णपदोदिते ॥ १६ ॥
**घातः** प्रहारे काण्डे च **घृतं** दीप्ताज्यवारिषु ।
**चितिः** समूहे चित्यायामुपादुपचये **चितिः** ॥ १७ ॥
**चितः** कूटीकृतेऽपि स्याच्चि**ता** संहतिचित्ययोः ।
**चिता** छन्ने चुल्लिकायां **जातं** जन्मौघजन्तुषु ॥ १८ ॥
**जातिः** सामान्यमालत्योश्छन्दोभिद्गोत्रजन्मसु ।
**तातो**ऽनुकम्प्ये जनके **तिक्तो** रससुगन्धयोः ॥ १९ ॥
**तिक्ता** तु कटुरोहिण्यां **तिक्तं** पर्पटके मतम् ।
**त्रेता** युगेऽग्नित्रितये **दत्तं** विश्राणितेऽविते ॥ २० ॥

---

**गीति**–छन्दका भेद, ज्ञान, ( स्त्री० )
**गीत**–गाना, शब्दित (शब्दयुक्त)(न०)
**गुप्त**–रक्षाकियाहुवा, गूढ ( पुं० )
**चंद्रगुप्त**–शूद्र, ( पुं० ) ॥ १५ ॥
**गुप्ति**–बंदीखाना, गड्ढा, गुप्तकरना, रक्षाकरना, युग, ( स्त्री० )
**ग्रस्त**–ग्रास कियाहुवा, लुप्तहैं वर्ण पद जिसमें ऐसा उच्चारण, (न०) ॥ १६ ॥
**घात**–प्रहार ( मारना ), दण्ड, (पुं०)
**घृत**–दीप्त, घृत ( घी ), जल, (न०)
**चिति**–समूह, चिता,
**उपचिति**–वृद्धि, ( स्त्री० ) ॥१७॥
**चित**–ढेरकियाहुवा, ( पुं० )
**चिता**–समूह, चिता ( मुर्दाजलानेके लिये चिनाहुवा काष्ठढेर ), ( स्त्री० )
**चिता**–आच्छादित, सिगडी, ( त्रि० )
**जात**–जन्म, समूह, जन्तु, ( न० ) ॥ १८ ॥
**जाति**–सामान्य, चमेली, छंदोभेद, गोत्र, जन्म, ( स्त्री० )
**तात**–जिसपर दयाकरीजातीहै वह, पिता, ( पुं० )
**तिक्त**–कसैलारस, सुगन्ध, (पुं०) १९
**तिक्ता**–कुटकी, ( स्त्री० )
**तिक्त**–पित्तपापडा, ( न० )
**त्रेता**–त्रेता-युग, तीन अग्नि, ( स्त्री० )
**दत्त**–दानकियाहुवा, रक्षाकियाहुवा ( न० ) ॥ २० ॥

"Aho Shrutgyanam"

**दन्तः** कुञ्जे रदे सानौ **दन्ती** स्यादौषधीभिदि ।
**दान्त**स्त्रिषु तपःक्लेशसहेऽपि दमितेऽपि च ॥ २१ ॥
**दिति**र्दनौ खण्डने च **दीप्तं** ज्वलितदग्धयोः ।
त्रिषु निर्वासितेऽपि स्या**द्दृति**श्चर्म्मपुटे कषे ॥ २२ ॥
**दृप्तो** निवारिते शक्ते **द्युति**र्दीधितिशोभयोः ।
**द्रुतं** शीघ्रे च विद्राणे विलीने शीघ्रगे त्रिषु ॥ २३ ॥
**धाता** तु ब्रह्मणि रवौ त्रिषु स्यात्परिपालके ।
**धातुः** क्रियार्थे शुक्रेपि विषयेष्विन्द्रियेषु च ॥ २४ ॥
श्लेष्मादिरसरक्तादिभूतादिवसुधादिषु ।
मनःशिलादिके लोहे विशेषाद्गैरिकेस्थिनि ॥ २५ ॥
**धुतं** विधूते त्यक्ते च **धूतः** कम्पितभर्त्सिते ।
**धूर्त्तं** तु खण्डलवणे धत्तूरे नाविटे त्रिषु ॥ २६ ॥

---

**दन्त**–कुञ्ज ( लताआदिकीकुटी ), दाँत, पर्वतका निकलाहुवा भाग, ( पुं० )
**दन्ती**–जमालगोटाकी जड़, (स्त्री०)
**दान्त**–तप क्लेशको सहनेवाला, दमनकियाहुवा, ( पुं० ) ॥ २१ ॥
**दिति**–दैत्योंकी माता, खंडनकरना, ( स्त्री० )
**दीप्त**–देदीप्यमान, दग्ध, निकासाहुवा, ( त्रि० )
**दृति**–चर्मकी डोली, कसौटी, (स्त्री०) ॥ २२ ॥
**दृप्त**–निवारणकियाहुवा, समर्थ, (पुं०)
**द्युति**–किरण-सूर्यआदिकी, शोभा, ( स्त्री० )
**द्रुत**–शीघ्र ( जल्दी ), पिघलना, ( न० ) विलीन ( मिलजाना ), शीघ्र गमन करनेवाला, ( त्रि० ) ॥ २३ ॥
**धाता**–ब्रह्मा, सूर्य, ( पुं० ) पालना करनेवाला, ( त्रि० )
**धातु**–क्रियार्थ, शुक्र, विषय, इंद्रिय २४ कफ आदि, रसरक्तआदि, पंचमहाभूतआदि, पृथ्वीआदि, मनसिलआदि, लोह, गेरू (विशेषकरके), अस्थि (हड्डी) ( पुं० ) ॥ २५ ॥
**धुत**–कँपायाहुवा, त्यागाहुवा, (त्रि०)
**धूत**–कँपायाहुवा, झिडकाहुवा,(त्रि०)
**धूर्त**–बिरियासंचर-नोंन (न०), धतूरा, (पुं०) कामी, ( त्रि० ) ॥ २६ ॥

"Aho Shrutgyanam"

**धृति**र्धारणसंतुष्टिधैर्ये योगान्तरेऽध्वरे ।
**नत**स्तगरवृक्षे स्यात् कुटिलानतयोस्त्रिषु ॥ २७ ॥
**नीति**र्नये प्रापणे च **नृत्तः** स्यान्नर्त्तने क्रिमौ ।
**पक्तिः** स्त्री गौरवे पाके **पङ्क्तिः** श्रेणौ दशस्वपि ॥ २८ ॥
स्याद्दशाक्षरवृत्तेपि स्त्रिया मूल्ये गतौ **पतिः** ।
**पत्तिः** पदातौ वीरे ना गतौ सेनान्तरे स्त्रियाम् ॥ २९ ॥
**पात**स्तु पतने त्राते **पीत**माचान्तगौरयोः ।
त्रिषु **पीता** तु पर्णिन्यां **पीतं** पाने नपुंसकम् ॥ ३० ॥
**पीतिः** पाने सपूर्वा तु सहपाने हये पुमान् ।
**पुस्तं** तु पुस्तके क्लीबं विज्ञाने लेप्यकर्म्मणि ॥ ३१ ॥
**पूतं** पवित्रे शब्दे च त्रिषु स्याद्बहुलीकृते ।
पूरितच्छन्नयोः **पूर्त्तं पूर्त्तं** खातादिकर्म्मणि ॥ ३२ ॥

---

**धृति**—धारणा, संतोष, धैर्य योगभेद, यज्ञ, ( स्त्री० )
**नत**—तगर-वृक्ष, ( पुं० ) कुटिल, नम्र-पुरुष, ( त्रि० ) ॥ २७ ॥
**नीति**—न्याय, प्राप्तकरना, ( स्त्री० )
**नृत्त**—नृत्यभेद, क्रिमि, ( पुं० )
**पक्ति**—गौरव, पाक, ( स्त्री० )
**पंक्ति**—श्रेणि ( पंक्ति ), दश—संख्या, ॥२८॥ दशअक्षरवाला छंद,(स्त्री०)
**पति**—स्त्रीका मूल्य, गति, ( स्त्री० )
**पत्ति**—पयादा सिपाही, शूरवीर,(पुं०) गमन, सेनाभेद, (स्त्री०)॥ २९ ॥
**पात**—पड़ना, ( पुं० ) रक्षाकियाहुवा, (त्रि०)
**पीत**—आचमन किया हुवा, गौर ( पीला ) ( त्रि० )
**पीता**—मखवन-औषधि, ( स्त्री० )
**पीत**—पीना, ( न० ) ॥ ३० ॥
**पीति**—पीना,
**सपीति**—संगमें पीना ( स्त्री० )अश्व, ( पुं० )
**पुस्त**—पुस्तक, शिल्प ( कारीगरी ), लेप्यकर्म, ( न० ) ॥ ३१ ॥
**पूत**—पवित्र, शब्दित, ( न० ) बढायाहुवा, ( त्रि० )
**पूर्त**—पूरित, आच्छादित, ( त्रि० ) खोदनाआदिकर्म, (न०) ॥ ३२ ॥

"Aho Shrutgyanam"

**पोतो** बाले बहित्रे च **प्रातिः** पूर्तिप्रदेशयोः ।
**प्राप्तिर्**महोदये लाभे **प्राप्तं** लब्धसमञ्जसे ॥ ३३ ॥
**प्रीतिः** स्मरसुतायोगभेदयोः प्रेममोदयोः ।
हर्षिते नर्म्मणि **प्रीतं प्रेतो** भूतान्तरे मृते ॥ ३४ ॥
**प्रोतं** तु ग्रथिते वस्त्रे **प्लुतस्तु** स्यात्रिमातृके ।
प्लुतमश्वस्य गमने **प्लुतं** सस्रवने त्रिषु ॥ ३५ ॥
**भक्तिर्**विभागे सेवायां **भर्ता** स्वामिनि धारके ।
**भित्तिः** कुड्ये च काशे च प्रदेशे भेदभागयोः ॥ ३६ ॥
**भीतं** भयेऽपि सभये **भीतिः** साध्वसकंपयोः ।
अथ **भूतः** पुमान्देवयोनिभेदेऽपि देवले ॥ ३७ ॥
त्रिषु प्राप्ते विवृत्तेच **भूतं** स्यान्न्याय्यसत्ययोः ।
उपमाने पृथिव्यादौ पिशाचादौ समे त्रिषु ॥ ३८ ॥

---

**पोत**–बालक, नौका या जिहाज, (पुं०)
**प्राति**–पूर्त्ति, प्रदेश, ( स्त्री० )
**प्राप्ति**–महान् उदय ( भाग्योदय ), लाभ, ( स्त्री० )
**प्राप्त**–लब्धहुवा, उचित (न०) ॥३३॥
**प्रीति**–कामदेवकी पुत्री, योगभेद, प्रेम, आनंद, ( स्त्री० )
**प्रीत**–आनंदित, ठट्ठा, ( न० )
**प्रेत**–भूतान्तर, मृतक, (पुं०) ॥३४॥
**प्रोत**–गूँथाहुवा, वस्त्र, ( न० )
**प्लुत**–तीनमात्रावालावर्णोच्चारण, (पुं०) अश्वकी गति, सस्रवन ( त्रि० ) ॥ ३५ ॥
**भक्ति**–विभाग, सेवा, ( स्त्री० )
**भर्ता**–स्वामी, धारणकरनेवाला, (पुं०)
**भित्ति**–दीवार, काश, प्रदेश, भेद, भाग, ( स्त्री० ) ॥ ३६ ॥
**भीत**–भय, (न०) डराहुवा, ( त्रि० )
**भीति**–भय, कंप, ( स्त्री० )
**भूत**–देवयोनिभेद, देवल ( देवसेवासे आजीवन करनेवाला ) ( पुं० ) ॥ ३७ ॥
**भूत**–प्राप्तहुवा, बदीतहुवा, न्याययुक्त, सत्य, उपमान, पृथिवीआदि, पिशाचआदि, सम ( तुल्य ) (त्रि०) ॥ ३८ ॥

"Aho Shrutgyanam"

भूतिर्म्मातङ्गशृङ्गारे भस्मसम्पत्तिजन्मसु ।
भृतिस्तु भरणे ख्याता तथा वेतनमूल्ययोः ॥ ३९ ॥
भ्रान्तिः स्याद्भ्रमणेऽपि स्यान्मतौ वाऽप्यनवस्थितौ ।
मतोऽर्चितेऽप्यनुमते मतिर्बुद्धौ स्मृतीच्छयोः ॥ ४० ॥
मन्तुः स्यादपराधेऽपि मानवे परमेष्ठिनि ।
माता ब्राह्म्यादिगोकादिप्रसूगौरीष्वपि क्षितौ ॥ ४१ ॥
त्रिषु स्यान्मापके माता गीताध्यक्षे प्रपूर्वकः ।
मितिर्मानेऽप्यवच्छेदे मुक्तिर्मोक्षेऽपि मोचने ॥ ४२ ॥
मुक्तो मोक्षगतेऽप्युक्तस्त्रिषु मुक्ता तु मौक्तिके ।
मूर्त्तं मूर्त्त्यन्विते मूर्च्छाऽन्विते काठिन्यवत्यपि ॥ ४३ ॥
मूर्त्तिः कायेऽपि काठिन्ये मृत्युयाचितयोर्म्मतम् ।
मृतं मृत्युपरिप्राप्ते विज्ञेयमभिधेयवत् ॥ ४४ ॥

---

**भूति**—हस्तीका शृङ्गार, भस्म, सम्पत्ति, जन्म, ( स्त्री० )

**भृति**—पोषण, नौकरी, मूल्य, (स्त्री०) ॥ ३९ ॥

**भ्रान्ति**—बुद्धिविषै भ्रम, एकजगह नही-ठहरना ( स्त्री० )

**मत**—पूजित, संमत, ( पुं० )

**मति**—बुद्धि, स्मृति, इच्छा, (स्त्री०) ४०

**मन्तु**—अपराध, मनुष्य, ब्रह्मा, (पुं०)

**माता**—ब्राह्मी माहेश्वरीआदि, गौआ-दि, जननी ( माता ), गौरी, पृथ्वी, ( स्त्री० ) ॥ ४१ ॥

**प्रमाता**—प्रमाणकरनेवाला, गीतआदि-का अध्यक्ष, ( त्रि० )

**मिति**—मान ( मापना ), अवच्छेद ( विश्राम ), ( स्त्री० )

**मुक्ति**—मोक्ष, छुटना, (स्त्री०) ॥४२॥

**मुक्त**—मोक्षको प्राप्तहुवा, छुटाहुवा, ( त्रि० )

**मुक्ता**—मोती ( स्त्री० )

**मूर्त्त**—मूर्त्तिमान, मूर्छित, काठिन्यवा-ला ( त्रि० ) ॥ ४३ ॥

**मूर्त्ति**—शरीर, काठिन्य, ( स्त्री० )

**मृत**—मृत्यु, याचित, ( न० ) मृत्युको प्राप्त, ( त्रि० ) ॥ ४४ ॥

"Aho Shrutgyanam"

**यतिर्**यतिनि पुंसि स्त्री पाठभेदनिकारयोः ।
**यन्ता** सादिनि सूते च निपूर्वोऽसौ नियामके ॥ ४५ ॥

**युक्तं** स्यादुचिते **युक्तं** संयुतेऽप्यभिधेयवत् ।
**युक्तिर्**नियोजने न्याये पृथक्संयुक्तयोर्मतम् ॥ ४६ ॥

**युतं** हस्तचतुष्केऽपि संख्याभेदे नपूर्वकम् ।
**रक्तो**नुरक्ते नील्यादिरञ्जिते लोहितेऽन्यवत् ॥ ४७ ॥

**रिक्तं** शून्ये वनेऽपि स्यादशरीतिर्गिरां पथि ।
**रीतिः** स्यन्दे प्रचारे च लोहकिट्टारकूटयोः ॥ ४८ ॥

**लता** तु माधवीवल्लीशाखास्पृक्काप्रियङ्गुषु ।
**लता** कस्तूरिकाज्योतिष्मतीदूर्वासु च स्मृता ॥ ४९ ॥

**लिप्तं** विलेपिते भुक्ते विषाक्तविशिखादिषु ।
**लूता** पिपीलिकायां स्यादूर्णनाभे गदान्तरे ॥ ५० ॥

---

**यति**–संन्यासी अथवा मुनि, ( पुं० ) पाठका विश्राम, अनादर, (स्त्री०)

**यन्ता**–सवार, सारथि,

**नियन्ता**–प्रेरणेवाला, ( पुं० )॥४५॥

**युक्त**–उचित, संयुक्त, ( त्रि० )

**युक्ति**–लगाना, न्याय, अलगकियाहुवा, ( स्त्री० ) ॥ ४६ ॥

**युत**–चारहाथप्रमाणवाला,

**अयुत**–संख्याभेद ( दशहजार ) ( न० )

**रक्त**–आसक्त, नीलीआदिसे रंगाहुवा, लालरंगवाला ( त्रि० ) ॥ ४७ ॥

**रिक्त**–शून्य, वन, ( न० )

**रीति**–झिरना, प्रचार, लोहेका मैल, पीतल ( स्त्री० ) ॥ ४८ ॥

**लता**–माधवीलता, बेल, शाखा-वृक्षकी, असवरग, कंगुनीधान्य, कस्तूरी, मालकांगनी, दूब, (स्त्री०) ॥४९॥

**लिप्त**–लेपकियाहुवा, भुक्त ( खायाहुवा, विषसेलिप्तकिया बाणआदि, ( त्रि० )

**लूता**–चीटी, मकडी, रोगविशेष, ( स्त्री० ) ॥ ५० ॥

"Aho Shrutgyanam"

**लोप्तं** तु चोरिते बाष्पे **वक्ता** वाग्मिनि पण्डिते ।
**वप्ता** पितरि तन्तूनां वापके बीजवापके ॥ ५१ ॥
**वर्त्तिर्गात्रानुलेपन्यां वर्त्तिर्दीपदशासु** च ।
दीपे भेषजनिर्म्माणे लोचनाञ्जनलेखयोः ॥ ५२ ॥
नीरुग्वृत्तिमतो**र्वार्त्तो वार्त्त**मारोग्यफल्गुनोः
**वार्त्ता** कृष्यादिवृत्तान्तवार्त्ताकीवृत्तिषु स्थिता ॥ ५३ ॥
**वित्तं** तु विभवे ज्ञातख्यातलब्धविचारिते ।
**वित्ति**र्ज्ञानेपि लाभेऽपि विचारे सम्भवेऽपि च ॥ ५४ ॥
**वीतं** त्वसारहस्त्यश्वे त्यक्तेप्यङ्कुशकर्म्मणि ।
**वीति**स्त्यागे गतौ दीप्तौ प्रजने धावनेऽशने ॥ ५५ ॥
**वृत्तिः** प्रवृत्तौ वृत्तौ च कौशिक्यादिप्रवर्त्तने ।
**वृत्त**स्तु वर्तुलेऽतीते मृते ख्याते दृढे वृते ॥ ५६ ॥

---

**लोप्त**—चोराहुवा, बाष्प ( बाँफ )(त्रि०) **वक्ता**—बहुतबोलनेवाला, पंडित,(पुं०) **वप्ता**—पिता, कपड़ाबुननेवाला, बीज-बोनेवाला, (पुं०) ॥ ५१ ॥ **वर्त्ति**—शरीरपर कुछ लगाकर उतारा-हुवा लेप, दीपककी बत्ती, दीपक, औषधिकी बत्ती, नेत्र, अंजनकी रेख, ( स्त्री० ) ॥ ५२ ॥ **वार्त**—रोगरहित, वृत्तिवाला, ( त्रि० ) आरोग्य, तुच्छ, ( न० ) **वार्त्ता**—कृषिआदि, वृत्तान्त, बडीकटे-हली, वृत्ति ( वर्तना ) ( स्त्री० ) ॥ ५३ ॥

**वित्त**—धन, जानाहुवा, विख्यात, प्राप्तहुवा, विचाराहुवा ( त्रि० ) **वित्ति**—ज्ञान, लाभ, विचार, सम्भव, ( स्त्री० ) ॥ ५४ ॥ **वीत**—साररहित हस्ती व अश्व, त्यागा-हुवा, अंकुशकर्म, **वीति**—त्याग, गति, दीप्ति, गर्भग्रहण, धोना, भोजन, ( स्त्री० )॥ ५५ ॥ **वृत्ति**—प्रवृत्ति, आजीविका, नाटककी एकवृत्ति, ( स्त्री० ) **वृत्त**—गोलआकार, बदीतहुवा, मृत, विख्यात, दृढ, वृत ( वरणकिया ) ( त्रि० ) ॥ ५६ ॥

"Aho Shrutgyanam"

त्रिषु **वृत्तं** तु चरिते **वृत्तं** छन्दसि वर्त्तते ।
**वृतिर्विवरणे** वाटे वेष्टिते वरणे **वृतम्** ॥ ५७ ॥

**वृन्तं** प्रसवबन्धेऽपि कुचाग्रे घटधारयोः ।
**शस्तं** क्षेमे प्रशस्ते च **शातः** शकुनिशातयोः ॥ ५८ ॥

**शातं** शर्म्मणि **शान्तस्तु** रसे दान्तेऽपि मुक्तके ।
**शान्तिः** शमेऽपि कल्याणे **शास्ता** शासकबुद्धयोः ॥ ५९ ॥

**शितः** कृष्णे सिते भूर्जे **शितं** शकुनिशान्तयोः ।
वानीरबहुवारे च **शीतः शीतं** तु चन्दने ॥ ६० ॥

हिमसम्भूतजाड्येऽपि शीतलालसयोस्त्रिषु ।
**शुक्तिः** शङ्खनखे शङ्खे मुक्तास्फोटेऽपि कम्बुनि ॥ ६१ ॥

---

**वृत्त**–चरित, छंद, ( न० )

**वृति**–विवरण (व्याख्या), वाट (बाड) ( स्त्री० )

**वृत**–लपेटाहुवा, आच्छादित कियाहुवा, ( न० ) ॥ ५७ ॥

**वृन्त**–पुष्पआदिका नाकू, कुचाका अग्रभाग, घटकी धारा ( न० )

**शस्त**–कुशल, ( न० ) श्रेष्ठ, (त्रि०)

**शात**–पक्षी, शान्त-मनुष्य, ( पुं० ) ॥ ५८ ॥

**शात**–कल्याण, ( न० )

**शान्त**–शान्त-रस, इंद्रियोंका जीतनेवाला, मुक्त, ( पुं० )

**शान्ति**–मनका जीतना, कल्याण, ( स्त्री० )

**शास्ता**–शिक्षाकरनेवाला, बुद्ध-देव ( पुं० ) ॥ ५९ ॥

**शित**–काला, सफेद, ( त्रि० ) भोजपत्र ( पुं० )

**शित**–पक्षी, दुर्बल, ( पुं० )

**शीत**–बेत, बहुतबार, ( पुं० )

**शीत**–चंदन, ( न० ) ॥ ६० ॥
बरफ ठंडा ( न० ) आलस्यवाला, (त्रि०)

**शुक्ति**–सँखला, शंख, ( पुं० ) कपालकी हड्डी, सीपी, शंख, ( स्त्री० ) ॥ ६१ ॥



"Aho Shrutgyanam"

दीर्घकोशीहयावर्त्ते कपालशकले स्त्रियाम् ।
**शुक्तो**ऽम्ले कर्कशे पूते शास्त्रावधृतयोः **श्रुतम्** ॥ ६२ ॥
**श्रुतिः** श्रोत्रे च वेदे च वार्तायां श्रौतकर्म्मणि ।
**श्वेतं** रूप्यं त्रिषु सिते **श्वेतो** द्वीपाद्रिभेदयोः ॥ ६३ ॥
**श्वेता** वराटिकायां स्याच्छङ्खिन्यां काष्ठपाटलौ ।
**सत्साधौ** विद्यमानेऽपि प्रशस्ते पूजिते त्रिषु ॥ ६४ ॥
**सती** साध्वीचण्डिकयोः **सत्तु** सत्येऽभिधेयवत् ।
**सातिर्दा**नेवसानेऽपि **सितं** श्वेतसमाप्तयोः ॥ ६५ ॥
त्रिषु ज्ञातेऽपि बद्धेऽपि शर्करायां **सिता** मता ।
**सीता** तु जानकीव्योमगङ्गालाङ्गलवर्त्मसु ॥ ६६ ॥
**सुतस्तु** पार्थिवे पुत्रे **सुप्ति**र्विश्वासघातिनि ।
स्वापे स्पर्शाज्ञतायां च सुखस्वापे सुपूर्विका ॥ ६७ ॥

---

जलजन्तु, घोडेकी भौंरी, कपालका खंड, ( स्त्री० )

**शुक्त**—खट्टा, कठोर, पवित्र, ( पुं० )

**श्रुत**—शास्त्र, श्रवणकियाहुवा, ( न० ) ॥ ६२ ॥

**श्रुति**—कान, वेद, वार्ता, श्रौतकर्म ( वेदविहित कर्म ), ( स्त्री० )

**श्वेत**—चांदी, ( न० ) सफैद (त्रि०)

**श्वेत**—श्वेतद्वीप, पर्वतभेद, ( पुं० ) ॥ ६३ ॥

**श्वेता**—कौडी, चोरपुष्पी (चोरहूली), अगर, पाढर-पुष्पवृक्ष, ( स्त्री० )

**सत्**—साधु विद्यमान, श्रेष्ठ, पूजित ( त्रि० ) ॥ ६४ ॥

**सती**—श्रेष्ठ स्त्री, चण्डिका, ( स्त्री० )

**सत्**—सचा पुरुषआदि ( त्रि० )

**साति**—दान, अन्त, ( स्त्री० )॥६५॥

**सित**—सफैद, समाप्त, जानाहुवा, बँधाहुवा, ( त्रि० )

**सिता**—मिसरी ( स्त्री० )

**सीता**—जानकी, आकाशगंगा, हलसे कीहुई पृथ्वीमें लकीर,(स्त्री०)॥६६॥

**सुत**—राजा, पुत्र, ( पुं० )

**सुप्ति**—विश्वासघाती, ( पुं० ) सोना, स्पर्शका अज्ञान, **सुषुप्ति**—सुखपूर्वक सोना ( स्त्री० ) ॥ ६७ ॥

"Aho Shrutgyanam"

**सूत**स्तु पारदे तक्ष्णि **सूतः** सारथिबन्दिनोः ।
प्रसूते प्रेरिते **सूतः** क्षत्रियाद् ब्राह्मणीसुते ॥ ६८ ॥

**सृतिः** स्त्री गमने मार्गे कुपूर्वा निकृतौ **सृतिः** ।
**सेतु**र्नालौ च वरुणे **स्थित**मूर्द्ध्वेऽपि संस्थिते ॥ ६९ ॥

निश्चिते सप्रतिज्ञेऽपि गत्यभावे तु न द्वयोः ।
मर्यादायामवस्थाने स्थाने सीमनि च **स्थितिः** ॥ ७० ॥

**स्मृति**स्तु धर्मशास्त्रे स्यात् स्मरणे धीच्छयोरपि ।
संततौ सीवने **स्यूतिः स्यूतः** क्षतप्रसेवयोः ॥ ७१ ॥

**स्वान्तं** नपुंसकं वित्ते **स्वान्तं** स्यादपि गह्वरे ।
द्वयोस्तु **हस्तो** नक्षत्रे **हस्तः** करिकरे करे ॥ ७२ ॥

सप्रकोष्ठाततकरे **हस्तः** केशात्परश्चये ।
**हितं** गते धृते पथ्ये **हेति**र्ज्वालार्कतेजसोः ॥ ७३ ॥

---

**सूत**–पारा, बढई, सारथि, बन्दीजन, ( पुं० ) उत्पन्न ( जन्मा ) हुवा, प्रेराहुवा, ( त्रि० ) क्षत्रियसे ब्राह्मणीका पुत्र, ( पुं० ) ॥ ६८ ॥

**सृति**–गमन, मार्ग **कुसृति**–कपट, ( स्त्री० )

**सेतु**–पुल, वरुण, ( पुं० ) ॥ ६९ ॥

**स्थित**–ऊपर, स्थित, निश्चित, प्रतिज्ञावाला, ( पुं० ) गतिअभाव अर्थात् स्थिति ( न० )

**स्थिति**–मर्यादा, अवस्थान ( स्थिति ), स्थान, सीमा, ( स्त्री० ) ॥ ७० ॥

**स्मृति**–धर्मशास्त्र, स्मरण, बुद्धि, इच्छा, ( स्त्री० )

**स्यूति**–संतति निरंतरता कपडाका-सीना, ( स्त्री० )

**स्यूत**–घाव, थैली ( पुं० ) ॥ ७१ ॥

**स्वान्त**–चित्त, सघन, ( न० )

**हस्त**–नक्षत्र, हाथीकी सूंड, हाथ,(पुं० न० ) ॥ ७२ ॥ प्रकोष्ठसमेतविस्तारकिया हाथ ( एकहाथप्रमाण ), केशशब्दसेपरे हस्तशब्द केशसमूह, जैसे कुंतलहस्त ( पुं० )

**हित**–गयाहुवा, धारणकियाहुवा, पथ्य ( सुखदाता ) ( न० )

**हेति**–अग्निज्वाला, सूर्यतेज, ॥ ७३ ॥

"Aho Shrutgyanam"

स्त्रियां शस्त्रेप्यथ **क्षत्ता** सारथिद्वाःस्थधातृषु ।
भुजिष्यजे नियुक्ते च शूद्राच्च क्षत्रियासुते ॥ ७४ ॥
क्षमायां तु मता **क्षान्तिः क्षान्तिः** स्यान्नियमेऽपि च ।
**क्षितिः** पृथिव्यां वासे च स्थानमात्रे क्षये **क्षितिः** ॥ ७५ ॥

ततृतीयम् ।

**अगस्ति**र्वङ्गसेनद्रौ स्यादगस्त्येऽप्यथा**ङ्कृतिः** ।
अग्निब्रह्माऽग्निहोत्रेषु स्थिरे दामोदरे**ऽच्युतः** ॥ ७६ ॥
**अजितो**ऽनिर्जिते विष्णाव**दिति**र्देवसूभुवोः ।
**अनृतं** स्याद् मृषाकृष्योर**नन्तो** विष्णुशेषयोः ॥ ७७ ॥
**अनन्तं** गगने**ऽनन्तं** भवेदनवधौ त्रिषु ।
**अनन्ता** पृथिवीदूर्वापार्वतीलाङ्गलीष्वपि ॥ ७८ ॥
सारिवायां गुडूच्यां च समुद्रान्ताविशल्ययोः ।
**अमृतं** मोक्षपीयूषसलिले हृद्यवस्तुनि ॥ ७९ ॥

---

शस्त्र ( त्रि० )
**क्षत्ता**—सारथि, द्वारपाल, ब्रह्मा, दासपुत्र, दियाहुवा, शूद्रसे क्षत्रियाका पुत्र, ( पुं० ) ॥ ७४ ॥
**क्षान्ति**—क्षमा, नियम, ( स्त्री० )
**क्षिति**—पृथ्वी, वास (निवास), स्थानमात्र, क्षय (नाश) ( स्त्री० ) ॥ ७५ ॥

**ततृतीय ।**

**अगस्ति**—बक ( हथिया ) वृक्ष, अगस्त्यमुनि ( पुं० )
**अङ्कृति**—अग्नि, ब्रह्मा, अग्निहोत्र, ( पुं० )
**अच्युत**—स्थिर, दामोदर (भगवान्) ॥ ७६ ॥
**अजित**—नहीं जीताहुवा, विष्णु, ( पुं० )
**अदिति**—देवताओंकी माता, पृथ्वी, ( स्त्री० )
**अनृत**—असत्य, कृषि, ( न० )
**अनंत**—विष्णु, शेष-नाग, (पुं०)॥७७॥ आकाश ( न० ) निस्सीम (त्रि०)
**अनन्ता**—पृथिवी, दूर्वा, सिंहलीपीपल, कलिहारी ॥७८॥ सरिवन, गिलोय, जवाँसा, अजमोद, ( स्त्री० )
**अमृत**—मोक्ष, पीयूष (अमृत), जल, मनोहर वस्तु, ॥ ७९ ॥

"Aho Shrutgyanam"

अयाचिते यज्ञशेषे घृते दुग्धेऽतिसुन्दरे ।
**अमृत**स्तु मतः पुंसि धन्वंतरिसुपर्वणोः ॥ ८० ॥
गुडूच्यामलकीपथ्यामागधीष्व**मृता** मता ।
**अमति**र्भाविकाले स्याद**र्ह**स्तु जिनपूज्ययोः ॥ ८१ ॥
**अर्दितः** पवनव्याधौ याचिताऽहतयोस्त्रिषु ।
**अर्वती** चेटिकावाम्योरश्वे**ऽर्वन्** कुत्सितेऽन्यवत् ॥ ८२ ॥
**अव्यक्त**स्तु हरौ हीरे मूर्खे वाच्यवदस्फुटे ।
वाच्यवत्क्षतहीने स्या**दाकृतिः** कायरूपयोः ॥ ८३ ॥
सामान्येऽपि तथा**ख्यातमाख्यातं** कथिते तिङि ।
अथ वाच्यव**दाख्यातं** घ्राणिते हिंसितेऽपि च ॥ ८४ ॥
**आचित**स्तु चिते छन्ने संगृहीते त्रिलिङ्गकः ।
**आचितः** शकटोन्मेये पलानामयुतद्वये ॥ ८५ ॥

---

अयाचित, यज्ञशेष, घृत, दुग्ध, अतिसुन्दर ( न० )

**अमृत**–धन्वंतरि, देवता, ( पुं० ) ॥ ८० ॥

**अमृता**–गिलोय, आंवला, हरड़, पीपल, ( स्त्री० )

**अमति**–आनेवाला काल,

**अर्हन्**–(त्) जिनदेव, पूजा करनेयोग्य (पुं० )॥ ८१ ॥

**अर्दित**–वातरोग, ( पुं० ) याचनाकियाहुवा, माराहुवा, ( त्रि० )

**अर्वती**–दासी, घोड़ी ( स्त्री० )

**अर्वत्**–घोड़ा ( पुं० ) कुत्सित (निंदित ) ( त्रि० ) ॥ ८२ ॥

**अव्यक्त**–विष्णु, हीरा ( पुं० ) मूर्ख, अस्फुट, नाशहीन ( त्रि० )

**आकृति**–घावरहित, ( त्रि० ) शरीर, रूप, ( स्त्री० ) ॥ ८३ ॥

**आख्यात**–सामान्य, ( त्रि० ) कहाहुवा, तिङ् ( तिङंतक्रिया ( न० )

**आख्यात**–सूँघा हुवा, माराहुवा, ( त्रि० ) ॥ ८४ ॥

**आचित**–चिनाहुवा, आच्छादनकियाहुवा, संग्रहकियाहुवा ( त्रि० )

**आचित**–गाडाभरा भार, ८००० तोला ( पुं० ) ॥ ८५ ॥

"Aho Shrutgyanam"

**आहृतः** सादरेऽपि स्यात् पूजितेऽप्यभिधेयवत् ।
**आध्मातः** पवनव्याधौ दग्धशब्दितयोस्त्रिषु ॥ ८६ ॥
**आनर्त्तो** नर्त्तनस्थाने देशभेदे रणे जले ।
पाते तदात्वेऽप्यापात **आपत्तिः** प्राप्तिदोषयोः ॥ ८७ ॥
**आप्लुतः** स्नातके पुंसि स्नाते स्यादभिधेयवत् ।
**आयत्तिः** स्नेहमर्यादावशितावलवासरे ॥ ८८ ॥
**आयतिस्तु** यमे दैर्घ्ये प्रभावोत्तरकालयोः ।
**आयस्तस्ते**जिते क्षिप्ते कुपिते क्लेशिते हते ॥ ८९ ॥
**आवर्त्तश्चि**न्तने चाऽऽवर्तने वाप्यम्भसां भ्रमे ।
**आस्फोत**स्त्वर्कपर्णे स्यादास्फोतः कोविदारके ॥ ९० ॥
**आस्फोता** गिरिकर्ण्यां च वनमल्ल्यामपि स्त्रियाम् ।
**आसत्तिः** सङ्गमे लाभे **आहतं** तु मृषार्थके ॥ ९१ ॥

---

**आहृत**–आदरकियाहुवा, पूजाकिया-हुवा, ( त्रि० )
**आध्मात**–वातरोग, दग्ध, शब्दित, ( त्रि० ) ॥ ८६ ॥
**आनर्त**–नृत्यकरनेका स्थान, देशभेद, रण, जल, ( पुं० )
**आपात**–पड़ना, तत्काल, ( पुं० )
**आपत्ति**–प्राप्ति, दोष, ( स्त्री० ) ॥ ८७ ॥
**आप्लुत**–वेदव्रतवाला, (पुं०) स्नानकियाहुवा ( त्रि० )
**आयत्ति**–स्नेह, मर्यादा, वशित्व, बल, वासर (दिन) ( स्त्री० ) ॥ ८८ ॥
**आयति**–यम, लंबापना, प्रभाव आगे आनेवाला काल, ( स्त्री० )
**आयस्त**–तीक्ष्णकियाहुवा, फेंकाहुवा, कुपित, क्लेशित, हत, ( पुं० ) ॥ ८९ ॥
**आवर्त**–चिंतनकरना, आवर्तन (आवृत्ति) करना, जलोंका भँवर (पुं०)
**आस्फोत**–आकका पत्ता, कचनार-वृक्ष, ( पुं० ) ॥ ९० ॥
**आस्फोता**–कोयल-औषधि, वनमल्लिका, ( स्त्री० )
**आसत्ति**–संगम, लाभ, ( स्त्री० )
**आहत**–असत्य अर्थवाला (न०)॥९१॥

"Aho Shrutgyanam"

स्यात्पुरातनवस्त्रेऽपि नववस्त्रेऽपि **वाहतम्** ।
**आहतं** चानकेऽपि स्यात्ताडिते ग्रसिते त्रिषु ॥ ९२ ॥

**इङ्गितं** चेष्टिते गत्यामु**चितं** तु समञ्जसे ।
अनुमत्यां मिताऽभ्यस्तज्ञातेषु त्रिषु च त्रिषु ॥ ९३ ॥

**उच्छ्रितं** तु प्रवृद्धे स्यात् सञ्जातेऽप्युन्नतेऽन्यवत् ।
**उत्तप्तं** शुष्केऽपिशिते संतप्ते च परिप्लुते ॥ ९४ ॥

वृद्धिमत्युन्मनस्केऽपि प्रोद्यते मतमु**त्थितम्** ।
**उच्छ्रितं** तु त्रिषूत्पन्ने प्रोद्यते वृद्धिमत्यपि ॥ ९५ ॥

**उदितं** सूदिते प्राप्तेऽप्युद्गतप्रोक्तयोस्त्रिषु ।
**उद्घातो** मुद्गरे वायुयोगार्थे कुम्भकादिषु ॥ ९६ ॥

**उद्गङ्के** स्खलनेऽप्यर्थाऽऽधानेऽपि समुपक्रमे ।
**स्यादुदन्तस्तु** वार्तायामु**दन्तः** सज्जनेऽपि च ॥ ९७ ॥

---

पुराना वस्त्र, नवीन वस्त्र, ढोल, ताडनाकियाहुवा, ग्रसाहुवा ( त्रि० ) ॥ ९२ ॥

**इंगित**–चेष्टित, गमन, ( न० )

**उचित**–युक्त, अनुमति, ( न० ) प्रमित, अभ्यस्त, ज्ञात, ( त्रि० ) ॥ ९३ ॥

**उच्छ्रित**–प्रवृद्ध, संजात, उन्नत ( ऊँचा ) ( त्रि० )

**उत्तप्त**–सूखामांस,(न०)संतप्त,परिप्लुत ( भिगोयाहुवा ) (त्रि०) ॥ ९४ ॥

**उत्थित**–वृद्धिवाला, उन्मना, अति उद्यमयुक्त, ( त्रि० )

**उच्छ्रित**–उत्पन्नहुवा, अतिउद्यमयुक्त, वृद्धिवाला, ( त्रि० ) ॥ ९५ ॥

**उदित**–उदयहुवा, प्राप्तहुवा, उगलाहुवा, कहाहुवा ( त्रि० )

**उद्घात**–मुद्गर, वायुके अभ्यासकेलिये कुंभकआदि तीन प्राणायाम ॥९६॥ लोटना, पावसे आखलना, धनइकट्ठाकरना, आरंभकरना,

**उदन्त**–वार्त्ता ( वृत्तान्त ), सज्जन, ( पुं० ) ॥ ९७ ॥

"Aho Shrutgyanam"

**त्रिषूद्वान्तः** समुद्गीर्णे पुमान्निर्मददन्तिषु ।
**उदात्तः** स्वरभेदे स्यात् काव्यालङ्करणेऽपि च ॥ ९८ ॥
**उदात्तो** दातृमहतोर्मतो हृद्येऽपि वाच्यवत् ।
**उद्वृत्तं** तु सिते भुक्तोज्झितेऽप्यातोलिते मृते ॥ ९९ ॥
**उन्नतिस्तू**दये वृद्धावुद्गतौ तार्क्ष्ययोषिति ।
**उन्मत्त** उन्मादवति धत्तूरमुचकुन्दयोः ॥ १०० ॥
**उषितं** व्युषिते दग्धेऽप्यू**र्म्मितं** क्षिप्तदग्धयोः ।
**एधतुः** पुरुषे वह्नाव**ंहति**स्त्यागरोगयोः ॥ १०१ ॥
**कपोतः** स्यात्कलरवे कवकाख्ये विहङ्गमे ।
**कलितं** विदितेप्याप्ते स्वीकृतेऽप्यभिधेयवत् ॥ १०२ ॥
**कापोतं** तद्गुणे स्रोतोऽञ्जनखञ्जिकयोरपि ।
**किरातः** पुंसि भूनिम्बे म्लेच्छस्वल्पशरीरयोः ॥ १०३ ॥

---

**उद्वान्त**–उगलाहुवा, ( वमनकिया ) ( त्रि० ) मदरहित हस्ती, ( पुं० )

**उदात्त**–स्वरभेद, काव्यका अलंकार, ॥ ९८ ॥ दातार, बडा, मनोहर, ( त्रि० )

**उद्वृत्त**–बँधाहुवा, खायाहुवा, त्यागाहुवा, तोलाहुवा, मराहुवा, (त्रि०) ॥ ९९ ॥

**उन्नति**–उदय, वृद्धि, ऊपरको गमन, गरुडकी स्त्री ( त्रि० )

**उन्मत्त**–उन्मादवाला, धतूरा, पुष्पवृक्ष विशेष, ( पुं० ) ॥ १०० ॥

**उषित**–रातका रक्खाहुवा, दग्ध, ( त्रि० )

**ऊर्मित**–फेंकाहुवा, दग्धहुवा, (न०)

**एधतु**–पुरुष, अग्नि, ( पुं० )

**अंहति**–त्याग (दान), रोग ( स्त्री० ) ॥ १०१ ॥

**कपोत**–सूक्ष्मशब्द, कवक ( कबूतर ) नाम पक्षी, ( पुं० )

**कलित**–जानाहुवा, प्राप्तहुवा, अंगीकारकियाहुवा, ( त्रि० ) ॥१०२॥

**कापोत**–कपोतों (कबूतरों)का समूह, कालासुरमा, करछी ( न० )

**किरात**–चिरायता, म्लेच्छ, छोटाशरीरवाला, ( पुं० )॥ १०३ ॥

"Aho Shrutgyanam"

वालव्यजनधारिण्यां कुट्टिनीखुरगङ्गयोः ।
स्यात्किरातीति कुर्वंस्तु भृत्ये कर्म्मकरे त्रिषु ॥ १०४ ॥
कृतान्तो यमसिद्धान्तदैवेऽप्यशुभकर्म्मणि ।
क्रन्दितं रोदितेऽपि स्यादाह्वाने कृतरोदने ॥ १०५ ॥
गभस्तिः किरणे सूर्ये पुंसि स्त्री वह्नियोषिति ।
गर्मुत् कार्त्तस्वरे क्लीबं गर्मुच्छाखाभिधायिनि ॥ १०६ ॥
गर्जितो मत्तमातङ्गे गर्जितं जलदध्वनौ ।
गोदन्तो हरिताले स्याद्दंशिते वर्म्मिते त्रिषु ॥ १०७ ॥
गोपतिः पार्थिवे षण्डे रविपण्डितशूलिषु ।
ग्रंथितं गुम्फिताक्रान्तहिंसितेषु त्रिषु स्मृतम् ॥ १०८ ॥
चिन्तातो मोचने गाङ्गचित्ते च चिरजीविनि ।
जगन्वाते पुमान्क्लीबं भुवने जङ्गमे त्रिषु ॥ १०९ ॥

---

**किराती**–चँवरढोरनेवाली, कुट्टिनी, आकाशगंगा, ( स्त्री० )

**कुर्वत् ( न् )**–दास, नौकर ( त्रि० ) ॥ १०४ ॥

**कृतांत**–धर्मराज, सिद्धान्त, भाग्य, अशुभकर्म ( पुं० )

**क्रंदित**–रोना, बुलाना, रुदनकरनेवाला, ( त्रि० ) ॥ १०५ ॥

**गभस्ति**–किरण, सूर्य, ( पुं० ) अग्निकी स्त्री ( स्त्री० )

**गर्मुत्**–सुवर्ण, ( न० ) शाखाओंका बखानकरनेवाला ( पुं० ) ॥ १०६ ॥

**गर्जित**–मदोन्मत्त हस्ती, ( पुं० ) मेघकी ध्वनि ( न० )

**गोदन्त**–हरताल, कंचुक आदिधारणकिये, कवच धारणकिये ( त्रि० ) ॥ १०७ ॥

**गोपति**–राजा, हीजड़ा, सूर्य, पण्डित, महादेव, ( पुं० )

**ग्रंथित**–गूँथाहुवा, दबायाहुवा, माराहुवा, ॥ १०८ ॥ चिंतासे छुडाना, गंगाको चिंतनकरनेवाला, चिरजीवी ( त्रि० )

**जगत्( न् )**–वायु, ( पुं० ) भुवन, जंगम ( चलनेवाला ) ( त्रि० ) ॥ १०९ ॥

"Aho Shrutgyanam"

**जगती** जगति क्ष्मायां छन्दोभेदे जनेऽपि च ।
**जयन्ती** त्वथ गौरीन्द्रपुत्री जरा द्रुमान्तरे ॥ ११० ॥
वैजयन्त्यां **जयन्तस्तु** पाकशासनिहीरयोः ।
**जामाता** दयिते सूर्यावर्त्ते तु दुहितुः पतौ ॥ १११ ॥
**जीमूतो** जलदे शक्रे घोषेपि वृद्धिजीविनि ।
देवताडेऽपि **जीमूतो जीमूतः** पर्वतेऽपि च ॥ ११२ ॥
**जीवातुरस्त्रियां** भक्ते जीविते जीवनौषधौ ।
**जीवन्ती** जीवनीवृक्षे शमीवन्दाऽमृतासु च ॥ ११३ ॥
**जृम्भितं** करणे स्त्रीणां वेष्टिते स्फुटिते त्रिषु ।
**ज्वलितो** भास्करे दग्धे **वानितं** तनितांशुके ॥ ११४ ॥
वाद्यभाण्डे गुणे विस्तारे तेषु त्रिषु **तानितम्** ।
**तृणता** तु तृणत्वे स्यात् **तृणता** कार्मुकेऽपि च ॥ ११५ ॥

---

**जगती**–जगत्, पृथ्वी, छन्दोभेद, जन ( मनुष्यआदि ) ( स्त्री० )

**जयन्ती**–गौरी ( पार्वती ), इन्द्रपुत्री, वृद्धाऽवस्था, वृक्षभेद ( स्त्री० ) ॥ ११० ॥ पताका, ( स्त्री० )

**जयन्त**–इंद्रका पुत्र, हीरा-रत्न, (पुं०)

**जामा(तृ)ता**–प्रिय, सूर्यावर्तमणि, पुत्रीका पति, ( पुं० ) ॥ १११ ॥

**जीमूत**–मेघ, इंद्र, शब्द, वृद्धिजीवी ( व्याज लेनेवाला ), देवताड-वृक्ष, पर्वत, ( पुं० ) ॥ ११२ ॥

**जीवातु**–भक्त, (भात), जीवित, जीनेकी औषधि, ( पुं० न० )

**जीवन्ती**–काकोली-वृक्ष, जांट वृक्ष, वृक्षमें उपजा वृक्ष, गिलोय (स्त्री०) ॥ ११३ ॥

**जृंभित**–स्त्रियोंका करण ( चेष्टा ), लपेटाहुवा, फूटाहुवा, ( त्रि० )

**ज्वलित**–सूर्य, दग्ध, ( पुं० )

**वानित**–तनाहुवा वस्त्र, ( न० ) ॥ ११४ ॥

**तानित**–बाजाका पात्र, तार, विस्तार, ( त्रि० )

**तृणता**–तृणभाव, धनुष, ( स्त्री० ) ॥ ११५ ॥

"Aho Shrutgyanam"

**त्रिगर्त्तः** स्याज्जनपदे **त्रिगर्त्तो** गणितान्तरे ।
विषयेऽपि **त्रिगर्त्ता** तु घुर्घुरीकामुकस्त्रियोः ॥ ११६ ॥
**त्वरितं** प्रजवे शीघ्रे **दुर्गतिर्निरये** स्त्रियाम् ।
दारिद्र्येऽप्यथ **दुर्जातं** कुजाते व्यसने तथा ॥ ११७ ॥
**दृष्टान्तस्तु** पुमाञ्शास्त्रे स्यादुदाहरणेपि च ।
**दंशितं** वर्म्मिते दष्टे **द्रवन्ती** सरिदन्तरे ॥ ११८ ॥
मधौ चैव **द्विजातिस्तु** द्विजन्मनि विहङ्गमे ।
**धीमान्**वाचस्पतौ पुंसि धीरे बुद्धिमति त्रिषु ॥ ११९ ॥
**निकृतं** विप्रलम्भेऽपि नीचे विप्रकृतेऽपि च ।
**निकृतिर्भर्त्सने** क्षेपे **निकृतिः** शठशाठ्ययोः ॥ १२० ॥
**निमित्तं** लक्षणे हेतौ **निमित्तं** पर्वणि स्मृतम् ।
**आगन्तुर्देवादेशे** च **नियतिर्नियमे** विधौ ॥ १२१ ॥

---

**त्रिगर्त**–त्रिगर्तदेश, मनुष्य, गणितभेद, देश, ( पुं० )

**त्रिगर्ता**–घुर्घुरिया-क्रीडा, संभोग इच्छावाली स्त्री ( स्त्री० ) ॥ ११६ ॥

**त्वरित**–वेग, शीघ्रता, ( न० )

**दुर्गति**–नरक, दारिद्र्य, ( स्त्री० )

**दुर्जात**–कुत्सितजन्मवाला, व्यसन, ( न० ) ॥ ११७ ॥

**दृष्टान्त**–शास्त्र, उदाहरण, (पुं० )

**दंशित**–कवचधारणकियाहुवा, काटाहुवा ( त्रि० )

**द्रवन्ती**–नदी, ( स्त्री० ) ॥ ११८ ॥ मुलहटी-बेल, ( स्त्री० )

**द्विजाति**–ब्राह्मणआदि, पक्षी, (पुं०)

**धीमान्**(त्)–बृहस्पति, ( पुं० ) धीर, बुद्धिमान्, ( त्रि० ) ॥ ११९ ॥

**निकृत**–ठगना, नीच, बिगाडाहुवा, ( न० )

**निकृति**–झिड़कना, फेंकना, शठ, शठता, ( स्त्री० ) ॥ १२० ॥

**निमित्त**–लक्षण, हेतु, पर्व, ( न० )

**आगन्तु**–देवआज्ञा, ( पुं० )

**नियति**–नियम, भाग्य, ( स्त्री० ) ॥ १२१ ॥

"Aho Shrutgyanam"

**निरस्तः** प्रेषितशरे संत्यक्ते त्वरितोदिते ।
निष्ठ्यूतेऽपि प्रतिहते **निर्म्मित**स्त्वनुपद्रुते ॥ १२२ ॥
दिक्पालकालपर्णौ तु पुंस्त्रियोः स्यादनुक्रमात् ।
**निर्वृत्तिः** सुस्थितासौख्यनिर्वाणाऽस्तङ्गमाध्वसु ॥ १२३ ॥
**निर्मुक्त**स्त्यक्तसङ्गे स्यात् त्यक्तकञ्चुकपन्नगे ।
**निर्वातो** वातविगते व्याश्रये दृढवर्म्मणि ॥ १२४ ॥
**निशान्त**स्त्रिषु शान्ते स्या**न्निशान्तो** भवनोषसोः ।
**पञ्चता** मृत्युमात्रेऽपि पञ्चभावेऽपि **पञ्चता** ॥ १२५ ॥
**पण्डितः** सिह्लके धीरे **पतत्**पातुकपक्षिणोः ।
**पद्धतिः** पथि पङ्क्तौ च **परेतो** वाच्यवन्मृते ॥ १२६ ॥
भूतभेदेऽप्यथ गिरौ सुरर्षावपि **पर्वतः** ।
**पर्याप्तं** वारणतुष्टियथेष्टेष्वाप्तशक्तयोः ॥ १२७ ॥

---

**निरस्त**–फेंकाहुवा बाण, त्यागाहुवा, शीघ्रकहाहुवा, थूकाहुवा, माराहुवा, ( पुं० )

**निर्मित**–उपद्रवरहित, (पुं०)॥१२२॥ दिक्पाल, (पुं०) तगर-वृक्ष, (स्त्री०)

**निर्वृति**–सुस्थिता, सौख्य, मृत्यु होना, अस्त होना, मार्ग, (स्त्री०) ॥१२३॥

**निर्मुक्त**–त्यागा है संग जिसने वह, कँचुलीसे मुक्तहुवा सर्प ( पुं० )

**निर्वात**–वायुरहित होना, आश्रय, दृढ कवच ( पुं० ) ॥ १२४ ॥

**निशान्त**–शान्त, ( त्रि० )**निशान्त**-घर, प्रभात-काल ( पुं० )

**पंचता**–मृत्यु, पाँचोंका भाव ( पंचपना ) ( स्त्री० ) ॥ १२५ ॥

**पंडित**–हींग, विद्वान्, ( पुं० )

**पतत्**–पडनेवाला, पक्षी, ( त्रि० )

**पद्धति**–मार्ग, पंक्ति, ( स्त्री० )

**परेत**–मृतक ॥ १२६ ॥ भूतभेद, ( पुं० )

**पर्वत**–पहाड़, एक सुरर्षि, ( पुं० )

**पर्याप्त**–मनह करना, तुष्टि, यथेष्ट (न०)मान्य, समर्थ, (पुं०)॥१२७॥

"Aho Shrutgyanam"

विनाशदोषकृच्छ्रेषु दण्डे तु मतमव्ययम् ।
पर्याप्तिस्तु प्रकामे स्यात्प्राप्तौ च परिरक्षणे ॥ १२८ ॥
पर्यस्तः पतितक्षिप्तनिहतेषु त्रिषु त्रिषु ।
पलितं केशपांडुत्वे पङ्के तापेऽपि शैलजे ॥ १२९ ॥
पक्षतिः पक्षमूले स्यात्प्रतिपद्यपि पक्षतिः ।
पार्वती द्रौपदी दुर्गा जीवन्ती शल्लकीद्रुमे ॥ १३० ॥
पिण्डितो गणिते सान्द्रे पित्सन् पातेऽपि पक्षिणि ।
पिशिता मांसिकायां स्यात्पिशितं पलले मतम् ॥ १३१ ॥
पीडितं करणे स्त्रीणां यन्त्रिते बाधितेऽपि च ।
पुटितं स्यात्करपुटे प्रसृतिस्स्यूतपोटिते ॥ १३२ ॥
पृषतोऽपि पृषद्बिन्दौ मृगे तु पृषतः पृषन् ।
स्याद्दुःस्वरेऽहितेऽप्येवं श्वेतबिन्दुयुतेऽन्यवत् ॥ १३३ ॥

---

**पर्यास्त**–विनाश, दोष, कृच्छ्र, ( कष्ट ) दंड, ( अव्यय )

**पर्याप्ति**–प्रकाम (अति इच्छा), प्राप्ति, अच्छी रक्षा, ( स्त्री० ) ॥ १२८ ॥

**पर्यस्त**–पड़ाहुवा, फेंकाहुवा, माराहुवा, ( त्रि० )

**पलित**–केशोंकी सफेदी, कींच, ताप, शिलाजीत ( न० ) ॥ १२९ ॥

**पक्षति**–पक्षीकी मूल, प्रतिपदा-तिथि, ( स्त्री० )

**पार्वती**–द्रौपदी, दुर्गा, हरड-वृक्ष, शालई-वृक्ष, ( स्त्री० ) ॥ १३० ॥

**पिंडित**–गणित कियाहुवा, इकट्ठा कियाहुवा, ( पुं० )

**पित्स(त्)न्**–पडना, पक्षी, ( न० पुं० )

**पिशिता**–जटामांसी–औषधि,(स्त्री०)

**पिशित**–मांस, ( न० ) ॥ १३१ ॥

**पीडित**–स्त्रियोंका आभूषण, वशमें कियाहुवा, पीडा कियाहुवा (त्रि०)

**पुटित**–हाथका पुट, ( न० )

**प्रसृति**–आधी अंजलि, थैली, पुटकियाहुवा, ( स्त्री० ) ॥ १३२ ॥

**पृषत**–( पुं० ) **पृषत्**–( न० ) जल आदिकी बूँद, **पृषत–पृषत्**, हिरण, ( पुं० ) बुरे शब्दवाला, शत्रु, सफेद बुँदकीवाला (त्रि०) ॥१३३॥

"Aho Shrutgyanam"

**प्रकृति**स्तु सत्त्वरजस्तमसां साम्यमात्रके ।
स्वभावाऽमात्यपौरेषु लिङ्गे योनौ तथाऽऽत्मनि ॥ १३४ ॥
**प्रकृतं** प्रस्तुतेऽपि स्यात्**प्रकृतः** प्रकृतिस्थिते ।
**प्रचितः** शकटोन्मेये पलानामयुतद्वये ॥ १३५ ॥
**प्रणीतः** संस्कृताग्नौ स्याद्वाच्यलिङ्गः प्रवेशिते ।
संस्कृते चोपपन्ने निक्षिप्ते विहितेऽपि च ॥ १३६ ॥
**प्रतीतः** सादरे ख्याते हृष्टे दृष्टे विरक्षणे ।
**प्रतीत** एते ज्ञाते च **प्रतति**र्व्रततौ ततौ ॥ १३७ ॥
**प्रपातो** निर्झरे कृच्छ्रे पतनावटयोरपि ।
**प्रभूत**मुद्गते प्राज्ये **प्रमीतः** प्रोक्षिते मृते ॥ १३८ ॥
**प्रवृत्ति**र्वृत्तिवार्त्तान्तप्रवाहेषु प्रवर्त्तने ।
**प्रसूतिः** प्रसवोत्पत्तिपुत्रेषु दुहितर्यपि ॥ १३९ ॥

---

**प्रकृति**—सत्त्व, रजस्, तमस्, इनकी सम अवस्था; स्वभाव, मंत्री, प्रजा, लिंग, योनि, आत्मा, ( स्त्री० ) ॥ १३४ ॥

**प्रकृत**—प्रस्तुत ( प्रसंग ) ( न० ) स्वभावमें स्थित, ( त्रि० )

**प्रचित**—गाडाभर, ८०००० तोला प्रमाण, ( पुं० ) ॥ १३५ ॥

**प्रणीत**—संस्कार कियाहुवा अग्नि, ( पुं० ) प्रवेश कियाहुवा, (त्रि०) संस्कार कियाहुवा, पास रक्खाहुवा, स्थापन कियाहुवा, रचाहुवा, ( त्रि० ) ॥ १३६ ॥

**प्रतीत**—आदरयुक्त, विख्यात, प्रसन्नहुवा, देखाहुवा, रक्षाकियाहुवा, गयाहुवा, जानाहुवा ( त्रि० )

**प्रतति**—बेल, पंक्ति, (स्त्री०) ॥१३७॥

**प्रपात**—झिरना, कष्ट, पड़ना, गड्ढा, ( पुं० )

**प्रभूत**—उद्गत, बहुत, ( न० )

**प्रमीत**—प्रोक्षित ( सेचन कियाहुवा ), मराहुवा, (पुं०) ॥ १३८ ॥

**प्रवृत्ति**—वृत्ति ( जीविका ), वृत्तान्त, प्रवाह, प्रवर्तन ( स्त्री० )

**प्रसूति**—जन्म, उत्पत्ति, पुत्र, पुत्री, ( स्त्री० ) ॥ १३९ ॥

"Aho Shrutgyanam"

**प्रसूतं** कुसुमे क्लीबं वाच्यवल्लब्धजन्मनि ।
**प्रसूता** तु प्रजातायां जंघायां **प्रसृता** मता ॥ १४० ॥
**प्रसृतो**ऽर्धाञ्जलौ सम्प्रसारे वेगिविनीतयोः ।
**प्रवृतं** वितते क्षुण्णे **प्रोक्षितं** सिक्त आहते ॥ १४१ ॥
**प्रार्थितं** याचिते शत्रुरुद्धेऽप्यभिहते त्रिषु ।
**वर्द्धितं** पूरिते छिन्ने **वार्द्धितं** वृद्धिशालिनि ॥ १४२ ॥
**बृहती** महतीकण्टकारिकाकलशीषु च ।
वाचि च क्षुद्रवार्त्ताक्यां छन्दोभेदोत्तरीययोः ॥ १४३ ॥
**भरत**स्तु नटे नाट्यशास्त्रे रामाऽनुजे पुमान् ।
दौष्यन्तौ शबरे तन्तुवायेऽपि **भरतः** स्मृतः ॥ १४४ ॥
**भवती** बाणभेदे स्यात्त्रिषु युष्मत्सदर्थयोः ।
व्यासर्षिभाषिते ग्रन्थे जम्बूद्वीपेऽपि **भारतः** ॥ १४५ ॥

---

**प्रसूत**–पुष्प, ( न० ) उत्पन्नहुवा ( त्रि० )
**प्रसूता**–उत्पन्न हुई–कन्या ( स्त्री० )
**प्रसृता**–जंघा ( स्त्री० ) ॥ १४० ॥
**प्रसृत**–आधी अंजलि, अच्छी तरह फैलाहुवा, वेगवाला, नम्रतावाला, ( त्रि० )
**प्रवृत**–विस्तारवाला, कटाहुवा,(त्रि० )
**प्रोक्षित**–सींचाहुवा, अच्छी तरह माराहुवा ( त्रि० ) ॥ १४१ ॥
**प्रार्थित**–याचना कियाहुवा, शत्रुका रोकाहुवा, माराहुवा ( त्रि०)
**वर्द्धित**–पूराहुवा, छेदन कियाहुवा, वृद्धिवाला, ( त्रि० ) ॥ १४२ ॥
**बृहती**–बडी–स्त्रीआदि, कटेहली, कलशी, वाणी, छोटा बैंगन, छंदोभेद, डुपट्टा, ( स्त्री० ) ॥ १४३ ॥
**भरत**–नट, नाट्यशास्त्र, रामका छोटा भ्राता, दुष्यन्तराजाका पुत्र, शबरजाति, जुलाहा, (पुं०) ॥ १४४ ॥
**भवती**–बाणभेद, युष्मद्–अर्थ, सत्–अर्थ, ( त्रि० )
**भारत**–भारत–इतिहास, जंबूद्वीप, ( पुं० ) ॥ १४५ ॥

"Aho Shrutgyanam"

वाग्वाणीपक्षिणीभेदवृत्तिभेदेषु **भारती** ।
**भावितं** वासिते लब्धे ध्यातेऽप्युत्पादिते त्रिषु ॥ १४६ ॥
**भासन्तो** भासविहगे सुन्दरेऽप्यभिधेयवत् ।
**भास्वाना**भास्वरे सूर्ये **भूभृद्भू**पालशैलयोः ॥ १४७ ॥
**मथितं** निर्जलोदश्वित्यनववृष्टलोडिते ।
**मरुत्पुंसि** सुरे वाते **महद्राज्ये** नपुंसकम् ॥ १४८ ॥
नारदस्य तु वीणायां **महती** स्यात्पृथौ त्रिषु ।
**मालती** जातियुवतिज्योत्स्नानिक्षु सरिद्भिदि ॥ १४९ ॥
काकमाच्यग्निशिखयो**र्मुषितं** खण्डिते हृते ।
**मूर्च्छितं** मोहसंप्राप्ते सोच्छ्रयेऽपि दृढेऽपि च ॥ १५० ॥
**रजतं** रूप्यहारेभदन्तेषु विशदे त्रिषु ।
**रमति**र्नायके स्वर्गे **रसितं** स्वनिते रुते ॥ १५१ ॥

---

**भारती**–वचन, सरस्वती, पक्षि(णी) भेद, वृत्तिभेद, ( स्त्री० )
**भावित**–भिगोयाहुवा, लब्धहुवा, ध्यानकियाहुवा, उत्पादन कियाहुवा ( त्रि० ) ॥ १४६ ॥
**भासन्त**–भास-पक्षी, ( पुं० ) सुन्दर, ( त्रि० )
**भास्वान्**–तेजस्वी, सूर्य, ( पुं० )
**भूभृत्**–राजा, पर्वत, ( पुं० )॥१४७॥
**मथित**–निर्जलछाछ, घोलाहुवा, मथाहुवा ( न० )
**मरुत्**–देवता, वायु, ( पुं० )
**महत्**–राज्य, ( न० ) ॥ १४८ ॥
**महती**–नारदमुनिकी वीणा, ( स्त्री० ) पृथु ( स्थूल ) ( त्रि० )
**मालती**–चमेली, जवान स्त्री,सफेदफूलकी तोरई, रात्रि, एकनदी, मकोय, ॥ १४९ ॥ चौलाई शाक, (स्त्री०)
**मुषित**–खंडित, हृत ( हडाहुवा ) ( त्रि० )
**मूर्छित**–मोहको प्राप्त, बढाहुवा, दृढ, ( त्रि० ) ॥ १५० ॥
**रजत**–चाँदी, हार, हस्तिदन्त, शुक्ल ( सफेद ) ( त्रि० )
**रमति**–स्वामी, स्वर्ग, ( पुं० )
**रसित**–शब्दयुक्त, शब्द, ॥ १५१ ॥

"Aho Shrutgyanam"

स्वर्णादिखचिते तु स्यात्रिष्वेव **रसितं** मतम् ।
**रेवती** हलिकान्तायां ताराभेदेऽपि मातृषु ॥ १५२ ॥

**रैवतः** शैलभेदे स्यात्सुवर्णालौ हरेश्वरे ।
सरलेऽन्द्रायुधे वीरे रुधिरेऽपि च **रोहितम्** ॥ १५३ ॥

**रोहितो** लोहिते मीने मृगभेदेऽपि रोहिणि ।
**रोहिद**र्के पुमानेव मता **रोहिल्ल**तान्तरे ॥ १५४ ॥

**ललितं** हारभेदे स्यात्रिष्वेव ललितेष्टयोः ।
**लोहितं** कुङ्कुमे रक्ते गोशीर्षे रक्तचन्दने ॥ १५५ ॥

पुंस्येव मङ्गले रक्ते नदे नागे व **लोहितः** ।
**वनिता** जनितात्यर्थरागयोषिति योषिति ॥ १५६ ॥

**वनितं** याचिते क्लीबं शोधिते **वनितं** त्रिषु ।
**वसतिः** स्यान्निशावेश्मावस्थानेष्वर्हदाश्रमे ॥ १५७ ॥

---

स्वर्णादिसे जडाहुवा, ( त्रि० )
**रेवती**—बलदेवजीकी स्त्री, रेवती-नक्षत्र, मातृभेद (स्त्री०) ॥१५२॥

**रैवत**—एकपर्वत, सोनाली-वृक्ष, शिव, ईश्वर, ( पुं० )

**रोहित**—सीधा, इंद्रका धनुष, वीर, रुधिर, ( न० ) ॥ १५३ ॥

**रोहित**—लोहित ( लालवर्ण ), मच्छी, मृगभेद, रोहेडा-वृक्ष ( पुं० )

**रोहित**—सूर्य या आक ( पुं० ) लताभेद, ( स्त्री० ) ॥ १५४ ॥

**ललित**—हारभेद, सुंदर, प्रिय, (त्रि०)
**लोहित**—केसर, कसूँभाआदि, हरिचंदन-वृक्ष, रक्तचंदन, ( न० ) ॥ १५५ ॥

**लोहित**—मंगल-ग्रह, रक्त-वर्ण, एक-नद, हस्ती ( पुं० )

**वनिता**—जिसमें अतिप्रीति है वह स्त्री, स्त्रीमात्र, ( स्त्री० ॥ १५६ ॥

**वनित**—याचना कियाहुवा ( न० ) शोधाहुवा, ( त्रि० )

**वसति**—रात्रि, मकान, स्थिति, अर्हतदेवका आश्रम ( स्त्री० ) ॥१५७॥



"Aho Shrutgyanam"

**वहतु**र्वृषभे पान्थे **वहतिः** सचिवे गवि ।
**वापितं** वाच्यवद्वीजाकृतमुण्डितयोर्म्मतम् ॥ १५८ ॥
**वासन्तः** कोकिले मुद्गे करभेऽवहिते विटे ।
**वासन्ती** माधवीयूथ्योर्वासन्ती पाटलावपि ॥ १५९ ॥
**वासिता** करिणीनार्योर्वासितं विहगारवे ।
ज्ञाने त्रिष्वेव वसनवेष्टिते सुरभीकृते ॥ १६० ॥
**विकृत**स्त्रिषु बीभत्से रोगिते स्यादसंस्कृते ।
डिम्बे रोगे च **विकृति**र्विंगतो निष्प्रभे गते ॥ १६१ ॥
**विच्छित्ति**रङ्गरागे स्यादपि विच्छेदहावयोः ।
**विजाता** तु प्रसूतायां विकृते जनिते त्रिषु ॥ १६२ ॥
**विततं** तु मतं व्याप्ते विस्तृतेऽप्यभिधेयवत् ।
**विद्यु**त्तडिति सन्ध्यायां स्त्रियां त्रिष्वेव निष्प्रभे ॥ १६३ ॥

---

**वहतु**–वृषभ, बटाऊ, ( पुं० )

**वहति**–मंत्री, गौ, ( पुं० स्त्री० )

**वापित**–बीजबोयाहुवा खेत, मुँडाहुवा ( त्रि० ॥ १५८ ॥

**वासन्त**–कोयल, मूँग, उष्ट्र, सावधान, कामी, ( पुं० )

**वासन्ती**–माधवीलता, जूही, ललालोध ( स्त्री० ) ॥ १५९ ॥

**वासिता**–हथिनी, स्त्री, ( स्त्री० )

**वासित**–पक्षीका शब्द, ज्ञान, (न०) वस्त्रसे लपेटाहुवा, सुगंधितकियाहुवा, ( त्रि० ) ॥ १६० ॥

**विकृत**–क्रूर, रोगी, नहीं संस्कारकियाहुवा, ( पुं० )

**विकृति**–लूटनाआदिपीडा, रोग, ( स्त्री० )

**विगत**–कांतिहीन, गयाहुवा, ( पुं० ) ॥ १६१ ॥

**विच्छित्ति**–अंगराग, वियोग, हाव, ( स्त्रियोंकी चेष्टा ) ( स्त्री० )

**विजाता**–प्रसूतिका स्त्री, ( स्त्री० ) बिगड़ाहुवा, उत्पन्नहुवा, ( त्रि० ) ॥ १६२ ॥

**वितत**–व्याप्त, विस्तारवाला, (त्रि०)

**विद्युत्**–बिजली, सन्ध्या, ( स्त्री० ) प्रभारहित, ( त्रि० ) ॥ १६३ ॥

"Aho Shrutgyanam"

**विदितं** स्वीकृते ज्ञाते **विधाता** वेधसि स्मरे ।
**विनतः** प्रणते भुग्ने शिक्षितेऽप्यभिधेयवत् ॥ १६४ ॥
**विनता** वैनतेयस्य जनन्यां पिडिकान्तरे ।
**विनीतः** सुवहाश्वे स्याद्विनयाढ्ये जितेन्द्रिये ॥ १६५ ॥
उपनीतेऽपनीतेऽपि निभृते वणिजि त्रिषु ।
**विनेता**ऽऽदेशके राज्ञि **विपत्तिर्**याचनापदोः ॥ १६६ ॥
**विवृता** क्षुद्ररोगे स्याद्**विवृतं** तु त्रिषु त्रिषु ।
**विवर्त्तं** समुदाये स्यादप्रवर्त्तननृत्ययोः ॥ १६७ ॥
**विविक्तं** विजने पूतेऽप्यसंपृक्तविवेकिनि ।
**विश्रुतं** ज्ञातसंहृष्टप्रतीतेषु त्रिषु त्रिषु ॥ १६८ ॥
**विश्वस्त**स्त्रिषु विश्रब्धे **विश्वस्ता** विधवा स्त्रियाम् ।
**विहस्तो** हस्तरहिते विह्वले षण्ढकेऽपि च ॥ १६९ ॥

---

**विदित**–स्वीकारकियाहुवा, जानाहुवा, ( त्रि० )

**विधातृ**(ता)–ब्रह्मा, कामदेव, (पुं०)

**विनत**–नम्र, मुड़ाहुवा, शिक्षाकिया- हुवा ( त्रि० ) ॥ १६४ ॥

**विनता**–गरुडकी माता, फुन्सीभेद, ( त्रि० )

**विनीत**–अच्छा चलनेवाला अश्व, वि- नयसे युक्त, जितेन्द्रिय, ॥ १६५ ॥ यज्ञोपवीतदियाहुवा, दूरकियाहुवा, नम्र, वणिक्, ( त्रि० )

**विनेतृ(ता)** आज्ञाकरनेवाला, राजा, ( पुं० )

**विपत्ति**–याचना, आपत् ( दि ), वर्ष, ( स्त्री० ) ॥ १६६ ॥

**विवृता**–क्षुद्र–रोग, (स्त्री०) युक्त देश, हुवा, ( त्रि० )

**विवर्त**–समूह, नहींढक ल्टू (रेती), ( न० ) ॥ १६७ ॥ स्त्री० )

**विविक्त**–विजन ( एव न० ) अच्छी- नहीं मिलाहुवा, विउवा, ( त्रि० )

**विश्रुत**–जानाहुवा ौति, ध्रुवकी मात ख्यातहुवा, (

**विश्वस्त**–जिसक लसे दोहीजाय वह गौ, ( त्रि० )

**विश्वस्ता**–वि

**विहस्त**–हस न्तदेव, श्रेष्ठव्रत, ( पुं० )
( पुं० ) ॥

"Aho Shrutgyanam"

**वृत्तान्तो** भावकार्त्स्न्ये स्यादपि वार्ताप्रकारयोः ।
प्रक्रियायां प्रकरणेऽप्येकान्तेऽपि क्वचिन्मतः ॥ १७० ॥

**वेल्लितं** कम्पिते वक्रे प्लुते स्याद्वेल्लितं गतौ ।
**वेष्टितं** करणे स्त्रीणां लसके चावृते त्रिषु ॥ १७१ ॥

**व्याघात**स्त्वन्तराये स्याद्योगभेदप्रहारयोः ।
**व्यायतं** तु दृढे दीर्घे व्यापृतेऽतिशयेऽन्यवत् ॥ १७२ ॥

**शकुन्तो** विहगे पक्षिभेदे भासाख्यपक्षिणि ।
**शुद्धान्तो**न्तःपुरे कक्षान्तरे रहसि च स्मृतः ॥ १७३ ॥

राजयोषिति **शुद्धान्ता श्रीपतिः** नृपकृष्णयोः ।
**श्रीमां**स्तिलकवृक्षे स्यादीश्वरेऽपि मनोहरे ॥ १७४ ॥

**सङ्घातः** संहते पुंसि प्रहारे नरकान्तरे ।
**सङ्गतिः** सङ्गते ज्ञाने **सन्नति**र्नुतिशब्दयोः ॥ १७५ ॥

---

**वृत्तान्त**–भावसंपूर्णता, वार्ता, प्रकार, प्रक्रिया, प्रकरण, एकान्त, ( पुं० ) ॥ १७० ॥

**वेल्लित**–कँपाहुवा, टेढा, उछलाहुवा, ( त्रि० ) गमन ( न० )

**वेष्टित**–स्त्रियोंका करण ( हावादि ), शोभित, घिराहुवा, (त्रि०)॥१७१॥

**व्याघात**–विघ्न, विष्कंभआदिकोंमें एक योग, प्रहार ( चोट ) ( पुं० )

**व्यायत**–दृढ, लंबा, व्यापारयुक्त, अतिशय, ( त्रि० ) ॥ १७२ ॥

**शकुन्त**–पक्षिमात्र, पक्षिभेद, भास पक्षी ( पुं० )

**शुद्धान्त**–रनवास, ड्यौढी, एकान्त ( पुं० ) ॥ १७३ ॥

**शुद्धान्ता**–राज्ञी, ( रानी ) ( स्त्री०

**श्रीपति**–राजा, श्रीकृष्ण ( पुं० )

**श्रीमान्**–तिलकपुष्प-वृक्ष, ईश्वर, सुंदर ( पुं० ) ॥ १७४ )

**संघात**–समूह, प्रहार, नरकभेद, (पुं०

**संगति**–संग, ज्ञान, ( स्त्री० )

**सन्नति**–नमस्कार, शब्द, ( स्त्री० ॥ १७५ ॥

"Aho Shrutgyanam"

**सन्तति**स्तनयापुत्रगोत्रविस्तारपङ्क्तिषु ।
परम्पराभावेऽपि स्यात्**समाप्ति**स्तु समर्थने ॥ १७६ ॥
विनाशे **संमति**स्तु स्यादनुमत्यभिलाषयोः ।
**समितिः** सङ्गरे साम्ये सभायां सङ्गमेऽपि च ॥ १७७ ॥
**संविदा**जौ प्रतिज्ञायामाचारज्ञानयोः स्त्रियाम् ।
**संवित्तिः** प्रतिपत्तौ स्यादविवादे जनस्य च ॥ १७८ ॥
**संवर्त्तः** पुंसि कल्पान्ते हायने च कलिद्रुमे ।
**सिकता** सिकतायुक्तदेशे स्यादामयान्तरे ॥ १७९ ॥
**सिकता** वालुकायां स्युः शर्करायामपीष्यते ।
**सुकृतं** तु शुभे पुण्ये क्लीबं सुविहिते त्रिषु ॥ १८० ॥
**सुनीतिः** शोभननये **सुनीति**र्ध्रुवमातरि ।
**सुव्रता** सुखसन्दोह्यगवर्हत्सद्व्रतेषु च ॥ १८१ ॥

---

**सन्तति**–पुत्री, पुत्र, गोत्र, विस्तार, पङ्क्ति, पारम्पर्य ( परंपरापना ) ( स्त्री० )

**समाप्ति**–समर्थन ॥ १७६ ॥
विनाश या अंत, ( स्त्री० )

**संमति**–अनुमति, अभिलाषा, (स्त्री०)

**समिति**–युद्ध, समता, सभा, संगम, ( स्त्री० ) ॥ १७७ ॥

**संवित्**–युद्धभूमि, प्रतिज्ञा, आचार, ज्ञान, ( स्त्री० )

**संवित्ति**–सिद्धि, जनका अविवाद, ( स्त्री० ) ॥ १७८ ॥

**संवर्त**–कल्पका अंत ( प्रलय ), वर्ष, बहेडा-वृक्ष, ( पुं० )

**सिकता**–सिकता ( बालू ) युक्त देश, रोगभेद, ॥ १७९ ॥ बालू (रेती), ( स्त्री० न० ) डली, ( स्त्री० )

**सुकृत**–शुभ, पुण्य, ( न० ) अच्छी-तरह विधानकियाहुवा, ( त्रि० ) ॥ १८० ॥

**सुनीति**–अच्छीनीति, ध्रुवकी मात ( स्त्री० )

**सुव्रता**–जो सुखसे दोहीजाय वह गौ, ( स्त्री० )

**सुव्रत**–अर्हन्तदेव, श्रेष्ठव्रत, ( पुं० ) ॥ १८१ ॥

"Aho Shrutgyanam"

**सुरतं** स्यान्निधुवने सुरत्वे **सुरता** मता ।
**सुहित**स्त्रिषु तृप्ते स्यादुक्ते सुष्ठुहितेऽपि च ॥ १८२ ॥
**सूनृतं** मङ्गले सत्यप्रियवाचि न वाच्यवत् ।
**संस्कृतं** लक्षणोपेते कृत्रिमे त्रिषु **संस्कृतः** ॥ १८३ ॥
भूषितेऽपि प्रशस्तेऽपि **संहतं** सङ्गते दृढे ।
**स्खलितं** तूचिताद्भ्रंशे **स्खलितं** चलिते त्रिषु ॥ १८४ ॥
**स्तमितं** वीतचाञ्चल्येप्यार्द्रीभूतेऽपि वाच्यवत् ।
**स्थपतिः** शल्यभेदे स्यादपि कञ्चुकिसूतयोः ॥ १८५ ॥
जीवेष्टियाजके चाऽथ **स्थापितं** न्यस्तनिश्चिते ।
**सुवर्णा** तु मता नद्यां सरिदौषधिभेदयोः ॥ १८६ ॥
**हरिता** मण्डलायां स्याद् हरिद्वर्णयुते त्रिषु ।
**हरिद्वा**हे च पुंस्येव **हरितः** ककुभि स्त्रियाम् ॥ १८७ ॥

---

**सुरत**–स्त्रीसंग, ( मैथुन ) ( न० )

**सुरता**–सुरभाव ( देवपना ) (स्त्री०)

**सुहित**–तृप्तहुवा, ( त्रि० ) कहाहुवा, अच्छा हित, ( न० ) ॥ १८२ ॥

**सुनृत**–मंगल, सत्य और प्रिय वचन ( न० )

**संस्कृत**–लक्षणसे युक्त, कृत्रिम (नकली ) ॥ १८३ ॥
भूषित, प्रशस्त ( श्रेष्ठ ) ( त्रि० )

**संहत**–संगत, दृढ, ( त्रि० )

**स्खलित**–उचितसे गिरना, ( न० ) चलित ( त्रि० ) ॥ १८४ ॥

**स्तमित**–चंचलतारहित, गीलाहुवा, ( त्रि० )

**स्थपति**–शल्यभेद, चोल ( अंगरखा) धारण किये, सारथि, ॥ १८५ ॥
जीवेष्टि यजनकरनेवाला, ( पुं० )

**स्थापित**–स्थापन कियाहुवा, निश्चित कियाहुवा, ( त्रि० )

**सुवर्णा**–नदी, नदीभेद, औषधिभेद, ( स्त्री० ) ॥ १८६ ॥

**हरिता**–दूर्वा, ( स्त्री० ) हरितवर्णयुक्त, ( त्रि० )

**हरित्**–अश्व, ( पुं० ) **हरित्**–दिशा, ( स्त्री० ) ॥ १८७ ॥
**हरित्**–तृण, ( न० )

"Aho Shrutgyanam"

क्लीबं तृणप्रभेदेऽथ **हर्म्मितं** क्षिप्तदग्धयोः ।
**हसन्त्या**ङ्गारधान्यां स्यान्मल्लिकाशाकिनीभिदोः ॥ १८८ ॥
**हारीतः** कैतवेऽपि स्यान्मुनिपक्षिप्रभेदयोः ।
**हृषितं** विस्मृते प्रीते नते रोमाञ्चिते हृते ॥ १८९ ॥
**क्षारितं** स्नाविते क्षारेऽभिशस्तेऽपि च वाच्यवत् ।

तचतुर्थम् ।

**अङ्गारितं** तु दग्धे स्यात्पलाशकलिकोद्गमे ॥ १९० ॥
**अतिमुक्त**स्तु वासन्त्यां तिनिशे निष्कले त्रिषु ।
**अत्याहितं** तु जीवनापेक्षकृत्ये महाभये ॥ १९१ ॥
**अधिक्षिप्तः** पराभूते त्रिषु प्रणिहितेऽपि च ।
स्यात्पुरातनवस्त्रेऽपि नववस्त्रेप्य**नाहतम्** ॥ १९२ ॥
**अनुमति**स्त्वपूर्णे तु पूर्णिमानुज्ञयोः स्त्रियाम् ।
मत**मन्तर्गतं** मध्ये त्रिषु प्राप्ते च विस्मृते ॥ १९३ ॥

---

**हर्म्मित**–क्षिप्त (फेंकाहुवा), दग्ध, (त्रि०)
**हसंती**–अँगीठी, मल्लिका (मोतिया) भेद), शाकिनी–भेद, (स्त्री०) ॥ १८८ ॥
**हारीत**–कपट, मुनिभेद, पक्षिभेद, (पुं०)
**हृषित**–भूलाहुवा, प्रसन्नहुवा, नम्रहुवा, रोमांचितहुवा, हराहुवा, (त्रि०) ॥ १८९ ॥
**क्षारित**–झिराहुवा, क्षार, श्रेष्ठ, (त्रि०)

**तचतुर्थ ।**

**अङ्गारित**–दग्ध, टेसूकी कलीका उत्पन्न होना, (न०) ॥ १९० ॥
**अतिमुक्त**–जूहीलता या वासन्ती, तिरिच्छ वृक्ष, संगरहित, (त्रि०)
**अत्याहित**–जीनेकी इच्छासे कर्म, महाभय, (न०) ॥ १९१ ॥
**अधिक्षिप्त**–तिरस्कार कियाहुवा, स्थापन कियाहुवा, (त्री०)
**अनाहत**–पुराना वस्त्र, नवीन वस्त्र, (न०) ॥ १९२ ॥
**अनुमति**–अपूर्ण, (त्रि०) कलाहीन चंद्रमावाली पूर्णिमा, संमति, (सलाहमें सलाह मिलाना) (स्त्री०) ॥
**अन्तर्गत**–मध्य प्राप्तहुवा, विस्मृत (भूला) हुवा, (त्रि०) ॥१९३॥

"Aho Shrutgyanam"

**भवेदपचितो** न्यूने पूजितेप्यभिधेयवत् ।
स्त्रियामपचितिः पूजानिष्कृतिक्षयहानिषु ॥ १९४ ॥
**अपावृतस्तु** पिहिते स्वतन्त्रे स्यादपावृतः ।
**अभिजातस्त्रिषु** न्याय्ये कुलीनप्राप्तरूपयोः ॥ १९५ ॥
**अभियुक्तस्त्रिषु** द्वेषिसंरुद्धेऽप्यतितत्परे ।
**अभिनीतो** भवेन्न्याय्यसंस्कृतामर्षिषु त्रिषु ॥ १९६ ॥
**अभिशस्तिस्तु** लोकापवादेयाच्ञाभिशापयोः ।
उदितेऽ**भ्युदितो** यस्मिन्सुप्तेऽर्कः समुदेति च ॥ १९७ ॥
पुमान**र्थपति**र्भूपे ईश्वरे किन्नरे त्रिषु ।
ज्ञाते मूढोऽप्य**वसितं** क्लीबं गत्यवसानयोः ॥ १९८ ॥
क्लीबमा**च्छुरितं** हास्ये शब्दान्वितनखार्पणे ।
**आयुष्मान्** योगभेदे ना चिरजीविनि वाच्यवत् ॥ १९९ ॥

---

**अपचित**–घटा हुआ वस्तु, पूजित, ( पु० )
**अपचिति**–पूजा, बदला, नाश, हानि, ( स्त्री० ) ॥ १९४ ॥
**अपावृत**–ढकाहुवा, स्वतंत्र ( बे अ- ख्तयार ) ( त्रि० )
**अभिजात**–न्याय्य ( योग्य ),कुलीन, रूपवान, ( त्रि० ) ॥ १९५ ॥
**अभियुक्त**–शत्रुसे रुकाहुवा, अतित- त्पर, ( पुं० )
**अभिनीत**–न्याय्य ( योग्य ), संस्कार कियाहुवा, क्रोधयुक्त, ( त्रि० ) ॥ १९६ ॥
**अभिशस्ति**–लोकापवाद, याचना, झूठा कलंक, ( स्त्री० )
**अभ्युदित**–उदयहुवा, जिसके सोते- हुए सूर्य उदय होजाय वह मनुष्य, ( पुं० ) ॥ १९७ ॥
**अर्थपति**–राजा, ईश्वर, किन्नर, (पुं०)
**अवसित**–जानाहुवा, मोहितहुवा, (त्रि०) गमन, अंत, (न०) ॥१९८॥
**आच्छुरित**–हँसना, शब्दसेयुक्त नख डालना (खाज करना) (न०)
**आयुष्मान्**–विष्कम्भ आदिकोंमेंसे एक योग, ( पुं० ) बहुतकाल जी- नेवाला ( त्रि० ) ॥ १९९ ॥

"Aho Shrutgyanam"

**उज्जृम्भितं** तु चेष्टायामुत्फुल्ले त्वभिधेयवत् ।
**उदास्थितश्चरे**ऽध्यक्षे प्रणिधौ द्वारपालके ॥ २०० ॥

**उद्ग्राहितमुपन्यस्ते** बद्धग्राहितयोरपि ।
**उपाकृतो** यज्ञहते पशावुपहते त्रिषु ॥ २०१ ॥

भवेदुपचितं दिग्धे समृद्धे च समाहिते ।
**उपाहितो**ऽनलोत्पाते पुमानारोपिते त्रिषु ॥ २०२ ॥

राहौ सोपप्लवे **चोपरक्तः** स्याद्व्यसनान्तरे ।
**उपसत्तिस्तु** सेवायां सङ्गेऽपि प्रतिपादने ॥ २०३ ॥

मतमुल्लिखितं तु स्यात्रिषूत्कीर्णे तनूकृते ।
**ऋष्यप्रोक्ता** शतावर्यां शूकशिंव्यां बलामिदि ॥ २०४ ॥

**ऐरावतो**ऽभ्रमातङ्गे नारङ्गे लकुचद्रुमे ।
**ऐरावतं** मतं दीर्घसरलेन्द्रशरासने ॥ २०५ ॥

---

**उज्जृम्भित**–चेष्टा, ( न० ) फूलाहुवा, ( त्रि० )

**उदास्थित**–चर (चंचल), अध्यक्ष, गुप्तबात कहनेवाला, द्वारपाल (पुं०) ॥ २०० ॥

**उद्ग्राहित**–उपन्यास कियाहुवा, बँधाहुवा, ग्रहण करायाहुवा (त्रि०)

**उपाकृत**–यज्ञमें वध कियाहुवा पशु, माराहुवा ( त्रि० ) ॥ २०१ ॥

**उपचित**–लिपाहुवा, समृद्ध ( बढ़ाहुवा), समाधान कियाहुवा,( त्री०)

**उपाहित**–अग्निसे उत्पात, ( पुं० ) आरोपण कियाहुवा, (त्रि०) २०२

**उपरक्त**–राहुसे, उपद्रव (ग्रहण) युक्त चंद्रसूर्य, दुःखभेद, ( पुं० )

**उपसत्ति**–सेवा, सङ्ग, प्रतिपादन, ( स्त्री० ) ॥ २०३ ॥

**उल्लिखित**–खोदाहुवा, सूक्ष्म कियाहुवा, ( त्रि० )

**ऋष्यप्रोक्ता**–शतावरी, कौंच, बला ( खरँहटी ) भेद, ( स्त्री० ) २०४

**ऐरावत**–इंद्र हस्ती, नारंगी, बडहरवृक्ष, ( पुं० )

**ऐरावत**–दीर्घ लंबा और सीधा इंद्रका धनुष ( न० ) ॥ २०५ ॥

"Aho Shrutgyanam"

स्त्रियामैरावती सौदामनीसौदामनीभिदोः ।
**अंशुमान्**भास्करे शालपर्ण्यामं**शुमती** स्त्रियाम् ॥ २०६ ॥
**कलधौतं** कलारावे क्लीबं कनकरूप्ययोः ।
**कुमुद्वती** कुमुदिन्यां कुशपत्न्यां **कुमुद्वती** ॥ २०७ ॥
**कुमुद्वान्**कुमुदप्रायदेशे स्यादभिधेयवत् ।
क्लीबं **कुहरितं** ध्वाने पिकालापे रतस्वने ॥ २०८ ॥
**कृष्णवृन्ता** पाटलायां माषपर्ण्यामपि स्मृता ॥ २०९ ॥
मता **गन्धवती** मद्ये मेदिन्यां च पुरीभिदि ।
अपि योजनगन्धायां **गरुत्मां**स्तार्क्ष्यपक्षिणोः ॥ २१० ॥
गृहस्थसत्रिणोरर्थाऽऽधाने **गृहपतिः** पुमान् ।
**चक्राहुति**र्दीर्घबाहुभ्रमे पूर्णाहुतावपि ॥ २११ ॥
**चन्द्रकान्तो** मणेर्भेदे **चन्द्रकान्तं** तु कैरवे ।
**चर्म्मण्वती** नदीभेदे कदलीचारवृक्षयोः ॥ २१२ ॥

---

**ऐरावती**–बिजली, बिजलीभेद, ( स्त्री० )

**अंशुमान्**–सूर्य, ( पुं० ) **अंशुमती**-शालपर्णी ( स्त्री० ) ॥ २०६ ॥

**कलधौत**–सूक्ष्मशब्द, सुवर्ण, चाँदी, ( न० )

**कुमुद्वती**–कमोदनी, औषधिभेद, या कुशराजाकी स्त्री, ( स्त्री० ) २०७

**कुमुद्वान्**–बहुतकमोदनीवाला स्थल, ( त्रि० )

**कुहरित**–शब्द, कोयलका बोलना, मैथुनसमयका शब्द, ( न० )२०८

**कृष्णवृन्ता**–पाडल, माषपर्णी-औषधि, ( स्त्री० ) ॥ २०९ ॥

**गन्धवती**–मदिरा, पृथ्वी, वरुणकी नगरी, व्यासकी माता, ( स्त्री० )

**गरुत्मान्**–गरुड, पक्षिमात्र, ( पुं० ) ॥ २१० ॥

**गृहपति**–गृहस्थ, यज्ञ, द्रव्यका रखना, ( पुं० )

**चक्राहुति**–लंबी भुजाकरके भ्रमणा, पूर्णाहुति ( स्त्री० ) ॥ २११ ॥

**चन्द्रकान्त**–मणिभेद, ( पुं० )

**चन्द्रकान्त**–कैरव, ( कमल ) (न०)

**चर्मण्वती**–नदीभेद, केलावृक्ष, चारवृक्ष, ( चरोंजी ) ( स्त्री० ) ॥ २१२ ॥

"Aho Shrutgyanam"

आषाढपर्वतस्यान्तः कारुती नाम निम्नगा ।
तस्यां मासोपवासिन्यामपि **चारुव्रता** स्मृता ॥ २१३ ॥
**चित्रगुप्तो** मतो दण्डधारे तस्य च लेखके ।
**दिवाकीर्ति**स्तु चाण्डाले नापिते काकवैरिणि ॥ २१४ ॥
**दिवाभीत** उलूके स्यात्कुत्सिते कुमुदाकरे ।
**द्वीपवान**ब्धिनद्योर्**द्वीपवत्या**पगाभुवोः ॥ २१५ ॥
**धूमकेतु**र्बृहद्भानावुत्पातग्रहभेदयोः ।
**नदीकान्तो** जलनिधौ सिन्धुवारेऽपि हिज्जले ॥ २१६ ॥
**नदीकान्ता** लताजम्बूकाकजङ्घासु विश्रुता ।
**नन्द्यावर्त्तः** पुमान्वेश्मप्रभेदे तगरद्रुमे ॥ २१७ ॥
**नागदन्तो** गजरदे गृहान्निर्गतदारुणि ।
**नागदन्ती** तु कुम्भायां श्रीहस्तिन्यां च दृश्यते ॥ २१८ ॥

---

**चारुव्रता**—आषाढ पर्वतके भीतर कारुती नाम जो नदी है वहां एकमासका व्रत करनेवाली स्त्री, (स्त्री०) ॥ २१३ ॥
**चित्रगुप्त**—धर्मराज, धर्मराजका लेखक, ( पुं० )
**दिवाकीर्ति**—चांडाल, नाई, काकवैरी ( स्त्री० ) ॥ २१४ ॥
**दिवाभीत**—उल्लू पक्षी, कुत्सित ( निंदित ), तालाब, ( पुं० )
**द्वीपवान्(वत्)**—समुद्र, नद, (पुं०)
**द्वीपवती**—नदी, पृथ्वी, ( स्त्री० ) ॥ २१५ ॥
**धूमकेतु**—अग्नि, उत्पात, ग्रहभेद, ( पुं० )
**नदीकान्त**—समुद्र, सिम्हालू वृक्ष, जलबेत ( पुं० ) ॥ २१६ ॥
**नदीकान्ता**—माधवीलता या श्यामालता, जामुन, काकजंघा या घुँघुची, ( स्त्री० )
**नन्द्यावर्त**—मकानभेद, तगर-वृक्ष, ( पुं० ) ॥ २१७ ॥
**नागदन्त**—हाथीदाँत, घरसे बाहिर निकला हुवा काष्ठ, ( पुं० )
**नागदन्ती**—जलकुंभी, हाथीसूँडा, ( स्त्री० ) ॥ २१८ ॥

"Aho Shrutgyanam"

अस्वाध्याये प्रतिक्षेपे निराकारे **निराकृतिः** ।
त्रिषु **निस्तुषितं** त्यक्ते त्वचाशून्ये लघूकृते ॥ २१९ ॥
**निष्काशितो** निर्गमिते धिक्कतेप्युज्झिते त्रिषु ।
**पञ्चगुप्तस्तु** चार्वाकदर्शने कमठेऽपि च ॥ २२० ॥
गतासचेष्टिते ज्ञाते लाभे **परिगतं** मतम् ।
**परिघातः** समाघाताऽऽयुधयोरथ हायने ॥ २२१ ॥
**परिवर्त्तो** विनिमये कूर्म्मराजे पलायने ।
दन्ते सप्रसवे लाक्षारक्ते **पल्लवितं** त्रिषु ॥ २२२ ॥
**पारावतः** कलरवे शैले मर्कटतिन्दुके ।
**पारावती** तु गोपालगीतेऽपि लवलीफले ॥ २२३ ॥
**पारिजातः** पारिभद्रे मन्दारेऽपि च पादपे ।
**पाशुपतः** पशुपतिदैवते बकपुष्पके ॥ २२४ ॥

---

**निराकृति**–पाठका नहीं पढना, वर्जना, निकालना ( स्त्री० )

**निस्तुषित**–त्यागाहुवा, त्वचाशून्य, छोटा कियाहुवा, (त्रि०) ॥२१९॥

**निष्काशित**–निकालाहुवा, धिक्कार कियाहुवा, त्यागाहुवा, ( त्रि० )

**पंचगुप्त**–चार्वाकोंका शास्त्र, कमठ ( कछुवा ) ( पुं० ) ॥ २२० ॥

**परिगत**–गयाहुवा के प्राप्त होनेसे चेष्टित, जानाहुवा, लाभ, (त्रि०)

**परिघात**–बहुत आघात (चोट), हथियार, वर्ष, ( पुं० ) ॥ २२१ ॥

**परिवर्त्त**–बदला, कूर्मराज, भागना, ( पुं० )

**पल्लवित**–दियाहुवा, उत्पत्तिवाला, लाखसे रंगाहुवा, (त्रि०) ॥२२२॥

**पारावत**–कबूतर, पर्वत, मकरतेंदुवा, ( पुं० )

**पारावती**–गोपालका गीत, हरपारेवडीका फल, ( स्त्री० ) ॥ २२३ ॥

**पारिजात**–नींब-वृक्ष, आक-वृक्ष, कल्प-वृक्ष, ( पुं० )

**पाशुपत**–महादेव देवता है जिसका वह, अगस्तका पुष्प, ( पुं० )२२४

"Aho Shrutgyanam"

**पुरस्कृतं** भवेदग्रकृताभ्यर्चितयोस्त्रिषु ।
शस्ते शिक्ते रिपुग्रस्ते स्वीकृतेऽपि त्रिषु स्मृतम् ॥ २२५ ॥

**पुष्पदन्तस्तु** दिग्नागनागविद्याधरान्तरे ।
**प्रजापतिः** क्षितिपतौ विरिंच्ये च **प्रजापतिः** ॥ २२६ ॥

त्रिषु **प्रणिहितं** स्यातं न्यस्ते लब्धे समाहिते ।
भवेत्**प्रतिहतो** द्विष्टे प्रतिस्खलितरुद्धयोः ॥ २२७ ॥

**प्रतिपच्चे**तनायां स्यात्प्रतिपत्तावपि स्मृता ।
**प्रतिपत्तिः** पदप्राप्तिः प्रतिप्राप्तिश्च गौरवे ॥ २२८ ॥

**प्रतिपत्तिः** प्रबोधेऽपि संवित्प्रागल्भयोरपि ।
**प्रतिकृतिः** प्रतीकारे प्रतिबिम्बे च पूजने ॥ २२९ ॥

**प्रतिक्षिप्तं** प्रतिहते प्रेषिते च निराकृते ।
**प्रधूपित**स्त्रिषु क्लिष्टे सूर्यगम्यदिशि स्त्रियाम् ॥ २३० ॥

---

**पुरस्कृत**–आगेकियाहुआ, पूजाकिया हुवा, ( त्रि० ) श्रेष्ठ, सींचाहुवा, शत्रुका ग्रसाहुवा, अंगीकारकियाहुवा, ( त्रि० ) ॥ २२५ ॥

**पुष्पदंत**–दिग्हस्ती, एक नाग, एक विद्याधर, ( पुं० )

**प्रजापति**–राजा, ब्रह्मा, ( पुं० ) ॥ २२६ ॥

**प्रणिहित**–स्थापनकियाहुवा, प्राप्त-हुवा, सावधानहुवा, ( त्रि० )

**प्रतिहत**–द्वेषकियाहुवा, आखलाहुवा, रुकाहुवा, ( त्रि० ) ॥ २२७ ॥

**प्रतिपत्**–बुद्धि, प्रतिपत्ति ( प्रगल्भ-ताआदि ) (स्त्री० )

**प्रतिपत्ति**–पदप्राप्ति, प्रतिप्राप्ति, गौ-रव ( बडप्पन ) ( स्त्री० )॥२२८॥

**प्रतिपत्ति**–ज्ञान, बुद्धि,प्रगल्भता (निः शंकपना ) ( स्त्री० )

**प्रतिकृति**–दूरकरना या इलाज, मूर्त्ति, पूजन, ( स्त्री० ) ॥ २२९ ॥

**प्रतिक्षिप्त**–रोकाहुवाआदि, प्रेराहुवा ( भेजाहुवा ), निकालाहुवा,(त्रि०)

**प्रधूपित**–क्लेशदियाहुवा, (त्रि० ) सू-र्यकेजानेवाली दिशा, (स्त्री०) ॥ २३० ॥

"Aho Shrutgyanam"

**प्रव्रजिता** तु मुण्डीरीमांस्योस्त्रिपु तपस्विनि ।
**भगवान्**सुगते पूज्ये त्रिषु गौर्यां तु योषिति ॥ २३१ ॥
**भोगवान्**नाट्यगानयो**र्भोगवान**हिभोगिनोः ।
मता **भोगवती** नागपुरि नागसरित्यपि ॥ २३२ ॥
**रङ्गमाता** तु लाक्षायां कुट्टिन्यामपि दृश्यते ।
**लक्ष्मीपति**र्नृपे विष्णौ पूगीफललवङ्गयोः ॥ २३३ ॥
**वनस्पति**र्विना पुष्पं फलिवृक्षेऽपि पादपे ।
**विजृम्भितं** विकसितेऽप्युद्गते वेष्टिते त्रिषु ॥ २३४ ॥
**विनिपात**स्तु दैवादिव्यसने पतनेऽपि च ।
**विवस्वां**स्तु पुमान्वासरेश्वरे त्रिदिवेश्वरे ॥ २३५ ॥
**विवक्षितं** वक्तुमिष्टे शोभनेऽपि **विवक्षितम्** ।
**वैजयन्तो** ध्वजे शक्रप्रासादे शरजन्मनि ॥ २३६ ॥

---

**प्रव्रजिता**–गोरखमुंडी, जटामांसी, ( स्त्री० ) तपस्वी ( पुं० )
**भगवा ( न् )त्**–बुद्धदेव, ( पुं० ) पूज्य ( त्रि० )
**भगवती**–गौरी, ( स्त्री० ) ॥२३१ ॥
**भोगवान्**–नाट्य, गाना, सर्प, भोगी-पुरुष ( पुं० )
**भोगवती**–नागपुरी, नागनदी,(स्त्री०) ॥ २३२ ॥
**रंगमाता**–लाख, कुट्टिनी, ( स्त्री० )
**लक्ष्मीपति**–राजा, विष्णु, सुपारी, लौंग, ( पुं० ) ॥ २३३ ॥
**वनस्पति**–पुष्पोंके विना फलनेवाला वृक्ष, वृक्षमात्र, ( पुं० )
**विजृंभित**–खिलाहुवा, उछलाहुवा, लपेटाहुवा, (त्रि०) ॥ २३४ ॥
**विनिपात**–दैवआदिसे दुःख, पड़ना, ( पुं० )
**विवस्वान्**–सूर्य, इंद्र, (पुं०)॥२३५॥
**विवक्षित**–कहनेको इच्छित, सुंदर, ( त्रि० )
**वैजयन्त**–ध्वजा, इंद्रका महल, स्वामिकार्त्तिक, (पुं०) ॥ २३६ ॥

"Aho Shrutgyanam"

**वैजयन्ती** पताकायां जयन्ती वह्निमन्थयोः ।
**व्यतीपातो** योगभेदे महोत्पातेऽपमानने ॥ २३७ ॥
मतः **शतधृतिः** पाकशासने कमलासने ।
**शुभ्रदन्ती** मरुद्दन्ती दन्तिनीसुंदरस्त्रियोः ॥ २३८ ॥
**संख्यावान्**पण्डिते पुंसि त्रिषु सङ्ख्यायुते मृते ।
**सदागति**र्गन्धवाहे निर्वाणेऽपि सदीश्वरे ॥ २३९ ॥
**समुद्रान्ता** त्वनन्तायां कार्पासीपृक्कयोरपि ।
**समुद्धतः** समुत्कीर्णेऽप्यविनीते **समुद्धतः** ॥ २४० ॥
**समाघातो** वधे युद्धे समाधिस्थे **समाहितः** ।
त्रिषु न्यस्तप्रतिज्ञातसंसिद्धे यम आत्मनि ॥ २४१ ॥
**समाहितं** समाधाने व्यसनेऽपि **समाहितम्** ।
**सरस्वान्**रसिके सिन्धौ नदेऽप्यथ **सरस्वती** ॥ २४२ ॥

---

**वैजयन्ती**–इंद्रके महलकी पताका, जैतपुष्पवृक्ष, अरडों-वृक्ष (स्त्री०)

**व्यतीपात**–विष्कंभआदियोगोंमेंसे एकयोग, महाउत्पात, अपमान(पुं०) ॥ २३७ ॥

**शतधृति**–इंद्र, ब्रह्मा, ( पुं० )

**शुभ्रदन्ती**–वायव्यकोणके हस्तीकी हस्तिनी, सुंदर दाँतोवाली स्त्री, ( स्त्री० ) ॥ २३८ ॥

**संख्यावान्(वत्)**–पंडित, ( पुं० ) संख्यावाला, मृतक, (त्रि० )

**सदागति**–वायु,मुनि या अग्नि, श्रेष्ठ, ईश्वर, ( पुं० ) ॥ २३९ ॥

**समुद्रान्ता**–जवाँसा, कपास-वृक्ष, शाकविशेष ( असवरग ) (स्त्री०)

**समुद्धत**–पिछोड़ाहुवा, उद्धत ( अनाडी ) पुरुष, ( पुं० ) ॥२४०॥

**समाघात**–मारना, युद्ध, (पुं०)

**समाहित**–समाधिमें स्थित, स्थापनकियाहुवा, प्रतिज्ञाकियाहुवा, अच्छेप्रकारसे सिद्ध, धर्मराज, आत्मा, ( त्रि० ) २४१

**समाहित**–समाधान, स्थापनकरना, (न०)

**सरस्वान्(वत्)**–रसिक, समुद्र, नद, ( पुं० )

**सरस्वती**–॥ २४२ ॥

"Aho Shrutgyanam"

नदीभेदे नदीदिव्यस्त्रीगोवाग्देवतागिरि ।
**सुधासूतिः** पुमान्यज्ञे कुरङ्गतिलकेऽपि च ॥ २४३ ॥
**सूर्यभक्तो** मतो बन्धुजीवे भास्करदैवते ।
**सेनापति**रनीकाधिकृते हैमवतीसुते ॥ २४४ ॥
**हिमारातिः** खले सूर्येऽनले **हैमवती** तु या ।
गौर्यां हरीतकीस्वर्णक्षीरीश्वेतवचासु सा ॥ २४५ ॥

तपंचमम् ।

स्यादध्य**वसितं** ज्ञाते गते क्रुद्धेऽपि वेष्टिते ।
पुंसि श्रीकण्ठवैकुण्ठयज्ञभेदेऽ**पराजितः** ॥ २४६ ॥
जयन्ती पार्वतीविष्णुक्रान्तासु त्व**पराजिता** ।
वाच्यलिङ्गः **पिपतिष**न्पतनेच्छौ खगे पुमान् ॥ २४७ ॥
दृष्टेऽ**वलोकितं** ख्यातं लोकनाथेऽ**वलोकितः** ।
**उपधूपित** आसन्नमरणे परिधूपिते ॥ २४८ ॥

---

सरस्वती नाम नदी, दिव्यस्त्री, गौ, वाणीकी अधिष्ठात्री देवता, वाणी ( स्त्री० )

**सुधासूति**–यज्ञ, मृगका तिलक,(पुं०) ॥ २४३ ॥

**सूर्यभक्त**–दुपहरियाका-झाड़, सूर्यका उपासक, ( पुं० )

**सेनापति**–सेनाका स्वामी, स्वामिकार्त्तिक, (पुं०) ॥ २४४ ॥

**हिमाराति**–खल ( खोटा ), सूर्य, अग्नि, ( पुं० )

**हैमवती**–पार्वती, हरड़, एकप्रकारकी कटेहली, सफेद बच ( स्त्री० ) ॥ २४५ ॥

**तपंचम ।**

**अध्यवसित**–जानाहुवा, गयाहुवा, क्रुद्धहुवा, लपेटाहुवा ( त्रि० )

**अपराजित**–महादेव, विष्णु, यज्ञभेद, ( पुं० ) ॥ २४६ ॥

**अपराजिता**–देवीभेद, पार्वती, कोयल या विष्णुक्रान्ता, ( स्त्री० )

**पिपतिष(तृ)न्**–पड़नेकी इच्छावाला, (त्रि०) पक्षी, (पुं०) ॥२४७॥

**अवलोकित**–देखाहुवा, ( त्रि० ) लोकनाथ ( स्वामी ) ( पुं० )

**उपधूपित**–नजदीकमृत्युवाला, धूप दियाहुवा ( पुं० ) ॥ २४८ ॥

"Aho Shrutgyanam"

**गणाधिपति**रित्येष पिनाकिनि विनायके ।
श्वेतायामप्यसौ वाच्यलिङ्गस्तु स्यादनिर्जिते ॥ २४९ ॥
सर्वमुक्तेऽ**भिनिर्मुक्तः** सुप्ते यत्रास्तगो रविः ।
**पृथिवीपति**रित्युक्तो भूपाले ऋषभौषधे ॥ २५० ॥
**मूर्धाभिषिक्तः** क्ष्मापाले मन्त्रिणि क्षत्रियेऽपि च ।
**यादसांपति**रम्भोधौ वरुणे **यादसांपतिः** ॥ २५१ ॥
**वसन्तदूत**श्चूतेऽसौ पिकपञ्चमरागयोः ।
**वसन्तदूती**शब्दस्तु पाटलावतिमुक्तके ॥ २५२ ॥

तषष्ठम् ।

**अर्द्धपारावत**श्चित्रकण्ठे च तित्तिरावपि ।
**समुद्रनवनीतं** स्यादमृते च सुधानिधौ ॥ २५३ ॥

इति विश्वलोचने तान्तवर्गः ॥

---

**गणाधिपति**–महादेव, गणेश, कटेहली ( पुं० ) नहीं जीताहुवा, ( त्रि० ) ॥ २४९ ॥

**अभिनिर्मुक्त**–सर्वसे छुटा, जिसके सूतेहुए सूर्य अस्त होजाय वह, ( पुं० )

**पृथिवीपति**–राजा, ऋषभनाम औषधि, ( पुं० ) ॥ २५० ॥

**मूर्धाभिषिक्त**–राजा, मंत्री, क्षत्रिय, ( पुं० )

**यादसांपति**–समुद्र, वरुण, ( पुं० ) ॥ २५१ ॥

**वसन्तदूत**–आम्र, कोयल, पंचमराग, ( पुं० )

**वसन्तदूती**–पाडलपुष्प, माधवी-पुष्पलता, ( स्त्री० ) ॥ २५२ ॥

**तषष्ठ ।**

**अर्धपारावत**–चित्रकंठ ( आधा कबूतरके समान-पक्षी ) तीतर-पक्षी-

**समुद्रनवनीत**–अमृत, चंद्रमा, ( न० ) ॥ २५३ ॥

इस प्रकार विश्वलोचनकी भाषाटीकामें तान्तवर्ग समाप्त हुवा ॥



"Aho Shrutgyanam"

## अथ थान्तवर्गः ।

थैकम् ।

**थः** स्याच्छिलोच्चये भीतत्राणे **थं** मङ्गलेऽपि **थम्** ।

थद्वितीयम् ।

**अर्थः** प्रयोजने चित्ते हेत्वभिप्रायवस्तुषु ॥ १ ॥
शब्दाभिधेये विषये स्यान्निवृत्तिप्रकारयोः ॥ २ ॥
**आस्था** त्वालम्बनापेक्षायत्नास्थानेषु दृश्यते ।
**कन्था** तु मृत्तिकाभित्तौ **कन्था** प्रावरणान्तरे ॥ ३ ॥
**कुथः** स्त्रीपुंसयोर्वर्णकम्बले पुंसि बर्हिषु ।
**कोथ**स्तु नेत्ररुग्भेदे मथने शटितेऽपि च ॥ ४ ॥
**क्राथः** स्याद्व्यसने पुंसि द्रवनिष्पाकदुःखयोः ।
**गाथा** वृत्तेऽपि वाग्भेदे **ग्रन्थ**स्तु धनशास्त्रयोः ॥ ५ ॥
**ग्रन्थः** स्याद्ग्रन्थनायां च द्वात्रिंशद्वर्णनिर्म्मितौ ।
**ग्रन्थि**र्ना पर्वणि ग्रन्थिपर्णेरुग्भिदि च स्त्रियाम् ॥ ६ ॥

---

**अथ थान्तवर्ग ।**

थैक ।

**थ**–पर्वत (पुं०) भयसे रक्षा, मंगल, ( न० )

थद्वितीय ।

**अर्थ**–प्रयोजन (मतलब),चित्त, कारण, अभिप्राय, वस्तु, ॥ १ ॥ शब्दोंका अर्थ, विषय, निवृत्ति, प्रकार (पुं०) ॥ २ ॥

**आस्था**–आलम्बन ( आश्रय ), अपेक्षा, यत्न, स्थान, ( स्त्री० )

**कन्था**–मृत्तिकाकी भीत, ओढनेका वस्त्र ( स्त्री० ) ॥ ३ ॥

**कुथ**–वर्ण (रंग), कम्बल (स्त्री०पुं०) मयूर ( पुं० )

**कोथ**–नेत्ररोगका भेद, मथना, दुःख ( पुं० ) ॥ ४ ॥

**क्राथ**–व्यसन, पतली निष्पाव, दुःख, ( पुं० )

**गाथा**–छंद–भेद, वाणीभेद, ( स्त्री० )

**ग्रन्थ**–धन, शास्त्र, ॥ ५ ॥ ग्रंथना ( गूँथना ), बत्तीस ३२ वर्णोंकी रचना, ( पुं० )

**ग्रंथि**–पोरी, ( पुं० ) गठिवन-वृक्ष, रोगभेद, ( स्त्री० ) ॥ ६ ॥

"Aho Shrutgyanam"

कौटिल्ये बन्धभेदे च **तीर्थं** शास्त्रावतारयोः ।
पुण्यक्षेत्रमहापात्रोपायोपाध्यायदर्शने ॥ ७ ॥
ऋषिजुष्टे जले यज्ञे जातौ च वनितार्त्तवे ।
नीलीसूक्ष्मैलयोस्**तुत्था** **तुत्थो**ऽग्नौ **तुत्थ**मञ्जने ॥ ८ ॥
**दुःस्थ**स्तु दुर्गते मूर्खे **पार्थः** स्यात्ककुभेऽर्जुने ।
**पाथो** दिवाकरे पुंसि **पाथः** पयसि न द्वयोः ॥ ९ ॥
**पृथु**र्नृपे कृष्णजीरे वाप्यां स्त्री महति त्रिषु ।
सानौ मानेऽस्त्रियां **प्रस्थः** स्यादप्युन्मितवस्तुनि ॥ १० ॥
**प्रोथः** पान्थेऽश्वघोणायामस्त्री ना कटिगर्भयोः ।
**वीथी** गृहतटीपङ्क्तौ नाट्यरूपकवर्त्मनोः ॥ ११ ॥
**मन्थो** मन्थानदण्डे स्याद्द्वादशात्मनि सक्तवे ।
**मन्थो** नयनरोगेऽपि **यूथं** तिर्यक्चये चये ॥ १२ ॥

**तीर्थ**–कुटिलता, बन्धभेद, शास्त्र, अवतार, पुण्यक्षेत्र, बडा पात्र, उपाय, पढानेवाला, दर्शन, ॥ ७ ॥ ऋषियोंका सेवित जल, यज्ञ, जाति, स्त्रीका रज, ( न० )

**तुत्था**–नीली-औषधि, छोटी इलायची, (स्त्री० ) **तुत्थ**–अग्नि (पुं०)

**तुत्थ**–अंजन ( न० ) ॥ ८ ॥

**दुःस्थ**–दुःखसे गयाहुवा, मूर्ख, (पुं०)

**पार्थ**–कोह–वृक्ष, अर्जुन-पांडुपुत्र, ( पुं० )

**पाथ**–सूर्य, ( पुं० ) **पाथस्**–जल, ( न० ) ॥ ९ ॥

**पृथु**–पृथु–राजा, कालाजीरा, (पुं०) वावडी ( स्त्री० ) महान् ( बडा ) ( त्रि० )

**प्रस्थ**–पर्वतकी समभूमि, ६४ तोला प्रमाण, ( पुं० न० ) उन्मान करीहुई वस्तु ( त्रि० ) ॥ १० ॥

**प्रोथ**–बटाऊ ( पुं० ) अश्वकी नासिका, ( पुं० न० ) कटि, गर्भ, ( पुं० )

**वीथी**–घरका अंग, पंक्ति, नाट्यका रूपक, मार्ग, ( स्त्री० ) ॥ ११ ॥

**मन्थ**–दधिआदि मथनका दंड (रई), सूर्य, सक्तु विकार या समूह, नेत्र-रोग, ( पुं० )

**यूथ**–सजातीय तिर्यक् जातियोंका समूह, समूहमात्र ( पुं० न० ) ॥ १२ ॥

"Aho Shrutgyanam"

अस्त्री **यूथी** तु मागध्यां पुष्पभेदे कुरण्टके ।
**रथ**स्तु स्यन्दने काये वेतसे चरणेऽपि च ॥ १३ ॥
**सार्थः** स्याद्वणिजां वृन्दे वृन्दमात्रेऽपि दृश्यते ।
**सिक्थं** नील्यां मधूच्छिष्टे **सिक्थो** नौदनसम्भवे ॥ १४ ॥
**संस्था** नाशे व्यवस्थायां व्यक्तिसादृश्ययोः स्थितौ ।
**संस्था** क्रतौ समाप्तौ च चरे च निजराष्ट्रगे ॥ १५ ॥

थतृतीयम् ।

**अतिथिः** स्यात्प्राघुणके कोपेपि कुशपुत्रके ।
त्रिष्व**व्यथो** व्यथाहीने पथ्यायां पन्नगेऽ**व्यथः** ॥ १६ ॥
**अश्वत्थः** पूर्णिमायां च गर्दभाण्डे च पिप्पले ।
**उद्रथ**स्ताम्रचूडेऽपि महेन्द्रे महकामुके ॥ १७ ॥
**उन्माथः** कूटयन्त्रे स्यादपि मारणघातयोः ।
**उपस्थ**स्तु भगे लिङ्गेऽप्युत्सङ्गेऽपि गुदे पुमान् ॥ १८ ॥

---

**यूथी**—पीपल, जूही-पुष्पवृक्ष, पीली-कटसरैया ( स्त्री० )

**रथ**—रथ, शरीर, बेतस-वृक्ष, पाँव ( पुं० ) ॥ १३ ॥

**सार्थ**—वणिकोंका समूह, समूहमात्र, ( पुं० )

**सिक्थ**—नीलका पेड, मोम, ( न० ) ॥ १४ ॥

**संस्था**—नाश, व्यवस्था, व्यक्ति (पृथक्शरीर ), सादृश्य ( तुल्यता ), स्थिति, यज्ञभेद, समाप्ति, अपने राज्यमें प्राप्तहुवा जासूस ( स्त्री० ) ॥ १५ ॥

**थतृतीय ।**

**अतिथि**—अभ्यागत, क्रोध, कुशका पुत्र ( पुं० )

**अव्यथ**—व्यथाहीन, हरड, सर्प (त्रि०) ॥ १६ ॥

**अश्वत्थ**—पूर्णिमातिथि, ( स्त्री० ) ( अश्वत्थ ) पारस पीपल, पीपल, ( पुं० ) ॥ १७ ॥

**उद्रथ**—ताम्रचूड ( मुरगा ), उरलूपक्षी, श्वान ( पुं० )

**उन्माथ**—कूटयंत्र, मारना, घात करना, ( पुं० )

**उपस्थ**—भग ( स्त्रीकी योनि ), लिंग, गोद, गुद, ( पुं० ) ॥ १८ ॥

"Aho Shrutgyanam"

**कायस्थ**स्तु नृणां जातिप्रभेदे परमात्मनि ।
**कायस्था** स्याद्वयस्थायां पथ्यायां कायगे त्रिषु ॥ १९ ॥
**गोग्रन्थि**स्तु करीषे स्याद्गोष्ठे गोजिह्विकौषधौ ।
**दमथ**स्तु दमे दण्डे **निर्ग्रन्थः** क्षपणेऽधने ॥ २० ॥
बालिशेऽपि **निशीथ**स्तु निशामात्रार्द्धरात्रयोः ।
**प्रमथः** शङ्करगणे पथ्यायां **प्रमथा** तथा ॥ २१ ॥
**वयःस्था** शाल्मलीपथ्याकाकोल्यामलकीषु च ।
ब्राह्मीत्रुटिगुडूचीषु **वयस्थ**स्तरुणे त्रिषु ॥ २२ ॥
**मन्मथः** कामचिन्तायां कामदेवकपित्थयोः ।
**वमथुः** पुंसि वमने मातङ्गकरशीकरे ॥ २३ ॥
**वरूथो** रथगुप्तौ ना **वरूथं** चर्मवेश्मनि ।
**विदथो** योगिकृतिनोः **शमथः** शान्त्यमात्ययोः ॥ २४ ॥

---

**कायस्थ**–मनुष्योंकी जातिका भेद ( कायथ ), परमात्मा, ( पुं )
**कायस्था**–जवान उम्रमें स्थित स्त्री, हरड, ( स्त्री० ) शरीरमें स्थित ( त्रि० ) ॥ १९ ॥
**गोग्रन्थि**–आरना, गौवोंका ठान, गोभी या गावजवी-औषधि, ( पुं० स्त्री० )
**दमथ**–इंद्रियोंका रोकना, दण्ड, (पुं०)
**निर्ग्रन्थ**–मुनि, निर्धन, ॥ २० ॥ मूर्ख, ( पुं० )
**निशीथ**–रात्रिमात्र, अर्द्धरात्र, (पुं०)
**प्रमथ**–महादेवके गण, ( पुं० ) प्रमथा, ( हरड ) स्त्री० ) ॥ २१ ॥
**वयःस्था**–सेमलका–वृक्ष, हरड, काकोली, आँवला, ब्राह्मी, छोटी इलायची, गिलोय, ( स्त्री० ) **वयःस्थ**-जवान, ( त्रि० ) ॥ २२ ॥
**मन्मथ**–कामचिन्ता, कामदेव, कैथका-वृक्ष, ( पुं० )
**वमथु**–वमन, हस्तीकी सूंडके जलकण, ( पुं० ), ॥ २३ ॥
**वरूथ**–रथकी रक्षाके लिये लोहादिमयपरदा, ( पुं० ) चर्मका डेरा ( तंबू ) ( न० )
**विदथ**–योगी, पंडित, ( पुं० )
**शमथ**–शान्ति, मंत्री, (पुं०) ॥२४॥

"Aho Shrutgyanam"

**षड्ग्रन्था** तु वचाशट्योः **षड्ग्रन्थः** करञ्जान्तरे ।
**समर्थ**स्तूद्भटे शक्ते सम्बद्धार्थे हिते त्रिषु ॥ २५ ॥
सर्वार्थसिद्धे **सिद्धार्थः सिद्धार्था** सितसर्षपे ।
**क्षवथुः** पुंसि कासे स्याच्छिकायामपि सम्मतः ॥ २६ ॥

थचतुर्थम् ।

**अनीकस्थो** रणखले चिह्नेषु भटमर्दने ।
राजरक्षिषु मातङ्गशिक्षणातिविचक्षणे ॥ २७ ॥
भवे**दितिकथा** ग्राम्यकथाप्रनष्टधर्म्मयोः ।
वाच्यव**द्दशमीस्थः** स्यात्स्थविरक्षीणरागयोः ॥ २८ ॥
**वानप्रस्थो** मधुष्ठीले तृतीयाश्रमिकिंशुके ।

थपंचमम् ।

भटे पुंस्य**प्रतिरथं** यात्रायां साम्नि मङ्गले ॥ २९ ॥

इति विश्वलोचने थान्तवर्गः ॥

---

**षड्ग्रन्था**–बच, कचूर, ( स्त्री० ) **षड्ग्रन्थ**, करंजुवाभेद, ( पुं० )
**समर्थ**–उद्भट, शक्तिमान्, सम्बद्ध अर्थ, हितकारी, ( त्रि० ) ॥ २५॥
**सिद्धार्थ**–बुद्धदेव, (पुं०) **सिद्धार्था**-सफेद-सिरसों, ( स्त्री० )
**क्षवथु**–खाँसी, छींक, ( पुं० ) ॥२६॥

**थचतुर्थ ।**

**अनीकस्थ**–रणभूमि, चिह्न, योद्धाका मर्दन, राजाकी रक्षा करनेवाला, हस्तीकी शिक्षामें निपुण, ( पुं० ) ॥ २७ ॥
**इतिकथा**–व्यर्थभाषण, नष्टधर्म, ( स्त्री० )
**दशमीस्थ**–बुड्ढा, राग ( स्नेह ) रहित, ( पुं० ) ॥ २८ ॥
**वानप्रस्थ**–महुवा, तीसरा आश्रम, के ( टे ) सू, ( पुं० )

**थपंचम ।**

**अप्रतिरथ**–योद्धा, ( पुं० ) यात्रा, सामवेद, मंगल, ( न० ) ॥२९॥

इस प्रकार विश्वलोचनकी भाषाटीकामें थान्तवर्ग समाप्त हुवा ॥

"Aho Shrutgyanam"

# अथ दान्तवर्गः ।

दैकम् ।

दः शुद्धौ देवने दास्तु दातरि च्छेददानयोः ॥ १ ॥

दद्वितीयम् ।

अन्दुः स्त्रियामलङ्कारे वेदबंधनवस्तुनोः ।
अब्दः संवत्सरे मेघे मुस्तके पर्वतान्तरे ॥ २ ॥
कन्दोऽस्त्री शूरणे वृक्षमूले पुंसि पयोधरे ।
कुन्दो माध्ये पुमांश्चक्रे भ्रमौ निधिसुरद्विषोः ॥ ३ ॥
विष्णुभ्रातरि रोगे च मतः शस्त्रान्तरे गदा ।
छदः पत्रे पतत्रे च ग्रन्थिपर्णतमालयोः ॥ ४ ॥
छन्दोऽभिप्रायवशयोर्धींदा कन्यामनीषयोः ।
नदी सरित्यपि नदः सिन्धौ शोणाविनादयोः ॥ ५ ॥

---

**अथ दान्तवर्ग ।**

दैक ।

**द**–शुद्धि, क्रीडा, ( पुं० )

**दा**–दाता, छेदन, दान, ( पुं० )॥१॥

**दद्वितीय ।**

**अंदु**–आभूषण, वेद, बेड़ी ( स्त्री० )

**अब्द**–संवत्सर, मेघ, नागरमोथा, पर्वतभेद, ( पुं० ) ॥ २ ॥

**कन्द**–जमीकंद, वृक्षकी जड, ( पुं० न० ) नागरमोथा या मेघ (पुं०)

**कुन्द**–कुन्द-पुष्पवृक्ष, चक्र, भ्रमणा, निधिभेद, एक राक्षस, ( पुं० ) ॥ ३ ॥

**गद**–विष्णुका भ्राता, रोग, ( पुं० )

**गदा**–शास्त्रभेद, ( स्त्री० )

**छद**–पत्ता, पक्षीकी पर, गठिवन औषधि, तमाल-वृक्ष ( पुं० ) ॥ ४ ॥

**छंद**–अभिप्राय, वश, ( पुं० )

**धीदा**–कन्या, बुद्धि, (स्त्री०) ॥ ५ ॥

**नदी**–नदी, ( स्त्री० ) **नद**–सिंधु, शोण-नद, भेडीका शब्द ( पुं० )

"Aho Shrutgyanam"

**नन्दिः** शिवप्रतीहारे द्यूतभाण्डभिदोर्मुदि ।
**नन्दा** मणिकसम्पत्त्योर्**निन्दा** कुत्साऽपवादयोः ॥ ६ ॥
**पदं** वाक्ये प्रतिष्ठायां व्यवसायाऽपदेशयोः ।
पादातच्चिह्नयोः शब्दे स्थानत्राणाङ्घ्रिवस्तुषु ॥ ७ ॥
**पादो**ऽस्त्री चरणे मूले तुरीयांशेऽपि दीधितौ ।
शैलप्रत्यन्तशैले ना **बिदा** ज्ञाने मतावपि ॥ ८ ॥
**बिन्दुः** स्याद्दन्तदशने शुक्रे वेदितृविप्रुषोः ।
**बेदि**रङ्गुलिमुद्रायां बुधे संस्कृतभूतले ॥ ९ ॥
**भन्दं**(द्रं) शर्म्मणि कल्याणे **भेदो** द्वैधविशेषयोः ।
विदारणे चोपजापे **संपूर्वः** सिन्धुसङ्गमे ॥ १० ॥
**मदो** मृगमदे मद्ये दानमुद्दर्पवीरेतसि ।
**महापूर्वो** मतङ्गे स्यान्**मदी** कृषकवस्तुनि ॥ ११ ॥

---

**नन्दि**–शिवका पौलिया, जूवा, भांड ( पात्र ) भेद, आनंद, ( पुं०न० )
**नन्दा**–बडा घड़ा, सम्पत्ति, ( स्त्री० )
**निन्दा**–कुत्सा ( निंदा ), अपवाद ( बुरा कहना ) ( स्त्री० ) ॥ ६ ॥
**पद**–वाक्य, प्रतिष्ठा, व्यवसाय ( उद्यम ), मिस, पाँव, पैड, शब्द, स्थान, रक्षा, वस्त्र, ( न० ) ॥७॥
**पाद**–चरण ( पाँव ), वृक्षकी जड़, चौथा हिस्सा, किरण, पर्वत, पर्वतके समीप छोटा पर्वत, ( पुं० )
**बिदा**–ज्ञान, बुद्धि, ( स्त्री० ) ॥ ८ ॥
**बिन्दु**–दाँतसे कियाहुवा घाव, वीर्य, जाननेवाला, ( त्रि० ) जल आदिकी बूँद ( पुं० )
**बेदि**–अँगूठी, पंडित, संस्कार कीहुई पृथ्वी, (पुं० स्त्री० ) ॥ ९ ॥
**भन्द (द्र)**–सुख, कल्याण, ( न० )
**भेद**–द्विधाभाव, विशेष, फाड़ना, पुरुषोंके मेलको फोड़ना, ( पु० )
**संभेद**–समुद्र या नदियोंका मिलना, ( पुं० ) ॥ १० ॥
**मद**–कस्तूरी, मदिरा, हस्तीके मदसे झिरनेका जल, हर्ष, गर्व, वीर्य, (पुं०)
**महामद**–हस्ती, ( पुं० ) **मदी**–खेती करनेवालेकी वस्तु ( स्त्री० ) ॥११॥

"Aho Shrutgyanam"

**मन्दः** स्वैरे खले मन्दरते मूर्खाल्परोगिषु ।
अभाग्येऽपि त्रिषु पुमान् गजजात्यन्तरे शनौ ॥ १२ ॥

**मृदु**रतीक्ष्णे त्रिषु श्लक्ष्णे **रदो** दन्ते विलेखने ।
**शाद**स्तु कर्दमे शष्पे **सूदः** स्याद्व्यञ्जने गुणे ॥ १३ ॥

**स्वादु**र्मिष्टे मनोज्ञे च **स्वेदः** स्वेदनघर्म्मयोः ।
**हृ**च्चित्तबुक्कयोः क्लीबं **क्षोद**श्चूर्णेऽपि पेषणे ॥ १४ ॥

दतृतीयम् ।

**अङ्गदो** वालिपुत्रे स्यात्केयूरे **त्वङ्गदं** मतम् ।
भवेद्दक्षिणदिग्दन्तीदन्तिन्यां तु मताऽङ्गदा ॥ १५ ॥

अस्त्री सङ्ख्यान्तरे मांसकीले शैलेऽपि **नाऽर्बुदः** ।
**अर्द्धेन्दु**रर्द्धचन्द्रे स्याद्गलहस्तनखाङ्कयोः ॥ १६ ॥

---

**मंद**–यथेच्छ, खोटा, मंद स्त्रीसंग, मूर्ख, अल्प, रोगी, भाग्यहीन (त्रि०) हस्ती-भेद, शनैश्चर ( पुं० ) ॥ १२ ॥

**मृदु**–कोमल, सुंदर, ( त्रि० )

**रद**–दाँत, काटना, ( पुं० )

**शाद**–कींच, छोटी घास आदि, (पुं०)

**सूद**–व्यंजन ( तरकारी ), रसोइया, ( पुं० ) ॥ १३ ॥

**स्वादु**–रुचिकारी भोजन, सुंदर,(त्रि०)

**स्वेद**–पसीना, धूप, ( पुं० )

**हृत्**–चित्त, हृदयमें कमलाकार मांस, ( न० )

**क्षोद**–चूर्ण, पीसना, ( पुं० ) ॥१४॥

**दतृतीय ।**

**अंगद**–वालिका पुत्र, ( पुं० ) बाजूबंद, ( न०) दक्षिणदिशाका हस्ती, ( पुं० )

**अंगदा**–दक्षिणदिक्हस्तीकी हस्तिनी ( स्त्री० ) ॥ १५ ॥

**अर्बुद**–संख्या ( अरब ), मांसकील, ( पुं० न० ) एक पर्वत, ( पुं० )

**अर्द्धेन्दु**–आधाचंद्रमा, गलहस्त (ग्रीवापर हाथ देकर निकालना ), नखों करके शरीरपर चिह्न (पुं)० ॥१६॥

"Aho Shrutgyanam"

**अर्द्धेन्दुः** स्याददतिप्रौढस्त्रीगुह्याङ्गुलियोजने ।
**आक्रन्दो** दारुणरणे मित्रे तातारिरोदने ॥ १७ ॥
पार्ष्णिग्राहात्परो राजा यस्तस्मिन्नारदेऽपि च ।
सुगन्धिमुदि **वामोद आस्पदं** पदकृत्ययोः ॥ १८ ॥
स्त्री **ककुत् ककुदो**ऽप्यस्त्री वृषाङ्गे राजलक्ष्मणि ।
शृङ्गे श्रेष्ठे **कपर्द**स्तु वटे शम्भुजटाटयोः ॥ १९ ॥
**कर्कन्दुः** साक्षरे शाके वारिजाले गुदामये ।
उत्क्षिप्तिकायां **कर्णान्दुः** कर्णपाल्यामपि स्त्रियाम् ॥ २० ॥
**कामदा** धेनुकायां स्याद्वाच्यवत्कामदोग्धरि ।
**कुमुदो** नागदिग्नागदैत्यान्तरवनौकसि ॥ २१ ॥
**कुमुदं** कैरवे क्लीबं कृपणे **कुमुद**न्यवत् ।
कुसीदिके **कुसीदः** स्यात्**कुसीदं** वृद्धिजीवने ॥ २२ ॥

---

अति जवान स्त्रीकी योनिमें अंगुलि डालना, ( पुं० )

**आक्रन्द**-भयंकर रण, मित्र, भ्राता, शत्रुका रोना ॥ १७ ॥ अपने पासके राजदबानेवाले राजासे अन्य राजा, नारद, ( पुं० )

**आमोद**-सुगन्धि, हर्ष, ( पुं० )

**आस्पद**-पद, कृत्य, ( न० ) ॥१८॥

**ककुत् ककुद**-( स्त्री०) वृषकी थूह, राजचिह्न ( ध्वजाआदि ), शृंग, श्रेष्ठ, ( पुं० न० )

**कपर्द**-वट-वृक्ष, महादेवकी जटा, ( पुं० ) ॥ १९ ॥

**कर्कन्दु**-साक्षर, शाकभेद, कमल, गुदरोग, ( पुं० )

**कर्णान्दु**-उत्क्षिप्तिका ( कर्णभूषणमात्र ), कर्णपाली ( कानकी बाली ) ( स्त्री० ) ॥ २० ॥

**कामदा**-गौ, ( स्त्री० ) यथेच्छ देनेवाला, ( त्रि० )

**कुमुद**-नाग, दिग्हस्ती, दैत्यभेद, वनमें रहनेवाला, ( पुं० ) ॥२१॥

**कुमुद**-कमोदनी, ( न० )

**कुमुत्**-कृपण, ( त्रि० )

**कुसीद**-व्याज लेनेवाला ( पुं० ) वृद्धिजीवन ( व्याज ) (न०)॥२२॥

"Aho Shrutgyanam"

**कौमुदः** कार्त्तिके ज्योत्स्नापर्वणोरपि **कौमुदी** ।
**क्रव्यात्क्रव्याद**वत्पुंसि मांसभक्षकरक्षसोः ॥ २३ ॥
**गोविन्द** इन्द्रावरजे गवाध्यक्षे च गीष्पतौ ।
**गोष्पदं** गोपदश्वभ्रे गवां च गतिगोचरे ॥ २४ ॥
बलाहकोऽपि **जलदो जलदो** मुस्तकेऽपि च ।
**जीवदो** द्विषि वैद्ये च **तरत्का**रण्डवे प्लवे ॥ २५ ॥
**तोयदो** मुस्तके मेघे **तोयदं** तु घृतं मतम् ।
**दरन्द्रये** प्रपातेऽद्रौ **दायादो** ज्ञातिपुत्रयोः ॥ २६ ॥
**दारदः** पारदे सिन्धौ हिङ्गुले गरलान्तरे ।
**दृषत्**पेषणपाषाणपट्टपाषाणयोः स्त्रियाम् ॥ २७ ॥
**धनदो** दातरि श्रीदे क्रीडामात्ये तु **नर्म्मदः** ।
**नर्मदा** नर्मदायिन्यां रेवायामपि **नर्मदा** ॥ २८ ॥

---

**कौमुद**–कार्तिक-मास, ( पुं० )
**कौमुदी**–चाँदका चाँदना, पर्व,(स्त्री०)
**क्रव्यात्–क्रव्याद्**–मांसभक्षी, राक्षस, ( पुं० ) ॥ २३ ॥
**गोविन्द**–श्रीकृष्ण, गौवोंका स्वामी, बृहस्पति ( पुं० )
**गोष्पद**–गौकी पैड़, गौवोंकी गति आदि (न०) ॥ २४ ॥
**जलद**–मेघ, नागरमोथा, ( पुं० )
**जीवद**–शत्रु, वैद्य, (पुं० )
**तरद्**–करडुवा पक्षी, पुंडेरी-पक्षी ( पुं० ) ॥ २५ ॥
**तोयद**–नागरमोथा, मेघ, ( पुं० ) घृत, ( न० )
**दरद्**–भय, पर्वतमें गिरनेका स्थान, पर्वत, ( पुं० )
**दायाद**–अपनी सातवीं पीढी भीतरका-मनुष्य, पुत्र (पुं०) ॥ २६ ॥
**दारद**–पारा, समुद्र, हींगलू, विषभेद, ( पुं० )
**दृषद्**–पीसनेके लिये पत्थरका पट्टा, पत्थर, ( स्त्री० ) ॥ २७ ॥
**धनद**–दातार, कुबेर, ( पुं० )
**नर्मद**–क्रीडाका मंत्री, ( पुं० )
**नर्मदा**–क्रीडा करानेवाली स्त्री, रेवानदी ( स्त्री० ) ॥ २८ ॥

"Aho Shrutgyanam"

**नलदं** मकरन्दे स्यान्मांसिकोशीरयोरपि ।
**निर्वादस्तु** परीवादपरनिन्दितवादयोः ॥ २९ ॥

**निषादः** स्वरभेदेऽपि **निषादः** पचपचेऽपि च ।
**प्रणादो**ऽत्युच्चशब्दे स्यात्**प्रणादः** कर्णरुग्भिदि ॥ ३० ॥

**प्रमदा** मत्तकाशिन्यां **प्रमदो** गर्वितामुदि ।
**प्रसादस्तु** प्रसन्नत्वे काव्यालङ्करणान्तरे ॥ ३१ ॥

स्वास्थ्ये चानुग्रहे चाथ **प्रह्लादः** प्रणदेऽसुरे ।
**प्रासादः** पुंसि देवस्य नरदेवस्य वाऽऽलये ॥ ३२ ॥

कन्यायां **वरदा** शान्ते प्रसन्ने **वरद**स्त्रिषु ।
**भसत्**पुंस्येव काले स्याद्**भसन्**मांसे प्रभासुरे ॥ ३३ ॥

**मर्यादा** तु स्थितौ सीम्नि कूले कूले च वारिधेः ।
**माकन्दस्तु** रसाले स्यान्**माकन्दी**मलकीफले ॥ ३४ ॥

---

**नलद्**–पुष्परस, जटामांसी-औषधि, खस, ( न० )

**निर्वाद्**–अपवाद, दूसरोंसे निंदित वाद, ( पुं० ) ॥ २९ ॥

**निषाद्**–गानेका स्वरभेद, चांडाल भील आदि नीच, ( पुं० )

**प्रणाद्**–अति ऊँचा शब्द, कानरोगका भेद ( पुं० ) ॥ ३० ॥

**प्रमदा**–गुणवती स्त्री, ( स्त्री० )

**प्रमद्**–गर्विताम्रीका, आनंद, ( पुं० )

**प्रसाद्**–प्रसन्नत्व, काव्य–अलंकार, ॥ ३१ ॥ स्वस्थता, अनुग्रह (कृपा) ( पुं० )

**प्रह्लाद्**–ऊँचा शब्द, असुर, ( पुं० )

**प्रासाद्**–देवताका मंदिर, राजाका महल, ( पुं० ) ॥ ३२ ॥

**वरदा**–कन्या, ( स्त्री० ) **वरद्**–शांतचित्त, प्रसन्न, ( त्रि० )

**भसद्**–काल, ( पुं० ) मांस, ( न० ) प्रकाशवान ( त्रि० ) ॥ ३३ ॥

**मर्यादा**–स्थिति, सीम, तीर, समुद्रका तीर, ( स्त्री० )

**माकन्द्**–आम्र, ( पुं० ) **माकंदी**–आँवलेका फल ( स्त्री० ) ॥ ३४ ॥

"Aho Shrutgyanam"

**मेनाद**श्छागमार्जारमेघनादानुलासिषु ।
**वातर्दि**र्वल्कले काष्ठलोहीवेदेकयोः स्त्रियाम् ॥ ३५ ॥
**विशदः** पाण्डरे व्यक्ते **शरत्**स्त्री शरदब्दयोः ।
**शारदा** जलपिप्पल्यां सप्तपर्णेऽथ **शारदः** ॥ ३६ ॥
नवाऽप्रतिमशालीनपीतमुद्गेन्दुवर्षयोः ।
स्त्रियां **सम्पद्**गुणोत्कर्षे भूतिहारप्रभेदयोः ॥ ३७ ॥
**संवित्**प्रतिज्ञासङ्केतज्ञानाचारेषु नामनि ।
स्त्रियां तोषे क्रियाकारे रणे सम्भाषणेऽपि च ॥ ३८ ॥
**सम्भेद**स्तु विकाशे स्यात्**सम्भेदः** सिन्धुसङ्गमे ।
**सुनन्दा** रोचनानार्योः **क्षणदो** गणके पुमान् ॥ ३९ ॥
त्रिषूत्सवप्रदे वारि **क्षणदं** **क्षणदा** निशि ।

दचतुर्थम् ।

**अपवाद**स्तु निद्रायामाज्ञाविश्वासयोरपि ॥ ४० ॥

---

**मेनाद्**–बकरा, बिलाव, मोर, (पुं०)
**वातर्दि**–वृक्षका बकला, काष्ठआदि, ( स्त्री० ) ॥ ३५ ॥
**विशद**–सफेद, प्रकट, ( पुं० )
**शरद्**–शरदृतु, वर्ष, ( स्त्री० )
**शारदा**–जलपीपल, सप्तपर्णी या सातवण, ( स्त्री० ) **शारद** ॥३६॥ नवीन जिसके समान दूसरा न हो वह, लज्जावान, पीलामूग, चन्द्रमा, वर्ष ( पुं० )
**सम्पद्**–गुणोंकरके उत्कर्ष (बडप्पन), संपत्ति, हारभेद, ( स्त्री० ) ॥३७॥
**संविद्**–प्रतिज्ञा, संकेत, ज्ञान, आचार, नाम, संतोष, किसी कार्यका करनेवाला, रण, संभाषण, (स्त्री०) ॥ ३८ ॥
**सम्भेद**–प्रकाश, समुद्र या नदियोंका मिलाप, ( पुं० )
**सुनन्दा**–रोचना ( गोलोचन ), स्त्री, ( स्त्री० )
**क्षणद**–ज्यौतिषी, ( पुं० ) ॥ ३९ ॥
**क्षणद**–उत्सवदेनेवाला, ( त्रि० ) जल, ( न० )
**क्षणदा**–रात्रि, ( स्त्री० )

**दचतुर्थ ।**

**अपवाद**–निन्दा, आज्ञा, विश्वास, ( पुं० ) ॥ ४० ॥

"Aho Shrutgyanam"

**अभिष्यन्दो** विवृद्धौ स्यादास्रावे लोचनामये ।
**अभिमर्द्द**स्तु पुंस्येव रणमन्थानदण्डयोः ॥ ४१ ॥

**अष्टापदं** शारिफले क्लीबमस्त्री तु काञ्चने ।
शरभे मर्कटे पुंसि चन्द्रमल्ल्यां स्त्रियामपि ॥ ४२ ॥

**एकपदं** स्यात्तत्काले क्लीबमे**कपदी** पथि ।
**कटुकन्दः** पुमान् शृङ्गवेरे शिग्रुरसोनयोः ॥ ४३ ॥

**कुरुविन्द**स्तु मुस्तायां कुल्माषव्रीहिभेदयोः ।
**कुरुबिन्दं** तु मुकुरे पद्मरागे च हिङ्गुले ॥ ४४ ॥

क्लीबं **कोकनदं** रक्तकैरवे रक्तपङ्कजे ।
**चक्रबुन्द**स्तु भाकूटे पृष्ठशृङ्गे मृषान्तरे ॥ ४५ ॥

**चतुष्पदो** गवाश्वादिपशौ स्त्रीकरणान्तरे ।
पुमाञ्ज**नपदो** देशे तथा **जनपदो** जने ॥ ४६ ॥

---

**अभिष्यन्द**–अतिवृद्धि, चारोंतरफसे-झिरना, नेत्ररोग ( पुं० )

**अभिमर्द**–रण, मथनेका डाँडा (पुं०) ॥ ४१ ॥

**अष्टापद**–चौपड़, ( न० ) सुवर्ण ( पुं० न० ) शरभ ( मृगभेद ), बन्दर, ( पुं० )

**अष्टापदी**–चंद्रमल्ली ( मल्लिकाभेद ) (स्त्री०) ॥ ४२ ॥

**एकपद**–तत्काल, (न०)

**एकपदी**– मार्ग ( स्त्री० )

**कटुकन्द**–अदरक, सहँजना, ल्हस्सन, ( पुं० ) ॥ ४३ ॥

**कुरुविन्द**–नागरमोथा, आधासीजा-धान्य, व्रीहिभेद ( पुं० )

**कुरुबिन्द**–शीशा, पुक्खराज, हींगलू, ( न० ) ॥ ४४ ॥

**कोकनद**–लाल कमोदनी, लालक-मल ( न० )

**चक्रबुन्द**–तेजसमूह, पृष्ठशृङ्ग, अस-त्यभेद ( पुं० ) ॥ ४५ ॥

**चतुष्पद**–गौ अश्व आदि पशु, स्त्रि-योंका करणभेद, ( पुं० )

**जनपद**–देश, जन, ( पुं० ) ॥४६॥

"Aho Shrutgyanam"

**तमोनुदस्तमोनुच्च** चन्द्रसूर्यकृशानुषु ।
**परीवादो**ऽपवादे स्याद्वीणावादनवस्तुनि ॥ ४७ ॥

**पृष्ठमर्दो**ऽतिधृष्टे स्यान्नाट्योक्त्या नायकप्रिये ।
**पुटभेदो** नदीवक्रे नगरातोद्ययोरपि ॥ ४८ ॥

**प्रतिपत्तु** स्त्रियामाद्यतिथौ संविदि सा स्मृता ।
**प्रियंवदः** खेचरे स्यात्प्रियवाचि तु वाच्यवत् ॥ ४९ ॥

**महानादो** महाशब्दे वर्षुकाब्दे शयानके ।
गजे च **मुचुकुन्दस्तु** मुनिदैत्यद्रुमान्तरे ॥ ५० ॥

**मेघनादो** दशग्रीवसुते पश्चिमदिक्पतौ ।
**विशारदः** पण्डिते स्यात्त्रिषु धृष्टे **विशारदः** ॥ ५१ ॥

पृत्वाकूटे प्रपञ्चे च मृगे शूके पदे मतम् ।
**समर्यादं** समीपे स्यान्मर्यादिन्यपि वाच्यत् ॥ ५२ ॥

---

**तमोनुद-तमोनुद्**–चंद्रमा, सूर्य, अग्नि, (पुं०)
**परीवाद्**–अपवाद ( निंदा आदि ), वीणाबजानेकी वस्तु ( पुं० )॥४७॥
**पृष्ठमर्द्**–अतिधृष्ट ( ढीठा ), नाट्यकी उक्तिमें नायकका प्रिय, ( पुं० )
**पुटभेद्**–नदीका बंक, नगर, बाजाभेद (पुं० )॥ ४८ ॥
**प्रतिपत्**–पड़वातिथि, बुद्धि, ( स्त्री० )
**प्रियंवद्**–खेचर ( आकाशमें विचरनेवाला), प्रियवचन कहनेवाला ( त्रि० ) ॥ ४९ ॥

**महानाद्**–महाशब्द, वर्षनेवालामेघ, सोनेवाला, हस्ती, ( पुं० )
**मुचुकुन्द्**–एकमुनि, एक दैत्य, मुचुकुंद-पुष्पवृक्ष, ( पुं० ) ॥ ५० ॥
**मेघनाद्**–रावणका पुत्र, वरुण, (पुं०)
**विशारद्**–पण्डित, धृष्ट, ( त्रि० ) ॥ ५१ ॥

प्रपंच ( जगत् ), मृग, स्याल्ल, चरण (पुं०)
**समर्याद्**–समीप (नजदीक), (न०) मर्यादावाला ( त्रि० ) ॥ ५२ ॥

"Aho Shrutgyanam"

दपंचमम् ।

धर्मे रहस्युपनिषद्वेदान्ते पार्श्ववेश्मनि ।
**सहस्रपादो** मार्त्तण्डे कारण्डेपि च यज्वनि ॥ ५३ ॥

इति विश्वलोचने दान्तवर्गः ॥

## अथ धान्तवर्गः ।

धैकम् ।

**धो** धने च धनेशे च **धास्तु** धातरि **धी** मतौ ।

धद्वितीयम् ।

**अन्धं** स्यात्तिमिरे दृष्टिहीने त्वन्धोऽभिधेयवत् ॥ १ ॥
**अब्धिर्वा**रांनिधौ पुंसि पुंस्येवाऽब्धिः सरोवरे ।
**अर्द्धं** समांशके क्लीबमर्द्धः खण्डे पुमानपि ॥ २ ॥
**पुंस्याधि**श्चित्तपीडायां प्रत्याशायां च बन्धके ।
व्यसने चाप्यधिष्ठाने स्यादिद्धस्त्वातपे पुमान् ॥ ३ ॥

---

**दपंचम ।**

**उपनिषद्**—धर्म, एकान्त, वेदान्त, पसवाड़ाका मकान ( स्त्री० )

**सहस्रपाद्**—सूर्य, कारंड (हंसभेद), यज्ञ, ( पुं० ) ॥ ५३ ॥

इस प्रकार विश्वलोचन कोशकी टीकामें दान्तवर्ग समाप्त हुवा ॥

**अथ धान्तवर्ग ॥**

धैक ।

**ध**—धन, ( न० ) कुबेर, (पुं०)

**धा**—ब्रह्मा, ( पुं० )

**धी**—बुद्धि ( स्त्री० )

**धद्वितीय ।**

**अन्ध**—अंधकार, ( न० ) अंधा-मनुष्य, (त्रि०) ॥ १ ॥

**अब्धि**—समुद्र, सरोवर, ( पुं० )

**अर्ध**—बराबर अर्धभाग, (न०) अर्ध ( टुकड़ा ), ( पुं०) ॥ २ ॥

**आधि**—चित्तपीडा, प्रत्याशा, गिरवी-रखना, दुःख या शोक, अधिष्ठान ( पुं ) धूप, ( पुं० ) ॥ ३ ॥

"Aho Shrutgyanam"

प्रदीप्ते त्रिषु **ऋद्धं** तु सम्पन्नान्नसमृद्धयोः ।
**ऋद्धिः** स्यादोषधीभेदे योगशक्तौ च बन्धने ॥ ४ ॥
**गन्धो** गन्धकसम्बन्धलेशेष्वामोदगर्वयोः ।
**गाधः** स्थानेऽपि लिप्सायां **गोधा** तलनिहाकयोः ॥ ५ ॥
**दग्धा** स्थितार्ककाष्ठायां **दग्धं** प्लुष्टेऽन्यलिङ्गकः ।
**दधि** स्याच्छ्रीघने क्लीबं **दधि** श्रीवासवासयोः ॥ ६ ॥
विषाक्तविशिखे **दिग्धो दिग्धं** लिप्तार्थकेऽन्यवत् ।
त्रिषु प्रपूरिते **दुग्धं दुग्धं** क्षीरेऽपि न द्वयोः ॥ ७ ॥
वत्से गोपे कवौ **दोग्धा दोग्धा**ऽप्यर्थोपजीविनि ।
सज्जे संपूर्वकं नद्धं नद्धं तद्वृत्तबद्धयोः ॥ ८ ॥
आधिबन्धनयोर्**वेधो बन्धः** संपूर्वकोऽन्वये ।
बन्धूकपादपे **बन्धुर्**वधूभ्रातरि बान्धवे ॥ ९ ॥

---

**ऋद्ध**–सिद्धहुवा अन्न, ( न० ) समृद्ध ( संपत्तिवाला, ) ( त्रि० )
**ऋद्धि**–ओषधीभेद, योगशक्ति, बंधन, ( स्त्री० ) ॥ ४ ॥
**गन्ध**–गन्धक, संबंध, लेश ( सूक्ष्म–अंश), सुगंध, अभिमान, ( पुं० )
**गाध**–स्थान ( स्थितहोना ), लेनेकी इच्छा, ( पुं० )
**गोधा**–धनुषकी ज्याको निवारण करनेका, जलगोह ( स्त्री० ) ॥ ५ ॥
**दग्धा**–स्थितहै सूर्य जिसमें वह दिशा, ( स्त्री० ) जलाहुवा, ( त्रि० )
**दधि**–दही, सरलवृक्षका गोंद, तेजपात, ( न० ) ॥ ६ ॥
**दिग्ध**–विषलगायाहुवा-बाण, ( पुं० ) किसीवस्तुमें लिप्तहुवा पदार्थ (त्रि०)
**दुग्ध**–प्रपूरितकिया हुवा, ( त्रि० ) दूध, ( न० ) ॥ ७ ॥
**दोग्धा**–बछड़ा, गोपालक, कवि, पदार्थोंसे जीविकावाला, ( पुं० )
**संनद्ध**–कवचधारी, ( त्रि० )
**नद्ध**–निकलाहुवा, बँधाहुवा, (त्रि०) ॥ ८ ॥
**वेध**–चित्तपीडा, बंधन, ( पुं० )
**संबंध**–अन्वय, जहांतहांका इकट्ठाहोना, ( पुं० )
**बंधु**–दुपहरिया-पुष्पवृक्ष, वधूका भ्राता बांधव, ( पुं० ) ॥ ९ ॥



"Aho Shrutgyanam"

**बाधा** दुःखे निषेधे च विपूर्वा तु विहेठने ।
**बुध**स्तु सुगते धीरे सौम्ये च बुधिते त्रिषु ॥ १० ॥
**बुधः** स्यात्पण्डिते सौम्ये **बुधः** कापि तथागते ।
**ऋद्धि**स्तु वर्द्धने ऋद्ध्यौषधे मुदि कलान्तरे ॥ ११ ॥
**वृद्धिः** कुरुण्डरोगे च **वृद्धि**र्योगेऽपि दृश्यते ।
**वृद्धो** रूढे कवौ जीर्णे त्रिषु **वृद्धं** तु शैलजे ॥ १२ ॥
**बोधिः** समाधिभेदे स्या**द्बोधि**र्बोधिमहीरुहे ।
**मधु** पुष्परसे क्षौद्रे मद्यक्षीराऽप्सु न द्वयोः ॥ १३ ॥
**मधु**र्म्मधूके सुरभौ चैत्रे दैत्यान्तरे पुमान् ।
जीवाशाके स्त्रियामेवं **मधु**-शब्दः प्रयुज्यते ॥ १४ ॥
**सिद्धं** चित्ताभिसंक्षेपे **सिद्ध**मालस्यनिद्रयोः ।
सुन्दरे वाच्यवन्**मुग्धो मुग्धो** मूढेऽपि वाच्यवत् ॥ १५ ॥
**मेधः** क्रतौ मतौ **मेधा मेधि**स्तु खलदारुणि ।
**राधा** तु वल्लवीभेदे चित्रभेदे च धन्विनाम् ॥ १६ ॥

---

**बाधा**-दुःख, निषेध, ( स्त्री० )
**विबाधा**-विशेषकरके पीडा, (स्त्री०)
**बुध**-बुद्धदेव, धीर, सौम्य, ( पुं० ) जानाहुवा, ( त्रि० ) ॥ १० ॥
**बुध**-पंडित, बुध-ग्रह, बुद्धदेव (पुं०)
**ऋद्धि**-बढना, ऋद्धि औषधी, हर्ष, कलाभेद, ( स्त्री० ) ॥ ११ ॥
**वृद्धि**-कुरुण्डरोग, वृद्धि-योग ( पुं० )
**वृद्ध**-बढाहुवा, कवि, पुराना, वृद्ध पर्वतमें होनेवाला ( त्रि० ) ॥१२॥
**बोधि**-समाधिभेद, पीपल-वृक्ष,(पुं०)
**मधु**-पुष्परस, शहद, मदिरा, दुग्ध, जल, ( न० ) ॥ १३ ॥
**मधु**-महुवा-वृक्ष, वसंत-ऋतु, चैत्र-मास, एक दैत्य, (पुं०) जीवशाक, ( स्त्री० ) ॥ १४ ॥
**सिद्ध**-चित्तव्याकुलता, आलस्य, निद्रा, ( न० )
**मुग्ध**-सुंदर, मूढ, (त्रि०) ॥ १५ ॥
**मेध**-यज्ञ, ( पुं० )
**मेधा**-बुद्धि, ( स्त्री० )
**मेधि**-खोटा काष्ठ, ( पुं० )
**राधा**-गोपी-श्रीकृष्णपत्नी, धनुषधारियोंका चित्रभेद, ॥ १६ ॥

"Aho Shrutgyanam"

स्याद्विशाखातडिद्विष्णुक्रान्तातिष्यफलासु च ।
**राध**स्तु पुंसि वैशाखे **लुब्धो** मृगयुकांक्षिणोः ॥ १७ ॥
**वधूः** स्नुषायां भार्यायां **वधू**र्योषिन्नवोढयोः ।
शट्यां च सारिवायां च स्पृक्कायां च मता **वधूः** ॥ १८ ॥
भवेद्**विधं** तु सादृश्ये वेधितक्षिप्तयोस्त्रिषु ।
**विधि**र्वेधसि काले ना विधाने नियतौ स्त्रियाम् ॥ १९ ॥
**विधा** प्रकारे ऋद्धौ च गजान्ने वेतने विधौ ।
**विधुः** शशाङ्के विष्णौ च कर्पूरे राक्षसान्तरे ॥ २० ॥
**व्याधिः** स्यादामये व्याप्ये **व्याधो** मृगयुदुष्टयोः ।
**शुद्धं** तु केवले पूते **श्रद्धा** श्राद्धोर्ध्वकाङ्क्षयोः ॥ २१ ॥
**श्राद्धं** निवापे **श्राद्ध**स्तु त्रिषु श्रद्धासमन्विते ।
**सन्धा** स्थितौ प्रतिज्ञायामवधानेऽपि सा स्मृता ॥ २२ ॥

---

विशाखा–नक्षत्र, बिजली, कोयल- या विष्णुक्रान्ता, आँवला ( स्त्री० )

**राध**–वैशाख–मास, ( पुं० )

**लुब्ध**–शिकारी, धनादिलोभवाला, (पुं०) ॥ १७ ॥

**वधू**–पुत्रवधू, अपनी स्त्री, नवीनविवाहिता स्त्री, कचूर, सरिवन, असवरग-औषधि ( स्त्री० ) ॥ १८ ॥

**विध**–सदृशता ( तुल्यता ), बींधाहुवा, फेंकाहुवा (त्रि०)

**विधि**–ब्रह्मा, काल, विधान, भाग्य, ( पुं० ) ॥ १९ ॥

**विधा**–प्रकार, ऋद्धि, हस्तीका अन्न, नौकरी, विधान, ( स्त्री० )

**विधु**–चंद्रमा, विष्णु, कपूर, राक्षस-भेद, (पुं०) ॥ २० ॥

**व्याधि**–रोग, कुष्ठरोग, ( पुं० )

**व्याध**–शिकारी, दुष्ट, ( पुं० )

**शुद्ध**–केवल ( एकला ), पवित्र,(न०)

**श्रद्धा**–आस्तिकता, ऊँची इच्छा, ( स्त्री० ) ॥ २१ ॥

**श्राद्ध**–पितरोंको पिंडआदिदान, (न०)

**श्राद्ध**–श्रद्धायुक्त, ( त्रि० )

**सन्धा**–स्थिति, प्रतिज्ञा, स्थिरचित्तता, ( स्त्री० ) ॥ २२ ॥

"Aho Shrutgyanam"

**सन्धिः** पुंसि सुरङ्गायां रन्ध्रसंघट्टने भगे ।
**सन्धि**र्भागेऽवकाशेऽपि वाटसंज्ञेऽपि पुंस्ययम् ॥ २३ ॥

**साधु**र्वार्द्धुषिके पुंसि चारुसज्जनयोस्त्रिषु ।
**सिद्ध**स्तु नित्ये निष्पन्ने प्रसिद्धे देवयोनिषु ॥ २४ ॥

योगेऽप्याडिप्रभेदे च **सिद्धि**र्निष्पत्तियोगयोः ।
सद्वृत्त्याख्याभेषजे **सिद्धिः** सिद्धिवृद्ध्याख्यभेषजे ॥ २५ ॥

**सिन्धु**रब्धौ नदे देशीभेदे ना सरिति स्त्रियाम् ।
**सुधा**ऽमृते **सुधा** मूर्वा स्नुहीगाङ्गेष्टिकासु च ॥ २६ ॥

**सृधू**र्बुद्धौ गुदेऽपि स्यात्**स्कन्धः** कायप्रकाण्डयोः ।
बाहुमूले समूहे च समीहायां समीहतौ ॥ २७ ॥

**स्कन्धो** नराश्वमातङ्गवृन्दे भद्रादिकृत्यके ।
**स्निग्धो** वात्सल्यसंपन्ने चिक्कणेऽप्यभिधेयवत् ॥ २८ ॥

---

**सन्धि**—सुरंग, छिद्रकाजोड़ना, योनि, ( पुं० )

**सन्धि**—भाग, अवकास, मार्गभेद ( पुं ) ॥ २३ ॥

**साधु**—वृद्ध, ( पुं० ) सुंदर, सज्जन, ( त्रि० )

**सिद्ध**—नित्य, निष्पन्न ( पूर्णहुवा ), प्रसिद्ध, देवयोनि ॥ २४ ॥ योग, आडि-पक्षीभेद, ( पुं० )

**सिद्धि**—निष्पत्ति, योग, अच्छीव्याख्या, औषधि-मात्र, वृद्धि-औषध, ( स्त्री० ) ॥ २५ ॥

**सिन्धु**—समुद्र, नद, देशभेद, ( पुं० )

**सिन्धु**—नदी ( स्त्री० )

**सुधा**—अमृत, मूर्वा चुरनहार या मरोरफली, थोहर, कटशर्करालता (एकप्रकारकी वनस्पति ) ॥ २६ ॥

**सृधू**—वृद्धि, गुद, ( स्त्री० )

**स्कन्ध**—शरीर, वृक्षकी मोटी शाखा, भुजाका मूल ( कंधा ), समूह, चेष्टा, चेष्टित, ॥ २७ ॥

मनुष्य अश्व और हस्तियों का समूह, मंगल आदि कृत्य, (पुं०)

**स्निग्ध**—वत्सलतासे पूर्ण, चिकना ( त्रि० ) ॥ २८ ॥

"Aho Shrutgyanam"

**स्पर्द्धा** संहर्षणे साम्ये **स्पर्द्धा** क्रमसमुन्नतौ ।

धतृतीयम् ।

**अगाध**मतलस्पर्शे त्रिषु श्वभ्रे नपुंसकम् ॥ २९ ॥
**अवधि**र्नाऽवधौ न स्यात्सीम्नि काले बिलेऽवटे ।
**आनद्धं** त्रिषु बद्धे स्या**दानद्धं** मुरजादिके ॥ ३० ॥
**आबन्धः** प्रेम्ण्यलङ्कारे दृढबन्धेऽपि कीर्त्तितः ।
**आविद्धः** प्रहते वक्रेऽप्युत्**सेधः** काय उच्छ्रये ॥ ३१ ॥
व्याजेऽपि चक्रेऽप्यु**पधि**रु**पाधि**र्ना विशेषणे ।
कैतवे धर्म्मचिन्तायां कुटुम्बव्यापृतेऽपि च ॥ ३२ ॥
**कबन्ध**स्तु हरे राहौ रक्षोभेदे मतः पुमान् ।
**कबन्धं** वारि न स्त्री तु गतमूर्द्धकलेवरे ॥ ३३ ॥
**दुर्विधो** दुःखिखलयो**र्निरोधो** रोधनाशयोः ।
**निषधः** पर्वते देशे तद्राजे कठिनेपि च ॥ ३४ ॥

---

**स्पर्धा**–अति हर्ष, समता, क्रमसे ऊंचापन, ( स्त्री० )

**धतृतीयम् ।**

**अगाध**–जिसकी थाह न लगे ऐसा ऊंचा, (त्रि०) खड्डा, (न०) ॥२९॥

**अवधि**–मीआद, सीम, काल, बिल, खड्डा, ( पुं० )

**आनद्ध**–बँधाहुवा, ( त्रि० )

**आनद्ध**–मृदंगआदिक, ( न० ) ॥ ३० ॥

**आबन्ध**–प्रेम, आभूषण, दृढबन्धन, ( पुं० )

**आविद्ध**–प्रेराहुवा, कुटिल ( टेढा ), ( पुं० )

**उत्सेध**–शरीर, ऊँचाई (पुं०) ॥३१॥

**उपधि**–बहाना या मिस, रथका पहिया ( चक्र ) ( पुं० )

**उपाधि**–विशेषण, छल, धर्मचिंता, कुटुम्बमें आसक्त ( पुं० ) ॥३२॥

**कबन्ध**–महादेव, राहु, राक्षसभेद, ( पुं० )

**कबन्ध**–जल, ( न० ) मस्तकरहित शरीर ( पुं० न० ) ॥३३॥

**दुर्विध**–दुःखित-जन, खल-जन, (पुं०)

**निरोध**–रोकना, नाश, ( पुं० )

**निषध**–पर्वत, निषध-देश, निषधका राजा, कठिन, (पुं०) ॥ ३४ ॥

"Aho Shrutgyanam"

**न्यग्रोधस्तु** वटे शम्यां **न्यग्रोधो** व्याममात्रके ।
**न्यग्रोधी** विषपर्ण्यां च मोहनाख्यौषधावपि ॥ ३५ ॥
**परिधिर्यज्ञियतरोः** शाखायामुपसूर्यके ।
**प्रणिधिर्याच्ञ्**आचरयोः **प्रसिद्धः** ख्यातभूषिते ॥ ३६ ॥
**मागधो** मगधोद्भूते क्षत्रियावैश्यजे त्रिषु ।
बन्दिजीरकयोः पुंसि कणायूथ्योस्तु **मागधी** ॥ ३७ ॥
पर्याहाराध्वभारेषु पण्ये **विवधवीवधौ**।
**विबुधः** पण्डिते देवे **विश्रब्धं** तु भृशार्थकम् ॥ ३८ ॥
**विश्रब्धः** स्यात्तु विश्वस्ताऽनुद्धटेषु त्रिषु त्रिषु ।
लतायां विटपे **वीरुत्सन्नद्धो** व्यूढवर्म्मिते ॥ ३९ ॥
**सन्निधिः** सन्निधाने स्त्री पुमानिन्द्रियगोचरे ।
**समाधिर्ध्यान**नीवाकनियमेषु समर्थने ॥ ४० ॥

---

**न्यग्रोध**–बड़-वृक्ष, शमी ( जाँट ) वृक्ष, तिरछी फैलाई हुई दोनों भुजाओंका प्रमाण (पुरस) ( पुं० )
**न्यग्रोधी**–विषपर्णी-औषधि, मोहन-नाम औषधि, ( स्त्री० ) ॥ ३५ ॥
**परिधि**–यज्ञयोग्यवृक्षकी शाखा, सूर्यके चारों ओर गोलचक्र ( पुं० )
**प्रणिधि**–याचना, चर, ( पुं० )
**प्रसिद्ध**–विख्यात, भूषित ( त्रि० ) ॥ ३६ ॥
**मागध**–मगधदेशमें होनेवाला, क्षत्रिया और वैश्यसे उत्पन्नहुवा, (त्रि०)
**मागध**–बन्दीजन, जीरा, ( पुं० )
**मागधी**–पीपल, जूही–पुष्पपेड, ( स्त्री० ) ॥ ३७ ॥
**विवध–वीवध**–पूर्तआहार, मार्ग, भार, दूकान, ( पुं० )
**विबुध**–पंडित, देवता, ( पुं० )
**विश्रब्ध**–अतिशय, ( अत्यंत ) (न०) ॥ ३८ ॥
**विश्रब्ध**–विश्वासपात्र, अनुद्धट (नम्र) ( त्रि० )
**वीरुत् (ध्)**–बेल, वृक्षशाखा (स्त्री०)
**सन्नद्ध**–रक्खाहुवा या इकट्ठा कियाहुवा, कवचधारी, (पुं०) ॥ ३९ ॥
**सन्निधि**–समीप, ( स्त्री० ) इंद्रियोंका विषय ( पुं० )
**समाधि**–ध्यान, धनधान्यसे मनुष्यका अतिशय आदर, नियम, समर्थन, ( पुं० ) ॥ ४० ॥

"Aho Shrutgyanam"

**सम्बाधः** सङ्कटे योनौ सङ्गरेपि **सुगन्धि** तु ।
शैलेयेऽभीष्टगन्धे च **संरोधः** क्षेपरोधयोः ॥ ४१ ॥
**संसिद्धिस्तु** मता श्रीमत्तिनीप्रकृतिसिद्धिषु ।

धचतुर्थम् ।

**अनिरुद्धः** स्मरसुते पुंसि चानर्गले त्रिषु ॥ ४२ ॥
**अनुबन्धः** प्रकृत्यादेर्नश्वरेऽप्यनुयायिनि ।
दोषोत्पादे शिशौ च स्यात्प्रवृत्तस्यानुवर्त्तने ॥ ४३ ॥
**अनुबन्धी** तु हिक्कायां तृष्णायामपि दृश्यते ।
**अवरोधस्तु** शुद्धान्तेऽप्यन्तर्द्धौ राजसद्मनि ॥ ४४ ॥
स्या**दवष्टब्ध** आक्रान्तेऽप्यदूरेऽप्यविलम्बिते ।
**आशाबन्धः** समाश्वासे मर्कटस्य च वासके ॥ ४५ ॥
**इक्षुगन्धा** कोकिलाक्षे काशे क्रोष्ट्र्यां च गोक्षुरे ।
**उग्रगन्धा** वचायां स्याद्यवान्यां छिक्किकौषधौ ॥ ४६ ॥

---

**सम्बाध**–संकट, योनि (भग), युद्ध, (पुं०)
**सुगन्धि**–शिलाजीत, श्रेष्ठगंध, (न०)
**संरोध**–फेंकना, रोकना, (पुं०) ॥ ४१ ॥
**संसिद्धि**–लक्ष्मीमदवाली स्त्री, स्वभाव, सिद्धि, (स्त्री०)

**धचतुर्थ ।**

**अनिरुद्ध**–कामदेवका पुत्र, (पुं०) अनर्गल(नहींरुकनेवाला), (त्रि०) ॥ ४२ ॥
**अनुबन्ध**–प्रकृति आदिका नश्वरभाग, अनुयायी, दोषोंका उत्पादन, बालक, प्रवृत्तके पश्चात् वर्तना, (पुं०) ॥ ४३ ॥
**अनुबन्धी**–हिचकी, तृष्णा, (स्त्री०)
**अवरोध**–रनवास, अंतर्धान (छुपना) राजाका महल, (पुं०) ॥ ४४ ॥
**अवष्टब्ध**–दबायाहुवा, समीप, नहीं जल्दी किया (पुं०)
**आशाबन्ध**–समाश्वास (दिलासादेना), वानरपकडनेका जाल, (पुं०) ॥ ४५ ॥
**इक्षुगन्धा**–तालमखाना, काश, गीदड़ी, गोखरू (स्त्री०)
**उग्रगन्धा**–बच, अजवायन, नकछींकनी-औषधि (स्त्री०) ॥ ४६ ॥

"Aho Shrutgyanam"

**उपलब्धिः** स्त्रियां प्राप्तिमतिज्ञानेषु लक्षणे ।
**कालस्कन्धस्**तमालेऽपि तिन्दुके जीवकद्रुमे ॥ ४७ ॥
**तीक्ष्णगन्धो** मतः शिग्रौ वचाराजिकयोः स्त्रियाम् ।
**तृणगोधा** भवेच्चित्रकोलके कृकलासके ॥ ४८ ॥
**परिव्याधः** पुमान्नीरवानीरेऽपि द्रुमोत्पले ।
**ब्रह्मबन्धुर**धिक्षिप्ते निर्देशेऽब्राह्मणस्य च ॥ ४९ ॥
**महौषधं** विषाशुण्ठी शृङ्गवेरे रसोनके ।
**समुन्नद्धः** समुद्भूते पण्डितम्मन्यगर्विते ॥ ५० ॥

धपंचमम् ।

**योजनगन्धा** तु कस्तूर्यां व्याससूसीतयोरपि ॥ ५१ ॥

इति विश्वलोचने धान्तवर्गः ॥

---

**उपलब्धि**—प्राप्ति, बुद्धि, ज्ञान, लक्षण, ( स्त्री० )

**कालस्कन्ध**—तमालवृक्ष, तेंदूका पेड जीवक-वृक्ष, ( पुं० ) ॥ ४७ ॥

**तीक्ष्णगंध**—सहँजना, (पुं०) तीक्ष्णगंधा, बच, राई, ( स्त्री० )

**तृणगोधा**—चित्रकंकोल, गिरगट, ( स्त्री० ) ॥ ४८ ॥

**परिव्याध**—जलवेत, कर्णिकार या पांगारा-वृक्ष, ( पुं० )

**ब्रह्मबन्धु**—झिडकाहुवा, ब्राह्मण का-भेद ( अधम ), ( पुं० ) ॥ ४९ ॥

**महौषध**—अतीस, सोंठ, अदरक, ल्हस्सन, ( न० )

**समुन्नद्ध**—अच्छी तरह उत्पन्नहुवा, नहीं पंडित होनेपर निजको पंडित माननेवाला गर्वित (पुं०) ॥ ५० ॥

**धपंचम ।**

**योजनगंधा**—कस्तूरी, व्यासकी माता, सीता, ( स्त्री० ) ॥ ५१ ॥

इस प्रकार विश्वलोचनकी भाषाटीकामें धान्तवर्ग समाप्त हुवा ॥

"Aho Shrutgyanam"

## अथ नान्तवर्गः ।

नैकम् ।

**ना**स्तु नेतरि नावि स्त्री **न**कारो जिनपूज्ययोः ।
**नुः** स्तोतरि नुतौ स्त्री च—स्या**दन्नं** भक्तभुक्तयोः ॥ १ ॥

नद्वितीयम् ।

**इनः** पत्यौ नृपे सूर्येऽप्यु**न्नं** क्लिन्ने रतान्तरे ।
रणोद्योगे भवेदू**न**मूने न्यूनाऽभिधेयवत् ॥ २ ॥
निश्शेषे त्रिषु **कृत्स्नं** स्या**त्कृत्स्नं** स्यादुदरे जले ।
**गानं** गीतेऽपि शब्देऽपि गर्हणे तु विपूर्वकम् ॥ ३ ॥
**घनं** स्यात्कांस्यतालादिवाद्ये मध्यमताण्डवे ।
**घन**स्तु मेघे मुस्तायां विस्तारे लोहमुद्गरे ॥ ४ ॥
काठिन्ये चाथ कठिने सान्द्रेऽपि च **घन**स्त्रिषु ।
**चिह्न**मङ्के पताकायां ध्वजमात्रेऽपि न द्वयोः ॥ ५ ॥

---

### अथ नान्तवर्ग ।

नैक ।

**ना**—प्रासकरनेवाला, ( पुं० )
**ना**—नौका, ( स्त्री० )
**न**( कार )—जिनदेव, पूज्य ( पुं० )
**नु**—स्तुतिकरनेवाला ( पुं० ) स्तुति, ( स्त्री० )

**नद्वितीय ।**

**अन्न**—अन्न,खायाहुवा अन्न आदि,(न०) ॥ १ ॥
**इन**—पति, राजा, सूर्य, ( पुं० )
**उन्न**—गीला, मैथुन भेद, रणका उद्योग, ( न० )
**ऊन**—कमती, न्यूनकेसमान ( त्रि० ) ॥ २ ॥
**कृत्स्न**—संपूर्ण ( त्रि० )
**कृत्स्न**—उदर ( पेट ), जल, ( न० )
**गान**—गाना, शब्द, ( न० )
**विगान**—निंदा, ( न० ) ॥ ३ ॥
**घन**—मंजीरा घंटा आदिबाजा, मध्यमनृत्य, ( न० )
**घन**—मेघ, नागरमोथा, विस्तार, लोहेका मुद्गर, ( पुं० ) ॥ ४ ॥ करड़ापन, कठिन, गहरा, ( त्रि० )
**चिह्न**—लांछन, पताका, ध्वजमात्र, ( न० ) ॥ ५ ॥

"Aho Shrutgyanam"

**चीनो** देशांशुकव्रीहितन्तुभेदे मृगान्तरे ।
रहसि च्छादिते **छन्नमुत्पूर्वं छन्नमु**ज्ज्वले ॥ ६ ॥
**छिन्ना**ऽमृतायां पुंश्चल्यां **छिन्नं** भिन्नेऽभिधेयवत् ।
**जनो** लोके महर्लोकात्परे लोके च पामरे ॥ ७ ॥
**जनी** सीमन्तिनीवध्वोः स्त्रियां तु **जनि**रुद्भवे ।
**जिन**स्त्वर्हति बुद्धेऽतिवृद्धजित्वरयोस्त्रिषु ॥ ८ ॥
**ज्योत्स्ना** तु चन्द्रिकायां स्यात्स्यात्लतायां विभावरौ ।
**ज्योत्स्नी** पटोलिकायां च चन्द्रकान्वितनिश्यपि ॥ ९ ॥
**ज्यानि**र्हानौ तटिन्यां च **तनु**र्देहत्वचोः स्त्रियाम् ।
**तनुः** केशेऽपि विरले स्वल्पमात्रेऽपि वाच्यवत् ॥ १० ॥
**दानं** त्यागे गजमदे छेदे शुद्धौ च रक्षणे ।
विक्रान्ते वाच्यवद्**दानु**र्दानदातरि वाच्यवत् ॥ ११ ॥

---

**चीन**–चीन-देश, वस्त्र, चीना-धान्य, तन्तुभेद, मृगभेद, ( पुं० )

**छन्न**–एकांत, ढकाहुवा, (त्रि०)

**उच्छन्न**–उज्ज्वल, ( त्रि० ) ॥ ६ ॥

**छिन्ना**–गिलोय, व्यभिचारिणी स्त्री, ( स्त्री० )

**छिन्न**–कटाहुवा, ( त्रि० )

**जन**–महर्लोकसे ऊपर लोक, जन (मनुष्यमात्र ), नीच, (पुं०) ॥ ७ ॥

**जनी**–स्त्री-मात्र, पुत्रवधू, ( स्त्री० )

**जनि**–उत्पत्ति ( स्त्री० )

**जिन**–जिनदेव, बुद्धदेव, ( पुं० ) अतिवृद्ध, जीतनेके स्वभाववाला, ( त्रि० ) ॥ ८ ॥

**ज्योत्स्ना**–चंद्रप्रभा, सोमलता, रात्रि ( चाँदनी रात्रि ) ( स्त्री० )

**ज्योत्स्नी**–परवल-शाक, चाँदनीरात्रि, ( स्त्री० ) ॥ ९ ॥

**ज्यानि**– हानि, नदी ( स्त्री० )

**तनु**–शरीर, त्वचा, ( स्त्री० )

**तनु**–केश, विरला ( कोई ), स्वल्पमात्र, ( त्रि० ) ॥ १० ॥

**दान**–त्याग ( दानदेना ), हस्तीका-मद, काटना, शुद्धि, रक्षा, ( न० )

**दानु**–वीर, दानका देनेवाला, (त्रि०) ॥ ११ ॥

"Aho Shrutgyanam"

कातरे दुर्गते **दीनो दीना** मूषिकयोषिति ।
**द्युम्नं** पराक्रमे वित्ते प्रपूर्वे पुंसि मन्मथे ॥ १२ ॥
**धनुः** पुंसि प्रियालद्रौ राशिभेदेऽपि कार्मुके ।
**धनं** तु गोधने वित्ते **धाना** भृष्टयवे स्त्रियाम् ॥ १३ ॥
धान्याकेऽप्यङ्कुरेऽब्धौ तु **धेनो धेनी** सरित्यपि ।
**नग्न**स्त्रिषु विवस्त्रे स्यात्पुंसि क्षपणबन्दिनोः ॥ १४ ॥
**न्यून**मूनेऽपि गर्ह्येऽपि **पानं** पीतौ च रक्षणे ।
**वनं** तु कानने नीरेऽप्युत्से वासप्रवासयोः ॥ १५ ॥
**वस्त्रं** तु वसने मूल्ये वेतनद्रव्ययोरपि ।
**बुध्नः** शिफायामीशाने **भानुः** सूर्येऽपि दीधितौ ॥ १६ ॥
**भिन्नं** वाच्यवदन्यार्थे दारिते सङ्गते स्फुटम् ।
**मानं** प्रमाणे प्रस्थादौ **मान**श्चित्तोन्नतौ ग्रहे ॥ १७ ॥

---

**दीन**–कायर, दरिद्र, ( पुं० )
**दीना**–मूसेकी स्त्री अर्थात् मूसी, (स्त्री०)
**द्युम्न**–पराक्रम, द्रव्य, ( न० )
**प्रद्युम्न**–कामदेव, ( पुं० ) ॥ १२ ॥
**धनु**–चिरोंजी-वृक्ष, धन-राशि, कामी-पुरुष, ( पुं० )
**धन**–गोधन, द्रव्य, ( न० )
**धाना**–भूनाहुवा जौ ( स्त्री० )॥१३॥ धनियां, वृक्षका अंकुर, ( पुं० )
**धेन**–समुद्र, ( पुं० )
**धेनी**–नदी, ( स्त्री० )
**नग्न**–वस्त्ररहित, ( त्रि० ) मुनि, बंदी-जन, ( पुं० ) ॥ १४ ॥
**न्यून**–कमती, निंद्य, ( त्रि० )
**पान**–जल आदिका पीना, रक्षा, (न०)
**वन**–वन ( कानन ), जल, झिरना, घर, प्रवास, ( न० ) ॥ १५ ॥
**वस्त्र**–वस्त्र, मूल्य, नौकरी, द्रव्य, (न०)
**बुध्न**–वृक्षकी जड़, महादेव, ( पुं० )
**भानु**–सूर्य, ( पुं० ) किरण, (स्त्री०) ॥ १६ ॥
**भिन्न**–अन्य, फाडाहुवा, संगत (युक्त) ( त्रि० )
**मान**–प्रस्थ ( ६४ तोले ) आदिप्रमाण, ( न० )
**मान**–चित्तकी उन्नति, ग्रह ( ग्रहणकरना ) ॥ १७ ॥ पूजा, ( पुं० )

"Aho Shrutgyanam"

**मानः** स्यादपि पूजायां **मीनो** राश्यन्तरे झषे ।
**मुनिर्वा**चंयमे बुद्धे प्रियालाऽगस्तिकिंशुके ॥ १८ ॥

इङ्गुद्यामपि **मृत्स्ना** तु तुवरीमृत्स्नयोर्म्मता ।
**यानं** बाह्यगतौ **योनिर्द्वयोः** स्यादाकरे भगे ॥ १९ ॥

**रत्नं** मणावपि श्रेष्ठे **रत्न**श्चक्षकचण्डयोः ।
**रास्ना** तु स्याद्भुजङ्गाक्ष्यामेलापर्ण्यामपि स्मृता ॥ २० ॥

राशीनामुदये **लग्नं लग्नं** सक्तेऽपि लज्जिते ।
**वानं** शुष्कफले शुष्कस्यूतयोस्त्रिष्वथ द्वयोः ॥ २१ ॥

वन्यासुरङ्गावातोर्मिसौरभेषु कटे गतौ ।
**विन्नं** ज्ञाते स्थिते लब्धे **शीनो**ऽजगरमूर्खयोः ॥ २२ ॥

पुंस्येव पत्रिणि **श्येनः श्येनः** श्वेतेऽभिधेयवत् ।
**सानुः** शृङ्गे बुधेऽरण्ये वात्यायां पल्लवे पथि ॥ २३ ॥

---

**मीन**—मीन-राशि, मच्छी, ( पुं० )
**मुनि**—मुनि(साधु), बुद्धदेव, चिरोंजीका वृक्ष, हथिया—वृक्ष, गोंदी-वृक्ष ( पुं० ) ॥ १८ ॥
**मृत्स्ना**—अरहर या तूर, श्रेष्ठ मृत्तिका, ( स्त्री० )
**यान**—आहरको गमन, ( न० )
**योनि**—खान, भग, ( पुं०न० ) ॥१९॥
**रत्न**—मणि, श्रेष्ठ, ( न० )
**रत्न**—( पुं० )
**रास्ना**—सरहटी या मंडनी, रायसन, ( स्त्री० ) ॥ २० ॥
**लग्न**—राशियोंका उदय, ( न० )
**लग्न**—आसक्त, लज्जित ( त्रि० )
**वान**—सूखाफल, सूखा, सीना, (त्रि०) वनसमूह, सुरंग, मृगभेद, अच्छागंध, चटाई, गति, ( पुं० स्त्री० )
**विन्न**—जानाहुवा, स्थित, लब्धहुवा, ( न० )
**शीन**—अजगर-सर्प, मूर्ख, ( पुं० ) ॥ २१ ॥ २२ ॥
**श्येन**—सिकरा-पक्षी, ( पुं० ) सफेद रंगवाला, ( त्रि० )
**सानु**—पर्वतका शृंग, बुध, वन, वायुका समूह, पत्ता, मार्ग, ( पुं० ) ॥ २३ ॥

"Aho Shrutgyanam"

**सूनुः** पुत्रेऽनुजे सूर्ये **सूनुर्दु**हितरि स्त्रियाम् ।
**सूनं** प्रसूने प्रसवे **सूनमु**च्छ्वसिते त्रिषु ॥ २४ ॥
**सूना** पुत्र्यां वधस्थाने गलशुण्ड्यामपीष्यते ।
**स्त्यानं** लोम्नि प्रतिश्रुत्यां मता स्निग्धे तु वाच्यवत् ॥ २५ ॥
**स्थानं** स्थितौ च सादृश्ये संनिवेशाऽवकाशयोः ।
**स्थाने** स्यादव्ययं ख्यातं युक्तार्थकरणार्थयोः ॥ २६ ॥
**स्यूनोऽर्के** किरणे **स्वप्नः** सुप्तधीस्वापदर्शने ।
**हनुः** कपोलावयवे मृत्यौ प्रहरणेऽस्त्रियाम् ॥ २७ ॥
गदे हट्टविलासिन्यां **हीनं** गर्ह्योनयोस्त्रिषु ।

नतृतीयम् ।

**अङ्गनं** प्राङ्गणे यानेप्य**ङ्गना** नायिकान्तरे ॥ २८ ॥
**अङ्गना** वामनेभस्य हस्तिन्यामपि दृश्यते ।
**अञ्जनो** दिक्करीन्द्रे स्याद**ञ्जनं** तु रसाञ्जने ॥ २९ ॥

---

**सूनु**–पुत्र, छोटाभाई, सूर्य, ( पुं० )
**सून**–पुष्प, जन्म ( उत्पत्ति ) (न०)
**सून**–ऊर्द्ध्वश्वास, (त्रि०) ॥ २४ ॥
**सूना**–पुत्री, जीवमारनेका स्थान, तालुके ऊपर एक छोटी जीभ ( स्त्री० )
**स्त्यान**–लोम, ( न० ) प्रतिध्वनि, ( स्त्री० ) स्निग्ध ( स्नेहवाला, ) ( त्रि० ) ॥ २५ ॥
**स्थान**–स्थिति, सादृश्य, प्रवेश, अवकाश, ( न० )
**स्थाने**–युक्त अर्थ, करण अर्थ, (अव्यय ) ॥ २६ ॥
**स्यून**–सूर्य, किरण, ( पुं० )
**स्वप्न**–सोना, स्वप्नका देखना, ( पुं० )
**हनु**–ठोडी, मृत्यु, हथियार, ॥ २७ ॥ रोगविशेष, नख-गंधद्रव्य, (पुं०न०)
**हीन**–निंदित, न्यून (कमती ) (त्रि०)

**नतृतीय ।**

**अङ्गन**–आँगन, सवारी ( न० )
**अंगना**–स्त्री, ॥ २८ ॥ वामननामदिग्हस्तीकी हस्तिनी, ( स्त्री० )
**अंजन**–एक दिग्हस्ती, ( पुं० ) रसौत ( न० ) ॥ २९ ॥

"Aho Shrutgyanam"

अक्षिकज्जलसौवीरे गिरिभेदेऽप्यथाञ्जने ।
ज्येष्ठीभेदे मरुत्पत्न्याम**ञ्जनी** लेप्ययोषिति ॥ ३० ॥
**अध्वा** वर्त्मनि संक्लेशे स्कन्दे संस्थानकालयोः ।
**अपानो** गुदवाते स्याद**पानं** तु गुदे मतम् ॥ ३१ ॥
**आब्जिनी विसिनी**त्यादिपदान्यब्जसरोवरे ।
महासहायामाम्लानः पुंस्येव त्रिषु निर्मले ॥ ३२ ॥
**अयनं** पथि भानोश्च दक्षिणोत्तरतोगतौ ।
नाऽ**रत्निः** कफणौ हस्ते प्रकोष्ठविततांगुलौ ॥ ३३ ॥
**अर्जुनः** पार्थककुभकार्त्तवीर्यशिखण्डिषु ।
मातुरेकसुतेऽपि स्याद**र्जुनो** धवलेऽन्यवत् ॥ ३४ ॥
**अर्जुनी** गव्युषायांच कुट्टिनीकरतोययोः ।
**अर्जुनं** तु तृणे नेत्ररोगेऽपि क्लीब**मर्जुनम्** ॥ ३५ ॥

---

नेत्रोंका, कज्जल, कालासुरमा, पर्वतभेद, ज्येष्ठीमधु, वायुकी स्त्री, ( त्रि० ) अंजनी, स्त्रीका चित्र, ( स्त्री० ) ॥ ३० ॥

**अ( ध्वन् )ध्वा**—मार्ग, संक्लेश, क्षिरना, मृत्यु, काल, ( पुं० )

**अपान**—गुदाका वायु, ( पुं० )

**अपान**—गुद, ( न० ) ॥ ३१ ॥

**अब्जिनी—विसिनी**—कमल, सरोवर, ( स्त्री० )

**अम्लान**—मखवन ( पुं० ) निर्मल, ( त्रि० ) ॥ ३२ ॥

**अयन**—मार्ग, दक्षिण और उत्तरसे सूर्यगति, ( न० )

**अरत्नि**—कोहनी, अँगुलियोंसमेत फैलाहुवा हाथ ( पुं० ) ॥ ३३ ॥

**अर्जुन**—अर्जुन-पांडुराजाका पुत्र, एकवृक्ष, सहस्रबाहु, शिखंडी, माताका-एकपुत्र, ( पुं० ) श्वेतवर्ण, (त्रि०) ॥ ३४ ॥

**अर्जुनी**—गौ, उषा-बाणासुरकी पुत्री, कुट्टनी, करतोया नदी, ( स्त्री० )

**अर्जुन**—तृण, नेत्ररोग, (न०) ॥३५॥

"Aho Shrutgyanam"

**अर्थी** स्याद्याचके यक्षे सेवके च विवादिनि ।
**अर्वा** हये पुमानर्वा कुत्सितेऽप्यभिधेयवत् ॥ ३६ ॥
**अर्शोघ्नी** तालपर्ण्यां स्यादर्शोघ्नः शूरणे पुमान् ।
**अली** तु वृश्चिके भृङ्गेऽप्यवनं रक्षणे मुदि ॥ ३७ ॥
**अशनिस्तु** द्वयोर्वज्रे तडित्यपि मताऽशनिः ।
**असनं** क्षेपणे क्लीवमसनः पीतसारके ॥ ३८ ॥
**असिक्नी** सरिति प्रेष्याशुद्धान्ताऽवृद्धयोषिति ।
**आत्मा** ब्रह्ममनोदेहस्वभावधृतिबुद्धिषु ॥ ३९ ॥
आत्मायत्तेऽप्यथाऽऽ**दानं** ग्रहणे वाजिभूषणे ।
**आपन्नस्तु** विपत्प्राप्ते प्राप्ते चाप्यभिधेयवत् ॥ ४० ॥
**आसनं** द्विरदस्कन्धपीठे पीठस्थितावपि ।
**आसनी** पण्यवीथ्यां स्यादासनो जीवकद्रुमे । ॥ ४१ ॥

---

**अर्थिन्**–याचक, यक्ष, सेवक, विवादी, ( पुं० )
**अर्वन्**–अश्व, (पुं०) कुत्सित, (त्रि०) ॥ ३६ ॥
**अर्शोघ्नी**–कपूरकचरी, ( स्त्री० )
**अर्शोघ्न**–जमीकंद, ( पुं० )
**अलिन्**–बीछू, भौंरा, ( पुं० )
**अवन**–रक्षा, आनंद, ( न० )॥३७॥
**अशनि**–वज्र, ( पुं०स्त्री० ) बिजली, ( स्त्री० )
**असन**–फेंकना, ( न० )
**असन**–विजयसार, ) पुं० ) ॥ ३८॥
**असिक्नी**–नदीभेद, रनवासमें जानेवाली जवानदासी, ( स्त्री० )
**आत्म(न्)**–ब्रह्म, मन, शरीर, स्वभाव, धृति, बुद्धि, अपने अधीन ( पुं० ) ॥ ३९ ॥
**आपन्न**–विपत्को प्राप्तहुआ, प्राप्तहुवा, ( त्रि० ) ॥ ४० ॥
**आसन**–हस्तियोंका कंधा, हस्तियोंकी-पीठ, पट्टाआदि, स्थिति, ( न० )
**आसनी**–दुकानोंकी पंक्ति, ( स्त्री० )
**आसन**–जीयापोता वृक्ष, ( पुं० ) ॥ ४१ ॥

"Aho Shrutgyanam"

**उत्तान**मुन्मुखे सुप्तेऽप्यगम्भीरेऽपि वाच्यवत् ।
**उत्थान**मुद्गमे तन्त्रेऽप्युद्यमे हर्षणे रणे ॥ ४२ ॥
प्राङ्गणे पौरुषे चैव मलवेगे च पुस्तके ।
**उदान**स्तूदरावर्त्ते कण्ठवाताहिभेदयोः ॥ ४३ ॥
**उद्धानं** चुल्लिकायां स्यान्मतमुद्गमनेऽपि च ।
**उद्यानं** क्लीवमाक्रीडे निःसृतौ च प्रयोजने ॥ ४४ ॥
**कठिना** तु मता स्थाल्यां शर्करायां गुडस्य च ।
खटिकायां तु **कठिनी कठिनं** निष्ठुरे त्रिषु ॥ ४५ ॥
**कदनं** युधाद्ये कामे **कम्पनं** कम्प्रकम्पयोः ।
**कमनः** कामुके चाभिरूपे चाशोककामयोः ॥ ४६ ॥
**कर्म्म** व्याप्ये क्रियायां च परे स्यादङ्गसंस्कृतौ ।
**कर्त्तनं** छेदने तूलतन्तुकर्म्मणि योषिताम् ॥ ४७ ॥

---

**उत्तान**—ऊपरको मुखकरके सोयाहुवा, नहींगंभीर अर्थात् ऊँचा, ( त्रि० )
**उत्थान**—उद्गम, तन्त्र, उद्यम, आनंद, रण, ॥ ४२ ॥ आँगन, पौरुष, मलवेग, पुस्तक, ( न० )
**उदान**—उदरका चक्र, कंठमें रहनेवाला वायु, सर्पभेद, ( पुं० ) ॥ ४३ ॥
**उद्धान**—चूल्हा, ( न० ) उद्गत ( प्रकटहुवा ) ( त्रि० )
**उद्यान**—बगीचा-घरका, निकसना, प्रयोजन, ( न० ) ॥ ४४ ॥
**कठिना**—स्थाली ( चावलआदिपकानेका पात्र ) गुड़की डली, ( स्त्री० )
**कठिनी**—खड़िया-(मिट्टी ) ( स्त्री० )
**कठिन**—निष्ठुर ( कठोर ) ( त्रि० ) ॥ ४५ ॥
**कदन**—युद्धआदि, कामदेव, ( न० )
**कम्पन**—कम्पनेके स्वभाववाला, काँपना ( न० )
**कमन**—कामीपुरुष, सुंदर-पुरुष, शोकरहित, काम, ( पुं० ) ॥ ४६ ॥
**कर्मन्**—व्याप्य, क्रिया, पर, अंगका संस्कार, ( न० )
**कर्तन**—कतरना, सूतकातना, (न०) ॥ ४७ ॥

"Aho Shrutgyanam"

कलग्लायान्तु **कलनं कलनं** बन्धनेऽपि च ।
**कल्पनं** छेदने क्लृप्तौ **कल्पना** गजसज्जने ॥ ४८ ॥
पणस्य मानदण्डस्य चतुर्थांशेऽपि **काकिनी** ।
**काञ्चनो** धूर्त्तपुन्नागनागकेसरचम्पके ॥ ४९ ॥
उदुम्बरे काञ्चनारे हरिद्रायां च **काञ्चनी** ।
क्लीबं तु काञ्चने हेम्नि केशरेऽपि च **काञ्चनम्** ॥ ५० ॥
**काननं** विपिनेऽपि स्याच्चतुर्म्मुखमुखे गृहे ।
व्यासे कर्णेपि **कानीनः कानीनः** कन्यकासुते ॥ ५१ ॥
**कामिनी** नायिकाभेदे वन्दायामपि **कामिनी** ।
**कामी** तु कामुके कोके **कामी** पारावतेऽपि च ॥ ५२ ॥
**कुम्भानं** तु ह्यलङ्कारे भाजने गोलकान्तरे ।
**कुहना** दम्भचर्यायामीर्ष्यालौ दाम्भिके त्रिषु ॥ ५३ ॥

---

**कलन**–बंधन ( न० )
**कल्पन**–छेदन, रचना, ( न० )
**कल्पना**–हस्तीसिंगारना, ( स्त्री० ) ॥ ४८ ॥
**काकिनी**–पैसाका चौथाहिस्सा, मान दंडका चौथाहिस्सा ( स्त्री० )
**कांचन**–धतूरा,पुन्नाग-वृक्ष,नागकेसर, चंपा, ॥ ४९ ॥ गूलर-वृक्ष, कचनार-वृक्ष, ( पुं० )
**कांचनी**–हलदी, ( स्त्री० )
**कांचन**–सुवर्ण, कमल केसर, (न०) ॥ ५० ॥
**कानन**–वन, ब्रह्माका मुख, घर, ( न० )
**कानीन**–व्यास, कर्ण, कन्याका पुत्र, ( पुं० ) ॥ ५१ ॥
**कामिनी**–स्त्रीभेद, वृक्षकी लता ( स्त्री० )
**कामिन्**–कामी-पुरुष, चकवा, कबूतर ( पुं० ) ॥ ५२ ॥
**कुम्भान**–आभूषण, पात्र, गोलाभेद, ( न० )
**कुहना**–दंभचर्या, ईर्षाकरनेवाला, दंभकरनेवाला, ( त्रि० ) ॥ ५३ ॥



"Aho Shrutgyanam"

**कृती** तु पण्डिते योग्ये **केतनं** लाञ्छने गृहे ।
**केतनं** स्यात्पताकायां कार्ये चोपनिमन्त्रणे ॥ ५४ ॥

चीनैकदेशे **कौपीनं** स्याद्गुह्याकार्ययोरपि ।
**कौलीनं** तु परीवादे कुलीनत्वे कुकर्म्मणि ॥ ५५ ॥

गुह्येऽपि सङ्गरेपि श्वभुजङ्गपशुपक्षिणाम् ।
भवेत्**क्रन्दन**माह्वाने मतमश्रुविमोचने ॥ ५६ ॥

**खड्गी** तु गण्डके पुंसि **खड्गी** खड्गायुधेऽपि च ।
**गन्धनं** सूचने हिंसासमुत्साहप्रकाशने ॥ ५७ ॥

**गर्जनं** तु मतं कोपे निस्वने मेघनिस्वने ।
**गहनं** कानने दुःखे गह्वरे कलिलेऽपि च ॥ ५८ ॥

**गायनं** स्वप्ने क्लीबं च गीतजीविनि गायने ।
विषदिग्धपशोर्म्मांसे **गृञ्जनं** लशुने पुमान् ॥ ५९ ॥

---

**कृतिन्**–पंडित, योग्य, ( पुं० )
**केतन**–लांछन, घर, ( न० )
**केतन**–पताका, कार्य, निमंत्रण,(न०) ॥ ५४ ॥
**कौपीन**–वस्त्रका खंड, गुह्य-देश, अ· कार्य, ( न० )
**कौलीन**–निंदा, कुलीनत्व, कुकर्म, ॥ ५५ ॥
गुह्यदेश, कुत्ता सर्प-पशु-पक्षियोंका युद्ध, ( न० )
**क्रंदन**–बुलाना, आँसूडालना, (न०) ॥ ५६ ॥
**खड्गिन्** गैंडा, ( पुं० ) खड्गहथिया-रवाला, ( त्रि० )
**गंधन**–सूचनकरना, हिंसा, उत्साह-का प्रकाश, ( न० ) ॥ ५७ ॥
**गर्जन**–क्रोध, शब्द, मेघशब्द (न०)
**गहन**–वन, दुःख, सकड़ा, सघन, ( न० ) ॥ ५८ ॥
**गायन**–स्वप्न ( न० ) गानेकी जीवि-कावाला, ( त्रि० ) गाना, ( न० )
**गृंजन**–विषमिला पशुका मांस, (न०) ल्हसन, ( पुं० ) ॥ ५९ ॥

"Aho Shrutgyanam"

**गोमी** गवीश्वरे हरौ स्यान्महेष्वासकेऽपि च ।
**गोस्तनी** हारहूरायां हारभेदे तु **गोस्तनः** ॥ ६० ॥
**ग्रावा** तु पुंसि पाषाणे गिरिवारिदयोरपि ।
**घट्टना** चलनायां स्यादावृत्त्यामपि **घट्टिनी** ॥ ६१ ॥
**चक्री** हरिकुलालाऽहिकोकेषु ग्रामजालिने ।
**चन्दना** कालिभेदे स्याच्**चन्दनं** मलयोद्भवे ॥ ६२ ॥
**चन्दनी** तु नदीभेदे **चर्म्म** स्यात्फलकत्वयोः ।
**चर्म्मी** फलकपाणौ स्याद्भृङ्गरीटे मृदुत्वचि ॥ ६३ ॥
**चलनं** भ्रमणे कम्पे वाच्यवत्कम्पशालिनि ।
**चलनी** वस्त्रघर्घर्यां वारीभेदेऽपि दृश्यते ॥ ६४ ॥
**चेतन**श्चेतनायुक्ते त्रिषु संविदि **चेतना** ।
पत्रे पतत्रे **छदनं छद्म** शापकिलासयोः ॥ ६५ ॥

---

**गोमिन्**–गौवोंका स्वामी, विष्णु, बडाधनुष, ( पुं० )
**गोस्तनी**–दाख, ( स्त्री० )
**गोस्तन**–हारभेद, ( पुं० ) ॥ ६० ॥
**ग्रावन्**–पत्थर, पर्वत, मेघ, ( पुं० )
**घट्टना**–चलना, **घट्टिनी**–आवृत्ति, ( स्त्री० ) ॥ ६१ ॥
**चक्रिन्**–विष्णु, कुम्हार, सर्प, चकवा, ग्राममें होनेवाली तोरई, ( पुं० )
**चन्दना**–कालीभेद, ( स्त्री० )
**चन्दन**–मलयाचलमें होनेवाला काष्ठ, ( न० ) ॥ ६२ ॥
**चन्दनी**–नदीभेद, ( स्त्री० )
**चर्मन्**–ढाल, त्वचा, ( न० )
**चर्मिन्**–ढालधारी, भृंगरीट ( शिवगण ) भोजपत्र, ( पुं० ) ॥ ६३ ॥
**चलन**–भ्रमण, कंप, (न०) काँपनेके स्वभाववाला ( त्रि० )
**चलनी**–वस्त्रकी घघरी, हस्तीके पैरबाँधनेकी रस्सी, ( स्त्री० ) ॥ ६४ ॥
**चेतन**–चेतना (बुद्धि) सेयुक्त,(त्रि०)
**चेतना**–बुद्धि, ( स्त्री० )
**छदन**–पत्ता, पक्षीकी पर, ( न० )
**छद्मन्**–शाप, सीपरोग, ( न० ) ॥ ६५ ॥

"Aho Shrutgyanam"

लक्ष्येऽपि **छर्दनस्तु** स्यान्निम्बालम्बुषवान्तिषु ।
**छेदनं** भेदने छेदे **जगंस्तुर्जन्तुशुष्मणोः** ॥ ६६ ॥
**जघनं** वनिताश्रोणीपुरोभागे कटावपि ।
**जयनं** तु जये वाजिगजप्रभृतिकञ्चुके ॥ ६७ ॥
**यवनो** यवमात्रेऽपि यवाधिकतुरङ्गमे ।
देशभेदे तुरुष्केऽपि **जवनः** प्रजवे त्रिषु ॥ ६८ ॥
**तपनो** रविसन्तापे भल्लके नरकान्तरे ।
**तमोघ्नश्चन्द्रसूर्याऽग्निबुद्धश्रीकण्ठविष्णुषु** ॥ ६९ ॥
**तलिनं** विरले स्तोके स्वच्छगम्भीरयोरपि ।
**तलुनः** पवने यूनि वाच्यवत्त**लुनी** स्त्रियाम् ॥ ७० ॥
**तेमनं** व्यञ्जने क्लेदे चुल्लिकाभिदि **तेमनी** ।
**तोदनं** व्यथने तोत्रे **त्यागी** सूरेऽपि दातरि ॥ ७१ ॥

---

**छर्दन**–निशाना, नींब, लजालूभेद, छर्दि ( त्रि० )
**छेदन**–भेदनकरना, छेदनकरना, ( न० )
**जगन्**–जन्तु, अग्नि, ( पुं० ) ॥६६॥
**जघन**–स्त्रीकी श्रोणियोंका अग्रभाग ( जाँघ ), और कटि, ( न० )
**जयन**–जय, अश्व (घोडे) हाथी आदि का कवच ( न० ) ॥ ६७ ॥
**यवन**–जवमात्र, जवभरजादा अश्व, देशभेद, यवन ( मुसल्मान ) जाति, ( पुं० )
**जवन**–बहुतवेगवाला (त्रि० )॥६८॥
**तपन**–सूर्यसे गरम ( धूप ), भिलावा, नरकभेद, ( पुं० )
**तमोघ्न**–चंद्रमा, सूर्य, अग्नि, बुद्धदेव, महादेव, विष्णु, ( पुं० ) ॥ ६९ ॥
**तलिन**–विरल (कोई), थोडा, स्वच्छ, गम्भीर, ( त्रि० )
**तलुन**–वायु, ( पुं० ) जवान, (त्रि०)
**तलुनी**–जवान स्त्री, ( स्त्री० ) ॥७०॥
**तेमन**–व्यंजन ( शाक ), गीला,(न०)
**तेमनी**–चूल्हाभेद ( स्त्री० )
**तोदन**–पीडा, बैलआदि हाँकनेकी पैनी, ( न० )
**त्यागिन्**–शूर, दाता, ( पुं० )॥७१॥

"Aho Shrutgyanam"

पुष्पे वीरेऽपि **दमनो दर्शनं** दृशि दर्पणे ।
स्वप्ने वर्त्मनि बुद्धौ च शास्त्रधर्म्मोपलब्धिषु ॥ ७२ ॥
**दंशनः** शिशिरे पुंसि **दंशनं** कवचे रदे ।
**दहने** दुष्टचरिते भल्लाते चित्रकेऽनले ॥ ७३ ॥
**दृशानस्तु** गृहपतौ **दृशानं** ज्योतिषि स्मृतम् ।
**देवनः** पाशके पुंसि **धन्व** चापे स्थलेऽपि च ॥ ७४ ॥
**धन्वी** धनुर्द्धरे खिन्नेऽप्यर्जुने चार्जुनद्रुमे ।
**धमनस्त्वनले** भस्त्राध्मापकक्रूरयोस्त्रिषु ॥ ७५ ॥
**धमनी** कंधरायां च हरिद्राशिरयोरपि ।
**धाम** रश्मौ गृहे देहे प्रभावस्थानजन्मसु ॥ ७६ ॥
**धावनं** धाविते शुद्धौ पृष्टिपर्ण्यां तु **धावनी** ।
स्याद्धावनी रजन्यां च धौतांजन्यां च तत्तरे ॥ ७७ ॥

---

**दमन**–दौंना पुष्प, वीर, ( पुं० )
**दर्शन**–दृष्टि ( नेत्र ), दर्पण ( शीशा ), स्वप्न, मार्ग, बुद्धि, शास्त्र, धर्म, उपलब्धि ( प्राप्ति ) (न०) ॥७२॥
**दंशन**–शिशिर-ऋतु, ( पुं० )
**दंशन**–कवच, दाँत, ( न० )
**दहन**–दुष्टचरितवाला, भिलावा, चीता, अग्नि, ( पुं० ) ॥ ७३ ॥
**दृशान**–घरका स्वामी, ( पुं० )
**दृशान**–ज्योति, ( न० )
**देवन**–चौपड़खेलनेका पासा, ( पुं० )
**धन्वन्**–धनुष, स्थल, ( न० )॥७४॥
**धन्विन्**–धनुषधारी, चतुरमनुष्य, अर्जुन, अर्जुनवृक्ष, ( पुं० )
**धमन**–अग्नि, धमनीसे अग्निधमनेवाला, क्रूर, ( पुं० ) ॥ ७५ ॥
**धमनी**–ग्रीवा, हलदी, नाडी, (स्त्री०)
**धाम**–किरण, घर, शरीर, प्रभाव, स्थान, जन्म, ( न० ) ॥ ७६ ॥
**धावन**–धोवना, शुद्धि, ( न० )
**धावनी**–पिठवन ( स्त्री० )
**धावनी**–रात्रि, धोयाहै अंजनजिसने ऐसी स्त्री,–( स्त्री० ) ॥ ७७ ॥

"Aho Shrutgyanam"

**ध्वजी** द्विजे रथे शैले तुरङ्गे च भुजङ्गमे ।
**नन्दनो** हर्षके पुत्रे **नन्दनं** मिश्रकावने ॥ ७८ ॥
**नन्दनी** तु मता देवधुनीधेनुननान्दृषु ।
**नन्दी** नन्दीश्वरे गर्द्दभाण्डन्यग्रोधवृक्षयोः ॥ ७९ ॥
**नलिनी** तु सरोजिन्यां सरोजे च सरोवरे ।
व्योमगङ्गामलिकयोः **नलिनं** तु जलाब्जयोः ॥ ८० ॥
**निदानं** रोगनियमेऽप्यादिहेत्ववमानयोः ।
वत्सदाम्नि **निदानं** स्यान्निधनं कुलनाशयोः ॥ ८१ ॥
**पत्री** काण्डखगश्येननगद्रुरथिके रथे ।
**पद्मिनी** पद्मनलिनीसरस्सु वनितान्तरे ॥ ८२ ॥
**पर्व** स्यादुत्सवे ग्रन्थौ दर्शप्रतिपदोरपि ।
तत्सन्धौ विषुवादौ च प्रस्तावे लक्षणान्तरे ॥ ८३ ॥

---

**ध्वजिन्**—ब्राह्मण, रथ, पर्वत, सर्प, ( पुं० )
**नंदन**—हर्षकरनेवाला, पुत्र,
**नन्दन**—इंद्रका बगीचा, ( न० )॥७८॥
**नंदनी**—गंगा, धेनु–भेद, ननद,(स्त्री०)
**नन्दिन्**—नंदीश्वर-रुद्रगण, पारसपीपल, बड़-वृक्ष, ( पुं० ) ॥ ७९ ॥
**नलिनी**—कमलिनी, कमल, सरोवर, आकाशगंगा, आँवला, ( स्त्री० )
**नलिन**—जल, कमल, ( न० ) ॥ ८० ॥
**निदान**—रोगोंका दूरकरना, आदिकारण, अपमान, बछड़ाकी रस्सी, ( न० )
**निधन**—कुल, नाश, ( न० ) ॥८१॥
**पत्रिन्**—बाण– पक्षी, शिकरा, पर्वत, वृक्ष, रथरवान, रथ, ( पुं० )
**पद्मिनी**—कमल, कमलिनी, सरोवर, स्त्रीभेद, ( स्त्री० ) ॥ ८२ ॥
**पर्वन्**—उत्सव, ग्रंथि, अमावस्या, प्रतिपदा, अमावस्या प्रतिपदाकी संधि, समानदिनरात्रिवाला काल आदि, प्रस्ताव, लक्षणभेद, ( न० ) ॥ ८३ ॥

"Aho Shrutgyanam"

**पवनो**ऽस्त्री कुलालस्य पाकस्थानेऽनिले पुमान् ।
निर्विकल्पेऽपि **पवनः पक्ष्म** लोचनलोमनि ॥ ८४ ॥
**पक्ष्म** सूत्रादिसूक्ष्मांशे **पक्ष्म** स्यात्केशरेऽपि च ।
**पावनं** तु जले कृच्छ्रे पावकाध्यासयोः पुमान् ॥ ८५ ॥
**पाठीन**स्तु वदाले स्यादपि चित्रवदालके ।
पाठके गुग्गुलुद्रौ च प्रायश्चित्ते तु **पाचनम्** ॥ ८६ ॥
**पाचनी** तु हरीतक्यां **पाचनो** वह्निसिह्लयोः ।
**पावनं** पावयितरि त्रिषु पूतेऽपि **पावनम्** ॥ ८७ ॥
वरुणे पुंसि स्यात्**पाशी पाशी** पाशधरेऽन्यवत् ।
**पिशुनो** नारदे पुंसि खलसूचकयोस्त्रिषु ॥ ८८ ॥
**पिशुनं** कुङ्कुमे क्लीबं पृक्कायां **पिशुना** मता ।
**पीतनः** कपिचूते स्यात्**पीतनं** पीतदारुणि ॥ ८९ ॥

---

**पवन**–कुम्हारका पाकस्थान, वायु, निर्विकल्प, ( पुं० )

**पक्ष्म**–नेत्रोंके लोम, ॥ ८४ ॥ सूत्र आदिका सूक्ष्म अंश, केशर, (न०)

**पावन**–जल, कृच्छ्र-व्रत आदि, अग्नि, अध्यास, (जैसे रज्जुमें सर्प) (पुं०) ॥ ८५ ॥

**पाठीन**–मत्स्यभेद, चितकबरामत्स्य-भेद, पढानेवाला, गूगल-वृक्ष,(पुं०)

**पाचन**–प्रायश्चित्त ( दोषदूरकरनेके-लिये पुण्यकर्म ) (न०) ॥ ८६ ॥

**पाचनी**–हरड, ( स्त्री० )

**पाचन**–अग्नि, हींग, ( पुं० )

**पावन**–पवित्र करनेवाला, पवित्र, ( त्रि० ) ॥ ८७ ॥

**पाशिन्**–वरुण, ( पुं० ) फाँसीधारणकरनेवाला, ( त्रि० )

**पिशुन**–नारदमुनि, ( पुं० ) खल, चुगलखोर, ( त्रि० ) ॥ ८८ ॥

**पिशुन**–कुंकुम ( केसर ) ( न० )

**पिशुना**–असवरग-शाक,

**पीतन**–अंबाडा, पीतवृक्ष ॥ ८९ ॥

"Aho Shrutgyanam"

कुङ्कुमे हरिताले च **पूतना** राक्षसीभिदि ।
पथ्यायां चाथ **पृतना**ऽनीकिनीसैन्यभेदयोः ॥ ९० ॥
स्याच्चमूसेनयोश्चाथ **प्रज्ञानं** लाञ्छने धियि ।
**प्रधनं** दारुणे सङ्ख्ये **प्रधानं** परमात्मनि ॥ ९१ ॥
क्षेत्रज्ञधीमहामात्रेऽप्येकत्वे तूत्तमे सदा ।
**प्रसूनो** वाच्यवज्जाते **प्रसूनं** फलपुष्पयोः ॥ ९२ ॥
**प्रसन्ना** मदिरायां स्यात्प्रसादसहिते त्रिषु ।
**प्रेत्वा** तु सारसे वाते **प्रेम** तु स्नेहनर्म्मणोः ॥ ९३ ॥
**फाल्गुनस्तु** तपस्ये स्यादर्जुने चार्जुनद्रुमे ।
**फाल्गुनः** स्यान्नदीजेऽपि **फाल्गुनी** पूर्णिमान्तरे ॥ ९४ ॥
**बन्धनं** तु शतंबन्धे बन्धमात्रेऽपि **बन्धनम्** ।
**वर्द्धनं** छेदने वृद्धौ वारिधान्यां तु **वर्द्धिनी** ॥ ९५ ॥

---

केसर, हरिताल, ( पुं० )
**पूतना**–राक्षसीभेद, हरड, ( स्त्री० )
**पृतना**–सेना-मात्र, सेनाभेद, चमू ( सेनाभेद ), ( स्त्री ) ॥ ९० )
**प्रज्ञानं**–लांछन ( चिह्न ), बुद्धि, (न०)
**प्रधन**–कठोर युद्ध, ( न० )
**प्रधान**–परमात्मा, ( न० ) ॥ ९१ ॥ क्षेत्रज्ञ, बुद्धि, मंत्री, एकत्व, सदा उत्तम, ( न० )
**प्रसून**–उत्पन्नहुवा, ( त्रि० )
**प्रसून**–फल, पुष्प, ( न० ) ॥ ९२॥
**प्रसन्ना**–मदिरा, ( स्त्री० ) प्रसादयुक्त, ( त्रि० )
**प्रेत्वन्**–सारस-पक्षी, वायु, ( पुं० )
**प्रेमन्**–स्नेह ( प्रीति ), ठट्ठा, ( न० ) ॥ ९३ ॥
**फाल्गुन**–फाल्गुनमास, अर्जुन, कोह-वृक्ष, भीष्म, ( पुं० )
**फाल्गुनी**–फाल्गुनमासकी पूर्णिमा, ( स्त्री० ) ॥ ९४ ॥
**बन्धन**–शतबंध, बन्धमात्र, ( न० )
**वर्द्धन**–छेदन, वृद्धि, ( न० )
**वर्द्धिनी**–जलकी, मटकी ( स्त्री० ) ॥ ९५ ॥

"Aho Shrutgyanam"

संपूर्वाद्वर्द्धनं पोषे **वसनं** छादनांशुके ।
**वाणिनी** तु मत्तानर्त्तक्योर्विदग्धायां स्त्रियामथ ॥ ९६ ॥
**वासना** वसने वारासनज्ञाने च धूपने ॥
**वाहिनी** स्यादनीकिन्यां सैन्यभेदे सरित्यपि ॥ ९७ ॥
गुरौ पुंसि **बुधानः** स्याद्बुधानः पण्डितेऽपि च ।
**बोधनी** बोधिपिप्पल्योर्**बोधनं** गन्धदीपने ॥ ९८ ॥
सुरवर्त्मनि च **व्योम** व्योमचारिणि च स्मृतम् ।
**ब्रह्मा** विरिञ्चे विप्रेऽपि ऋत्विक्चन्द्रार्कयोगयोः ॥ ९९ ॥
**ब्रह्म** क्लीबं श्रुतिज्ञानेऽप्यध्यात्मतपसोरपि ।
ब्रह्माण्यां **भट्टिनी** नाट्ये राजयोषिति **भट्टिनी** ॥ १०० ॥
**भण्डनं** तु खलीकारे युद्धसन्नाहयोरपि ।
**भर्म्म** स्वर्णे भृतौ सारे **भवनं** भावसद्मनोः ॥ १०१ ॥

---

**संवर्द्धन**–पोषण, ( न० )
**वसन**–आच्छादन, वस्त्र, ( न० )
**वाणिनी**–मदोन्मत्ता स्त्री, नाचनेवाली, चतुरा स्त्री, ( स्त्री० ) ॥ ९६ ॥
**वासना**–वस्त्र, शतबंधआदि, धूपदेना, ( स्त्री० )
**वाहिनी**–सेना, सेनाभेद, नदी, ( स्त्री० ) ॥ ९७ ॥
**बुधान**–बृहस्पति, पंडित, ( पुं० )
**बोधनी**–पीपल-वृक्ष, पिप्पली ( औषधि ( स्त्री० )
**बोधन**–गन्धदीपन ( गूगल ) (न०) ॥ ९८ ॥
**व्योमन्**–आकाश, अकाशचारी, (न०)
**ब्रह्मन्**–ब्रह्मा, ब्राह्मण, यज्ञकरानेवाला, चंद्रसूर्यका योग, ( पुं० ) ॥ ९९ ॥
**ब्रह्मन्**–श्रुतिज्ञान, ब्रह्मविद्या, तप, (न०)
**भट्टिनी**–ब्राह्मणी, नाट्यमें राजाकी रानी ( स्त्री० ) ॥ १०० ॥
**भण्डन**–नहींबुराको बुरा कहना, युद्ध, कवच, ( न० )
**भर्मन्**–सुवर्ण, नौकरी, सार, ( न० )
**भवन**–भाव, स्थान, (न०) ॥१०१॥

"Aho Shrutgyanam"

**भाजनं** पात्रे योग्येऽपि **भावना** ध्यानलेपयोः ।
**भुवनं** तु जगल्लोकसलिलेषु विहायसि ॥ १०२ ॥
**भोगी** भोगान्विते सर्पे ग्रामण्यां राज्ञि नापिते ।
संगृहीतस्त्रियां राजभार्याभेदेऽपि **भोगिनी** ॥ १०३ ॥
**मंजनं** भोजने क्लीबमलंकर्त्तरि वाच्यवत् ।
**मदनः** स्मरधत्तूरवसन्तद्रुमसिक्थके ॥ १०४ ॥
**मलनः** पठवासेऽपि स्यान्**मलनं** कर्द्दमे मतम् ।
पुष्पवत्यां तु **मलिनी मलिनं** दूषितेऽसिते ॥ १०५ ॥
**मार्ज्जनं** तु मतं मार्ष्टौ **मार्जनो** लोध्रपादपे ।
**मालिनी** वृत्तभेदे स्याद्गङ्गामालिकयोषितोः ॥ १०६ ॥
गौर्यां चम्पानगर्यां च राशौ तु **मिथुनः** पुमान् ।
**मिथुनं** दम्पतीयुग्मे सम्बन्धग्राम्यधर्म्मयोः ॥ १०७ ॥

---

**भाजन**—पात्र, योग्य, ( न० )
**भावना**—ध्यान, लेप, ( स्त्री० )
**भुवन**—जगत्, लोक-स्वर्ग आदि, जल, आकाश, ( न० )॥ १०२ ॥
**भोगिन्**—भोगोंसे युक्त, सर्प, ग्राममें प्रधान, राजा, नाई, ( पुं० )
**भोगिनी**—विवाहके विना संग्रहकरी हुई स्त्री, पाट्टरानीके विना राजाकी अन्य रानी, ( स्त्री० ) ॥ १०३ ॥
**मंजन**—भोजन, ( न० ) भूषितकरनेवाला ( त्रि० ) ।
**मदन**—कामदेव, धतूरा, वसन्तवृक्ष ( आमका पेड ), मोम, ( पुं० ) ॥ १०४ ॥
**मलन**—पढनेका स्थान, ( पुं० ) कीच, ( न० )
**मलिनी**—रजस्वला स्त्री, ( स्त्री० )
**मलिन**—दूषित, काला (न०) ॥ १०५ ॥
**मार्जन**—माजना, ( न० ) **मार्जन**-लोधका वृक्ष, ( पुं० )
**मालिनी**—छंदभेद, गंगा, मालीकी स्त्री ( मालिन ) ॥ १०६ ॥ गौरी, चंपानगरी, ( स्त्री० )
**मिथुन**—मिथुन-राशि, ( पुं० ) स्त्रीपुरुषका जोड़ा, संबंध, स्त्रीसंग, (न०) ॥ १०७ ॥

"Aho Shrutgyanam"

**मुण्डनं** वपने त्राणे **मेहनं** शिश्नमूत्रयोः ।
**मैथुनं** स्यान्निधुवने **मैथुनं** सङ्गतावपि ॥ १०८ ॥
**यमनं** स्यादुपरमे बन्धने च यमे तथा ।
**यापनं** वर्त्तने कालक्षेपे निरसनेऽपि च ॥ १०९ ॥
**प्रजानो** ब्राह्मणेऽपि स्यात्**प्रजानः** सारथावपि ।
**युवा** तु तरुणे श्रेष्ठे निसर्गबलशालिनि ॥ ११० ॥
**योजनं** तु चतुःक्रोश्यां योगे च परमात्मनि ।
**रजनी** तु हरिद्रायां लाक्षायां नीलिकारसे ॥ १११ ॥
**रञ्जनो** रागजनके **रञ्जनं** रक्तचन्दने ।
**रञ्जनी** नीलिकाशुण्डामञ्जिष्ठारोचनीष्वपि ॥ ११२ ॥
जिह्वाकांचीरसज्ञेषु **रसना** रसने स्वने ।
स्वेदने मूर्छने भस्त्रावाते नासामरुत्पथे ॥ ११३ ॥

---

**मुण्डन**–संपूर्ण केशोंका क्षौर, रक्षा, ( न० )

**मेहनं**–लिंग, मूत्र, ( न० )

**मैथुन**–स्त्रीसंग, संगति, ( न० ) ॥ १०८ ॥

**यमन**–उपराम, बन्धन, यम ( अष्टांगयोगका एक अंग ), ( न० )

**यापन**–वर्तना, कालक्षेपकरना, निकासना, ( न० ) ॥ १०९ ॥

**प्रजान**–ब्राह्मण, सारथि, ( पुं० )

**युवन्**–जवान, श्रेष्ठ, स्वाभाविक बलवान्, ( पुं० ) ॥ ११० ॥

**योजन**–चारकोश, योग, परमात्मा, ( न० )

**रजनी**–हलदी, लाख, नीलिका रस, ( स्त्री० ) ॥ १११ ॥

**रंजन**–प्रसन्नकरनेवाला, ( पुं० )

**रंजन**–रक्त चंदन ( न० )

**रंजनी**–नीली, मदिरा, मँजीठ, गोरोचन, ( स्त्री० ) ॥ ११२ ॥

**रसना**–जिह्वा, करधनी, रसका जाननेवाला, खाना, शब्द, पसीनादिवाना, मूर्छा, धमनीका वायु, नासिकावायुका मार्ग (स्त्री०) ॥ ११३ ॥

"Aho Shrutgyanam"

**रागी** तु कोपने रक्ते रागयुक्तेऽपि कामिनि ।
**राजा** चन्द्रे नृपे शक्रे क्षत्रिये प्रभुयक्षयोः ॥ ११४ ॥
**राधनं** साधने प्राप्तौ तोषणेऽपि च **राधनम्** ।
**रेचनी** त्रिवृता शुण्डा **रोचनी** दन्तिकार्थिका ॥ ११५ ॥
**रोचनो** रक्तकह्लारे कूटशाल्मलिशाखिनि ।
अपि गोपित्तमङ्गलरचितस्त्रीषु **रोचना** ॥ ११६ ॥
**रोदनं** क्रन्दनेऽपि स्यादश्रुमात्रेऽपि **रोदनम्** ।
**रोही** रोहितके बोधिद्रुमे न्यग्रोधपादपे ॥ ११७ ॥
**लङ्घनं** क्रमणे पीडाकृतोपवसने प्लुतौ ।
**ललना** तु नितम्बिन्यां जिह्वायां नाडिकान्तरे ॥ ११८ ॥
**लक्ष्म** चिह्ने प्रधानेऽपि **लाञ्छनं** नामलक्ष्मणोः ।
**लेखनं** तु लिपिन्यासे छर्दे भूर्जेऽपि **लेखनम्** ॥ ११९ ॥

---

**रागिन्**—क्रोधी, अनुरक्त, राग (प्रीति) वाला, कामी, ( पुं० )

**राजन्**—चन्द्रमा, राजा, इंद्र, क्षत्रिय, प्रभु ( समर्थ ) यक्ष, ( पुं० ) ॥ ११४ ॥

**राधन**—साधन, प्राप्ति, तुष्टि, ( न० )

**रेचनी**—निसोथ, मदिरा, ( स्त्री० )

**रोचनी**—जमालगोटाकी जड़, वेश्या, ( स्त्री० ) ॥ ११५ ॥

**रोचन**—लालकमल, कालासेमर-वृक्ष, ( पुं० )

**रोचना**—गोरोचन, मंगलरचित (चौक) स्त्री, ( स्त्री० ) ॥ ११६ ॥

**रोदन**—आवाजसे रोना, आँसूडालना, ( न० )

**रोहिन्**—हरीड़ावृक्ष, पीपल-वृक्ष, बड़-वृक्ष, ( पुं० ) ॥ ११७ ॥

**लंघन**—चलना, पीडामेंकिया उपवास, कूदना, ( न० )

**ललना**—स्त्री, जिह्वा, नाडीभेद,(स्त्री०) ॥ ११८ ॥

**लक्ष्मन्**—चिह्न, प्रधान, ( न० )

**लांछन**—नाम, चिह्न, ( न० )

**लेखन**—लिपिन्यास ( लिखना ), छर्द ( कअ ), भोजपत्र,(न०)॥११९॥

"Aho Shrutgyanam"

**वचक्नु**र्वाक्पटौ विप्रे **वशी** सुगतशक्रयोः ।
**वपनं** मुण्डने वापे **वमनं** छर्दनेऽर्दने ॥ १२० ॥
आहतावप्यथ क्लीबं **वर्जनं** त्यागहिंसयोः ।
**वर्त्तनं** जीवने जीव्ये तूलनाले च **वर्त्तनम्** ॥ १२१ ॥
**वर्त्तनी** तर्कुपिण्डेऽपि मलिने पथि **वर्त्तनी** ।
**वर्णी** चित्रकरे ब्रह्मचारिलेखकयोरपि ॥ १२२ ॥
आकारे शोभने **वर्ष्म वर्ष्म** देहप्रमाणयोः ।
**वर्त्म** नेत्रच्छदे मार्गे **वाग्मी** वाचस्पतौ पटौ ॥ १२३ ॥
**वाजी** वाहे खगे बाणे स्वर्वेषु त्रिषु **वामनः** ।
**वामनो** विष्णुभेदे स्यादश्वे याम्यादिदिग्गजे ॥ १२४ ॥
**विक्लिन्न**स्तिमिते जीर्णे जराजीर्णेपि वाच्यवत् ।
**विच्छिन्न**स्तु समालब्धे विभक्ते कुटिलेऽन्यवत् ॥ १२५ ॥

---

**वचक्नु**–बहुतबोलनेवाला, (त्रि०) ब्राह्मण, (पुं०)

**वशिन्**–बुद्धदेव, इंद्र, (पुं०)

**वपन**–मुण्डन, बोना-बीजआदिका (न०)

**वमन**–छर्दन, अर्दन (पीडन) ॥१२०॥ जानसे मारना, (न०)

**वर्जन**–दान, हिंसा, (न०)

**वर्त्तन**–जीना, आजीविका, रूईकीनाली, (न०) ॥ १२१ ॥

**वर्त्तनी**–कुकडी, मलिन, मार्ग, (स्त्री०)

**वर्णिन्**–चित्रकार, ब्रह्मचारी, लेखक (पुं०) ॥ १२२ ॥

**वर्ष्म**–आकार, सुंदर, शरीर, प्रमाण, (न०)

**वर्त्मन्**–पलक, मार्ग, (न०)

**वाग्मिन्**–बृहस्पति, चतुर, (पुं०) ॥ १२३ ॥

**वाजिन्**–अश्व, पक्षी, बाण, (पुं०)

**वामन**–बौना, (त्रि०) विष्णु अवतार (वामन), अश्वभेद, दक्षिण दिशाका हस्ती, (पुं०) ॥ १२४ ॥

**विक्लिन्न**–गलाहुवा, जीर्ण, (पुं०) वृद्धअवस्थासे जीर्ण (वृद्ध) (त्रि०)

**विच्छिन्न**–अच्छेप्रकारसे लब्ध, विभागकियाहुवा, कुटिल, (त्रि०) ॥ १२५ ॥

"Aho Shrutgyanam"

**विज्ञानं** कार्म्मणे ज्ञाने **वितानं** रिक्तमन्दयोः ।
त्रिषु न स्त्री **वितानं** स्याद्विस्तारोल्लोचयोर्मखे ॥ १२६ ॥
वस्त्रवेश्मन्यवसरे वृत्ते च क्रतुकर्म्मणि ।
**विपन्नो** भुजगे पुंसि त्रिषु नष्टे विपद्गते ॥ १२७ ॥
**विमानो** व्योमयानेऽस्त्री सप्तभूमौ गृहेऽपि च ।
**विलग्न**स्त्वंगमध्ये स्यात्रिष्वेव चाङ्गलग्नयोः ॥ १२८ ॥
**विषघ्न**स्तु शिरीषे स्याद्गुडूचीत्रिवृतोः स्त्रियाम् ।
**वृजिनं** कलुषे क्लीबं केशे ना कुटिले त्रिषु ॥ १२९ ॥
**वृषा** सुरेश्वरे कर्णे **वेदना** ज्ञानपीडयोः ।
**वेष्टनं** कर्णशष्कुल्यामुष्णीषे मुकुटे वृतौ ॥ १३० ॥
**व्यञ्जनं** तेमने श्मश्रुचिह्नावयवकादिषु ।
स्वातंत्र्यकृत्ये **व्युत्थानं** विरोधाचरणेऽपि वा ॥ १३१ ॥

---

**विज्ञान**—औषधियोंके योगसे उच्चाटन आदिकर्म, ज्ञान, ( न० )
**वितान**—रीता, मंद, ( त्रि० ) विस्तार, चँदोवा, यज्ञ, ॥ १२६ ॥ तंबूडेरा, अवसर, वृत्तांत, यज्ञकर्म ( पुं० न० )
**विपन्न**—सर्प, ( पुं० ) नष्ट, विपत्को प्राप्त, ( त्रि० ) ॥ १२७ ॥
**विमान**—आकाशमें चलनेवाला रथ, सातखना घर, ( पुं०न० )
**विलग्न**—अंगका मध्यभाग ( कटि ), जन्मलग्न, लग्नमात्र ( मेषादि ) ( त्रि० ) ॥ १२८ ॥
**विषघ्न**—सिरस वृक्ष, ( पुं० ) गिलोय, निसोथ ( स्त्री० )
**वृजिन**—पाप, ( न० ) केश, (पुं०) कुटिल, ( त्री० ) ॥ १२९ ॥
**वृषन्**—इंद्र, कर्ण, ( पुं० )
**वेदना**—ज्ञान पीडा, ( स्त्री० )
**वेष्टन**—कानकी शष्कुली, पगडी, मुकुट, चारोंतरफका घेरा ( न० ) ॥ १३० ॥
**व्यंजन**—शाक व कढी आदि,मूँछडाढी' चिह्न, अवयव आदि, ( न० )
**व्युत्थान**—स्वतंत्रतासे कृत्य, विरोधका आचरण, ( न० )॥ १३१॥

"Aho Shrutgyanam"

**व्यसनं** त्वशुभे सक्तौ पानस्त्रीमृगयादिषु ।
दैवानिष्टफले पाके विपत्तौ विफलोद्यमे ॥ १३२ ॥
सक्तिमात्रे सुचरिताद्भ्रंशे कोपजदूषणे ।
**शकुनं** मङ्गलाशंसिनिमित्ते **शकुनः** खगे ॥ १३३ ॥
**शकुनिः** पुंसि विहगे सौबले करणान्तरे ।
**शङ्खिनी** शङ्खयूथे स्याद्भुजङ्गस्त्रीप्रभेदयोः ॥ १३४ ॥
**शङ्खिनी** श्वेतपुन्नागे चोरपुष्प्यां च **शङ्खिनी** ।
**शतघ्नी** शस्त्रभेदेऽपि वृश्चिकालीकरञ्जयोः ॥ १३५ ॥
**शमनस्तु** यमे शान्तिवधयोः **शमनं** मतम् ।
**शयनं** तल्पमात्रेऽपि निद्रासुरतयोरपि ॥ १३६ ॥
**शाखी** महीरुहे वेदे तुरुष्काख्यजनेऽपि च ।
शास्त्राज्ञाराजदत्तोर्वीराजलेखेषु **शासनम्** ॥ १३७ ॥

---

**व्यसन**–अशुभ, आसक्ति, पान, स्त्री, शिकार, भाग्यवशसे अनिष्टफल, कर्मफल, विपत्ति, विफलउद्यम, ॥ १३२ ॥ आसक्तिमात्र, अच्छे चरितसे गिरना, कोपसे उत्पन्नहुवा दोष, ( न० )

**शकुन**–मंगलको कहनेवाला निमित्त, ( न० ) पक्षी, (पुं०) ॥ १३३ ॥

**शकुनि**–पक्षी, कौरवोंका मामा, करणभेद, ( पुं० )

**शंखिनी**–शंखसमूह, सर्पभेद, स्त्रीभेद, ॥ १३४ ॥ सफेद-पुन्नाग वृक्ष, चोरहुली, ( स्त्री० ) ।

**शतघ्नी**–शस्त्रभेद, वृश्चिकाली, करंजुवा, ( स्त्री० ) ॥ १३५ ॥

**शमन**–धर्मराज, ( पुं० ) शांति, हिंसा, ( न० ) ।

**शयन**–शय्यामात्र, निद्रा, स्त्रीसंग, ( न० ) ॥ १३६ ॥

**शाखिन्**–वृक्ष, वेद, तुरुष्कजातिजन, ( पुं० )

**शासन**–शास्त्र, आज्ञा, राजाकी दीहुई पृथ्वी, राजाका लेख, (न०) ॥ १३७ ॥

"Aho Shrutgyanam"

**शिखी** केतुग्रहे वह्नौ मयूरे कुक्कुटे शरे ।
बलीवर्दे बके वृक्षे व्रतिभेदसचूडयोः ॥ १३८ ॥
**शिल्पी** तु वाच्यवत्कारौ नासिकायां तु **शिल्पिनी** ।
**शृङ्गी** नागेऽपि वृषभे पर्वतेऽपि महीरुहे ॥ १३९ ॥
**शोभनो** योगभेदे ना **शोभनः** सुन्दरे त्रिषु ।
**श्रीघनः** सुगते भिक्षौ **श्रीघनं** दधि न द्वयोः ॥ १४० ॥
**श्लेष्मघ्नी** मल्लिकायां स्यात्कम्पिल्लकफणिज्जयोः ।
**श्वसनः** पवने श्वासे **श्वसनो** मदनद्रुमे ॥ १४१ ॥
**सन्धानं** स्यादभिषवे क्लीबं सङ्घट्टनेऽपि च ।
**सन्धिनी** तु वृषाक्रान्ताऽकालदुग्धगवोः स्मृता ॥ १४२ ॥
**समानो** नाभिपवने सदेकसदृशे त्रिषु ।
**सम्पन्नं** त्रिषु सम्पत्तिसहिते साधितेऽपि च ॥ १४३ ॥

---

**शिखिन्**–केतु–ग्रह, अग्नि, मोर, मुर्गा, शर, बैल, बगला, वृक्ष, व्रतिभेद, ( पुं० ) चोटीवाला, (त्रि०) ॥ १३८ ॥

**शिल्पिन्**–कारीगर, (त्रि०)

**शिल्पिनी**–नासिका, अड्डसा–औषध, ( स्त्री० )

**शृंगिन्**–नाग, बैल, पर्वत, वृक्ष, ( पुं० ) ॥ १३९ ॥

**शोभन**–योगभेद, ( पुं० )

**शोभन**–सुंदर, ( त्रि० )

**श्रीघन**–बुद्ध भगवान्, भिक्षु, (पुं०) दही, ( न० ) ॥ १४० ॥

**श्लेष्मघ्नी**–मोतियाभेद कवीला, छोटेपत्तोंकी तुलसी, ( स्त्री० )

**श्वसन**–वायु, श्वास, अकोट-वृक्ष, ( पुं० ) ॥ १४१ ॥

**संधान**–जोडना, घड़ना, ( न० )

**संधिनी**–बैल ( सांड ) की दबाईहुई गौ, विनासमय दुग्धदेनेवाली गौ, ( स्त्री० ) ॥ १४२ ॥

**समान**–नाभिका वायु, श्रेष्ठ, एक, तुल्य, ( त्रि० )

**संपन्न**–संपत्तिसहित, साधित, (त्रि०) ॥ १४३ ॥

"Aho Shrutgyanam"

**संव्यान**मुत्तरासङ्गे **संव्यानं** छादने तथा ।
**सवनं** यजने स्नाने सोमनिर्दूमने मतम् ॥ १४४ ॥
**सादी** तु सारथौ वाहवाहके हस्तिवाहके ।
**साधनं** मेहने सैन्ये निवृत्तिगतिसिद्धिषु ॥ १४५ ॥
करणे चोपकरणे मृतसंस्करणे वधे ।
द्रवणे चानुव्रज्यायामुपाये दापने धने ॥ १४६ ॥
**साधनो** यज्ञकर्म्मान्ते यजमानप्रचेतसोः ।
मर्यादायां स्त्रियां **सीमा** क्षेत्रे घाटे स्थितावपि ॥ १४७ ॥
**सूचना**ऽभिनये दृष्टौ गन्धने व्यधनेऽपि च ।
**सेचनं** सेकपात्रे स्यात्सेकरक्षणयोरपि ॥ १४८ ॥
सेनापतौ तु **सेनानीः सेनानीः** शरजन्मनि ।
**सेवनं** सीवने क्लीबं सेवायामपि **सेवनम्** ॥ १४९ ॥

---

**संव्यान**–दुपट्टा, ढकना, ( न० )
**सवन**–पूजन, स्नान, सोमवल्लीका निचोडना ( न० ) ॥ १४४ ॥
**सादिन्**–रथका सारथि, अश्वका, चलानेवाला ( सवार ), फीलवान ( पु० )
**साधन**–लिंग, सेना, निवृत्ति, गति, सिद्धि, ॥ १४५ ॥ करण, उपकरण, मृतका संस्कार, वध ( मारना ), झिरना, उपासना करना, उपाय, दिवाना, धन, ( न० ) ॥ १४६ ॥
**साधन**–यज्ञकर्मका अंत, यजमान, वरुण, ( पुं० )
**सीमन्**–मर्यादा, क्षेत्र, घाट, स्थिति, ( स्त्री० ) ॥ १४७ ॥
**सूचना**–जनाना, दृष्टि, गन्धन, वीधना, ( स्त्री० )
**सेचन**–सींचनेका पात्र, सींचना, रक्षा करनी, ( न० ) ॥ १४८ ॥
**सेनानी**–सेनापति, स्वामिकार्त्तिक, ( पुं० )
**सेवन**–सीना वस्त्रआदिका, सेवा, (न०) ॥ १४९ ॥



"Aho Shrutgyanam"

**संस्थान**माकृतौ सन्निवेशे मृत्यौ चतुष्पथे ।
**स्तननं** जलदध्वाने ध्वनिमात्रेऽपि कुन्थने ॥ १५० ॥
**स्थापनं** स्यात्पुंसवने समाधावर्पणेऽपि च ।
**स्पर्शनः** पवने पुंसि **स्पर्शनं** स्पर्शदानयोः ॥ १५१ ॥
**स्यन्दनं** प्रस्रवे नीरे **स्यन्दन**स्तिनिशे रथे ।
**स्रंसनं** रेचने पाते पृथग्भावातिसारयोः ॥ १५२ ॥
**स्वामी** प्रभौ विशाखे च **हली** स्यात्कर्षके बले ।
अङ्गारधान्यां **हसनी हसनं** हसिते मतम् ॥ १५३ ॥
**हस्तिनी** नायिकाभेदे **हस्तिनी** हस्तियोषिति ।
**हायनो** वत्सरे न स्त्री व्रीहिभेदार्चिषोः पुमान् ॥ १५४ ॥
**हिण्डनं** सुरते केलौ **ह्रादिनी** वज्रविद्युतोः ।

नचतुर्थम् ।

**अथर्वा** द्विजभेदे स्याद्वेदेऽथर्व नपुंसकम् ॥ १५५ ॥

---

**संस्थान**–आकृति अच्छीतरह बनाहुवा वासस्थान, मृत्यु, चुराहा, ( न० )
**स्तनन**–मेघका शब्द, ध्वनिमात्र, सुकड़ना, ( न० ) ॥ १५० ॥
**स्थापन**–पुंसवन, समाधि, अर्पणकरना ( न० )
**स्पर्शन**–वायु, ( पुं० ) स्पर्शन, स्पर्शकरना, दानकरना, ॥ १५१ ॥
**स्यन्दन**–झिरना, जल, ( न० )
**स्यन्दन**–तिनिश वृक्ष, रथ, ( पुं० )
**स्रंसन**–जुलाब, पड़ना, पृथग्भाव, अतिसार ( बहुत दस्तलगना ) ( न० ) ॥ १५२ ॥
**स्वामिन्**–प्रभु ( स्वामी ), स्वामिकार्त्तिक, ( पुं० )
**हलिन्**–किसान, बलदेव, ( पुं० )
**हसनी**–सिगड़ी ( स्त्री० )
**हसन**–हँसना ( न० ) ॥ १५३ ॥
**हस्तिनी**–स्त्रीभेद, हथिनी, ( स्त्री० )
**हायन**–वर्ष, ( पुं०न० ) व्रीहिभेद, दीपआदिकी ज्वाला, ( पुं० ) १५४
**हिण्डन**–स्त्रीसंग, क्रीडा, ( न० )
**ह्रादिनी**–वज्र, बिजली, ( स्त्री० )

**नचतुर्थ ।**

**अथर्वन्**–द्विजभेद, ( पुं० )
**अथर्व**–वेदभेद, ( न० ) ॥ १५५ ॥

"Aho Shrutgyanam"

**अधिष्ठानं** प्रभावेऽपि पुरेऽन्यासनचक्रयोः ।
**अनूचानो** विनीतेऽपि साङ्गवेदविचक्षणे ॥ १५६ ॥
नयनाग्रेऽप्य**नूचानः** पुमानेव कचिन्मतः ।
**अन्वासनं** तु सेवायां स्नेहवस्तावुपासने ॥ १५७ ॥
**अपाचीनं** त्रिषु विपर्यस्ते दक्षिणसम्भवे ।
जन्मभूम्याम**भिजनः** कुले ख्यातौ कुलध्वजे ॥ १५८ ॥
**अभिपन्नो**ऽपराद्धेऽभिद्रुते ग्रस्ते विपद्गते ।
दक्षिणे स्वीकृतेऽपि स्याद**भिपन्नो**ऽभिधेयवत् ॥ १५९ ॥
**अभिमानः** पुमान्गर्वेऽज्ञानेऽप्रणयहिंसयोः ।
**अर्यमा** मिहिरे सूर्यमुक्तायां पितृदैवते ॥ १६० ॥
**अवदानं** मतमिति वृत्तकर्म्मणि खण्डने ।
तनुमध्येऽ**वलग्नः** स्यात्संलग्ने त्वभिधेयवत् ॥ १६१ ॥

---

**अधिष्ठान**–प्रभाव, पुर, स्थितहोना, चक्र, ( न० )
**अनूचान**–विनीत, अंगसहित वेदपढनेवाला, ( पुं० ) ॥ १५६ ॥
**अनूचान**–अच्छा नीतिजाननेवाला, ( पुं० )
**अन्वासन**–सेवा, स्नेहवस्ति ( वस्तिकर्म ), उपासना ( न० )॥१५७॥
**अपाचीन**–विपर्यस्त ( उलटा ), दक्षिणदिशामें होनेवाला, ( त्रि० )
**अभिजन**–जन्मभूमि, कुल, विख्याति, कुलध्वज, ( पुं० ) ॥ १५८ ॥
**अभिपन्न**–अपराधयुक्त, भगाहुवा, ग्रस्तहुवा, विपत्को प्राप्तहुवा, (पुं०) चतुर, अंगीकारकियाहुवा ( त्रि० ) ॥ १५९ ॥
**अभिमान**– गर्व, अज्ञान, अप्रणय ( अम्रता ), हिंसा, ( पुं० )
**अर्यमन्**–सूर्य ( पुं० ) सूर्यकी त्यागीहुई दिशा ( स्त्री० ) पितरोंका देवता, ( पुं० ) ॥ १६० ॥
**अवदान**–वदीतहुवा, कर्म, खण्डन, टुकड़ाकरना, ( न० )
**अवलग्न**–शरीरका बीच, अच्छीतरह, लगाहुवा, ( त्रि० ) ॥ १६१ ॥

"Aho Shrutgyanam"

स्यादाकलनमाकाङ्क्षापरिसङ्ख्याविबन्धने ।
**आच्छादनं** पिधाने स्याद्वसनेनापवारणे ॥ १६२ ॥
**आतञ्चनं** प्रतीवापजवनाप्यायने मतम् ।
**आत्मयोनिर्विरिञ्चे** स्यादात्मयोनिर्मनोभवे ॥ १६३
**आवेशनं** शिल्पिगृहे भूतावेशे प्रवेशने ।
**आयोधनं** भवेद्युद्धे वधेप्यायोधनं मतम् ॥ १६४ ॥
**आराधनं** तु पूजायां पाकप्रापणयोरपि ।
**आस्कन्दनं** तिरस्कारे तथा संशोषणे रणे ॥ १६५ ॥
**उत्पतनं** समुत्पत्तौ भवेदूर्द्ध्वगतावपि ।
**उत्सादनं** समुल्लेखोद्वर्त्तनोद्वासनार्थकम् ॥ १६६ ॥
भवेदुदयनो वत्सराजे कलशसम्भवे ।
**उद्वर्त्तन**मुत्पतनाऽपावर्त्तनविलेपने ॥ १६७ ॥

---

**आकलन**–आकाङ्क्षा, गिन्तीकरना, विशेष करके बंधन, ( न० )
**आच्छादन**–छिपाना, वस्त्रसे ढका, ( न० ) ॥ १६२ ॥
**आतंचन**–प्रतीवाप ( सींचना ), वेग, तृप्ति, ( न० )
**आत्मयोनि**–ब्रह्मा, कामदेव, (पुं०) ॥ १६३ ॥
**आवेशन**–शिल्पीका घर, भूतका आवेश ( प्रवेश ), प्रवेश, ( न० )
**आयोधन**–युद्ध, वध ( मारना ) ( न० ) ॥ १६४ ॥
**आराधन**–पूजा, पाक ( रसोईकरना ), प्राप्त कराना, ( न० )
**आस्कंदन**–तिरस्कार, शोषणकरना, रण, ( न० ) ॥ १६५ ॥
**उत्पतन**–उत्पत्ति, ऊर्द्ध्वगति, ( न० )
**उत्सादन**–उल्लेख ( लिखना ), उबटनलगाना, उजाडना, ( न० ) ॥ १६६ ॥
**उदयन**–वत्सराज ( चंद्रवंशका एक राजा ) अगस्त्यमुनि, ( पुं० ) ।
**उद्वर्त्तन**–ऊपरको उछलना, निकालना, विलेपन, ( न० ) ॥१६७॥

"Aho Shrutgyanam"

**उद्वाहनं** द्विसीत्ये स्यादुरज्ज्वावु**द्वाहिनी** मता ।
अंशुके **रूपधानं** स्याद्विशेषप्रणयेपि च ॥ १६८ ॥
**उपासनं** शराभ्यासे शुश्रूषाहिंसयोरपि ।
**कञ्चुकी** सौविदल्लेपि सर्पे खिङ्गेऽपि जोङ्गके ॥ १६९ ॥
शिरीषाम्रातकाश्वत्थगर्दभाण्डे **कपीतनः** ।
**कलध्वनिः** कलरवे कपीतपिकबर्हिषु ॥ १७० ॥
**कलापी** प्लक्षवृक्षे स्यान्मेघनादानुलासिनि ।
**कात्यायनो** वररुचौ गौर्यां **कात्यायनी** स्त्रियाम् ॥ १७१ ॥
काषायवस्त्रार्द्धवृद्धविधवायामपि स्मृता ।
रक्तचन्दनपत्राङ्गद्रुमभेदे **कुचन्दनम्** ॥ १७२ ॥
**कुण्डली** वरुणे केकिमृगाहिषु सकुण्डले ।
**कुम्भयोनि**रगस्त्ये स्यादर्जुनस्य गुरावपि ॥ १७३ ॥

---

**उद्वाहन**–दोबार बाहाहुवा क्षेत्र,(न०) **उद्वाहिनी**–रज्जु (रस्सी) (स्त्री०) ॥ १६८ ॥

**उपासन**–बाणछोडनेका अभ्यास, शुश्रूषा, हिंसा, ( न० )

**कंचुकिन्**–ड्योढीपर रहनेवाला, सर्प, चतुरनर, अगर-वृक्ष, ( पुं० ) ॥ १६९ ॥

**कपीतन**–सिरस, अंबाडा, पीपल. बडीहरड, ( पुं० )

**कलध्वनि**–मधुरशब्द, कबूतर, पपीहा, मोर ( पुं० ) ॥ १७० ॥

**कलापिन्**–पिलखन-वृक्ष, मोर,(पुं०)

**कात्यायन**–वररुचि, ( पुं० )

**कात्यायनी**–गौरी, ॥ १७१ ॥ गेरूके-रंगे वस्त्रधारनेवाली अधबूढी विधवा. ( स्त्री० )

**कुचंदन**–रक्तचंदन, पतंग-वृक्ष या . भोजपत्र-वृक्ष, ( न० )॥ १७२ ॥

**कुंडलिन्**–वरुण, मोर, मृग, सर्प, कुंडलवाला, ( पुं० )

**कुंभयोनि**–अगस्त्यमुनि, अर्जुनका गुरु, ( पुं० ) ॥ १७३ ॥

"Aho Shrutgyanam"

**केशरी** सिंहपुन्नागनागकेशरवाजिषु ।
**क्रौञ्चादनस्तु** पिप्पल्यां चिञ्चोटकमृणालयोः ॥ १७४ ॥
**स्वकामिनी** तु निर्दिष्टा चर्चिकाचिल्लयोषितोः ।
**खड्गधेनुः** स्त्रियां खड्गपुत्रिकागण्डकस्त्रियोः ॥ १७५ ॥
**गदयित्नुस्तु** जल्पाके कामकामुकयोरपि ।
**गवादनीन्द्रवारुण्यां** गवां घासादपाश्रये ॥ १७६ ॥
**घनाघनो** वर्षुकाब्दे शक्रे मत्तद्विपे घने ।
अन्योन्याद् घट्टके चैव घातुके तु **घनाघनः** ॥ १७७ ॥
**घोषयित्नुः** पिके विप्रे **चित्रभानुरिनेऽनले** ।
**चोलकी** नागरङ्गे स्यात्करीरे किष्कुपर्वणि ॥ १७८ ॥
वर्त्तते कङ्कक....बुधाराटेषु **जलाटनः** ।
**जनाटनं** जलभ्रान्तौ जलौकायां **जलाटनी** ॥ १७९ ॥

---

**केशरिन्**–सिंह, चंपा, नागकेसर, अश्व, ( पुं० )

**क्रौंचादन**–पिप्पली, चिंचोटक-तृण, कमल, ( पुं० ) ॥ १७४ ॥

**स्वकामिनी**–रोगभेद, चील्हपक्षीकी स्त्री ( स्त्री० )

**खड्गधेनु**–छुरी, गैंडाकी स्त्री, ( स्त्री० ) ॥ १७५ ॥

**गदयित्नु**–बहुत बोलनेवाला, कामदेव, कामी–पुरुष ( पुं० )

**गवादनी**–गडूंभा, गौवोंके घास चरनेका स्थल, ( स्त्री० ) ॥ १७६ ॥

**घनाघन**–बर्षनेवाला मेघ, इंद्र, मत्त-हस्ती, मेघमात्र, आपसमें घडनेवाला, मारनेवाला, ( पुं० )॥१७७

**घोषयित्नु**–कोयल, ब्राह्मण, ( पुं० )

**चित्रभानु**–सूर्य, अग्नि ( पुं० )

**चोलकिन्**–नारंगी, कैर, ईख या बांस, ( पुं० ) ॥ १७८ ॥

**जलाटन**–...जलमें चलना ( न० )

**जलाटनी**–जोक, ( स्त्री० ) ॥१७९॥

"Aho Shrutgyanam"

**जलमीन**श्चिलिचिमे इश्वाकशिशुमारयोः ।
**तपोधना** तु मुण्डीर्यां तपस्विनि **तपोधनः** ॥ १८० ॥
**तपस्वी** तापसे चानुकम्प्ये चाथ **तपस्विनी** ।
मांसिकाकटुरोहिण्योस्**तरस्वी** वेगिशूरयोः ॥ १८१ ॥
**दुर्नामा** पङ्कशुक्तौ **दुर्नाम** क्लीबमर्शसि ।
**देवसेना** तु गीर्वाणसेना देवेन्द्रकन्ययोः ॥ १८२ ॥
**द्विजन्मा** ब्राह्मणेऽपि स्याद् **द्विजन्मा** दशने खगे ।
करिमुद्गरिकानागयष्टचो**र्नागाङ्गना** स्त्रियाम् ॥ १८३ ॥
मतं भवे**न्निधुवनं** सुरते कम्पनेऽपि च ।
स्यान्निरासे **निरसनं** वधे निष्ठीवने तथा ॥ १८४ ॥
**निर्वासनं** तु निर्वासहिंसयोर्गतवासरे ।
**निर्भत्सनं** तु निर्द्दिष्टं खलीकारेऽप्यलक्तके ॥ १८५ ॥

---

**जलमीन**–जलका तृण (सिवाल) चरनेवाली मच्छी,... शिशुमार मच्छ (पुं० )

**तपोधना**–गोरखमुंडी, ( स्त्री० )

**तपोधन**–तपस्वी, ॥ १८० ॥

**तपस्विन्**–तपस्वी, दयाकरने योग्य, (पुं० )

**तपस्विनी**–जटामांसी,कुटकी,(स्त्री०)

**तरस्विन्**–वेगवाला, शूरवीर, (पुं०) ॥ १८१ ॥

**दुर्नामन्**–जोंकके समान कीचका जन्तु, ( स्त्री० ) **दुर्नामन्**–बवासीर ( न० )

**देवसेना**–देवताओंकी सेना, इंद्रकी कन्या, ( स्त्री० ) ॥ १८२ ॥

**द्विजन्मन्**–ब्राह्मण, दाँत, पक्षी,(पुं०)

**नागाङ्गना**–हस्तियोंका मुद्गर, नागरबेल, ( स्त्री० ) ॥ १८३ ॥

**निधुवन**–मैथुन, कंपन, ( न० )

**निरसन**–निकालना, मारना, थूकना, ( न० ) ॥ १८४ ॥

**निर्वासन**–उजाड़ना, हिंसा, गयाहुवा दिन, ( न० )

**निर्भर्त्सन**–झिडकना, जावक, (न०) ॥ १८५ ॥

"Aho Shrutgyanam"

दाने न्यासार्पणे वैरशुद्धौ **निर्यातनं** मतम् ।
श्रुतौ दृष्टौ **निशमनं** दृष्ट्यालोचे **निशामनम्** ॥ १८६ ॥
**तपस्विनी** पुनर्मांसी कटुरोहिणिकाऽपि च ।
**परिज्वा** तु पुमानिंदौ याज्ञिके परिचारके ॥ १८७ ॥
**पलाशी** राक्षसे वृक्षेऽप्यथ **पुण्यजनः** पुमान् ।
रक्षःसज्जनयज्ञेषु मूर्खे नीचे **पृथग्जनः** ॥ १८८ ॥
भवेत्**प्रजननं** योनौ जन्मप्रजनयोरपि ।
**प्रणिधानं** प्रयत्ने स्यात्समाधौ च प्रवेशने ॥ १८९ ॥
**प्रतिमानं** प्रतिकृतौ गजदन्तान्तरालके ।
**प्रतिपन्नः** प्रतिज्ञाते विज्ञातेऽप्यभिधेयवत् ॥ १९० ॥
**प्रतिपन्न**स्तु संस्कारे लिप्सायामप्युपग्रहे ।
**प्रत्यर्थी** वाच्यलिङ्गः स्याद्विद्वेषिप्रतिवादिनोः ॥ १९१ ॥

---

**निर्यातनं**–दान, धरोहड रखना, वैरका त्यागना, ( न० )
**निशमन**–सुनना, देखना, ( न० )
**निशामन**–दृष्टिसे देखना, ( न० ) ॥ १८६ ॥
**तपस्विनी**–जटामांसी, कुटकी, ( त्रि० )
**परिज्वान्**–चंद्रमा, यज्ञकरानेवाला, शुश्रूषा करनेवाला, (पुं०) ॥१८७॥
**पलाशिन्**–राक्षस, वृक्ष, ( पुं० )
**पुण्यजन**–राक्षस, सज्जन, यज्ञ, (पुं०)
**पृथग्जन**–मूर्ख, नीच, (पुं०)॥१८८॥
**प्रजनन**–योनि, जन्म, गर्भग्रहण करना, ( न० )
**प्रणिधान**–प्रयत्न, समाधि, प्रवेशन, ( न० ) ॥ १८९ ॥
**प्रतिमान**–मूर्त्ति, हस्तिदंत, बीच, ( न० )
**प्रतिपन्न**–प्रतिज्ञाकिया हुवा, जाना-हुवा, ( त्रि० ) ॥ १९० ॥
**प्रतिपन्न**–संस्कार, लाभ करनेकी इच्छा, उपग्रह, ( पुं० )
**प्रत्यर्थिन्**–विद्वेषी, प्रतिवादी, (त्रि०) ॥ १९१ ॥

"Aho Shrutgyanam"

**प्रयोजनं** मतं कार्ये हेतौ च स्यात्**प्रयोजनम्** ।
भवेत्**प्रवचनं** वेदे प्रकृष्टवचनेऽपि च ॥ १९२ ॥
**प्रस्फोटनं** तु सूर्पे स्यात्ताडनेऽपि प्रकाशने ।
**प्रसाधनी** कंकतिकासिद्ध्योर्वेशे **प्रसाधनम्** ॥ १९३ ॥
क्लीबं **प्रहसनं** भङ्गे प्रहासाक्षेपयोरपि ।
**फलकी** राजसफरे तथा फलकपाणिके ॥ १९४ ॥
**वर्द्धमानः** शरावैरण्डयोः प्रश्नान्तरेऽच्युते ।
दृश्यते **वर्द्धमानस्तु** वृद्धिमत्यपि वाच्यवत् ॥ १९५ ॥
**वारकी** द्विषि पाथोधौ पर्णजीवे हयान्तरे ।
**वारासनं** वाःसदने शूलापद्वारपालयोः ॥ १९६ ॥
परमेष्ठिनि **भूतात्मा** **भूतात्मा** पिङ्गलेऽपि च ।
**मदयित्नुर्**मतो मेघे **मदयित्नुस्तु** शीधुनि ॥ १९७ ॥

---

**प्रयोजन**–कार्य, कारण, ( न० )
**प्रवचन**–वेद, श्रेष्ठ वचन, ( न० ) ॥ १९२ ॥
**प्रस्फोटन**–सूर्प, ( छाज ), ताडना, प्रकाशन, ( न० )
**प्रसाधनी**–कंघी, सिद्धि, ( स्त्री० )
**प्रसाधन**–वेश ( शृंगार ) ( न० ) ॥ १९३ ॥
**प्रहसन**–एकप्रकारका काव्य, हँसना, आक्षेप, ( न० )
**फलकिन्**–मच्छी–भेद, ढालधारी, ( पुं० ) ॥ १९४ ॥
**वर्द्धमान**–मिट्टीका शराव, अरंड, प्रश्नभेद, विष्णु ( पुं० ) वृद्धिवाला, ( त्रि० ) ॥ १९५ ॥
**वारकिन्**–शत्रु, समुद्र, पत्तोंसे आजीविका करनेवाला, अश्वभेद, ( पुं० )
**वारासन**–जलस्थान ( न० ) त्रिशूल, अपद्वारपाल ( मकानकी पिछाडीकी रक्षावाला ) ( पुं० ) ॥ १९६ ॥
**भूतात्मन्**–ब्रह्मा, पिंगलवर्ण, ( पुं० )
**मदयित्नु**–मेघ, मदिरा ( पुं० ) ॥ १९७ ॥

"Aho Shrutgyanam"

**महाधनं** महामूल्ये चारुवस्त्रेऽपि सिह्लके ।
**महामुनि**रगस्त्ये स्याद्धान्याकागस्त्ययोरपि ॥ १९८ ॥
**महासेनो** विशाखेऽपि महासेनापतावपि ।
**मातुलानी** तु भङ्गायां कलाये मातुलस्त्रियाम् ॥ १९९ ॥
**मालुधान**श्चित्रसर्पे महापद्मे लतान्तरे ।
**मालुधान्यथ मेधावी** वाच्यवन्मेधयान्विते ॥ २०० ॥
ब्राह्म्यां **मेधाविनी** ख्याता गरुडेपि **रसायनः** ।
**रसायनं** जराव्याधिहरे विषविडङ्गयोः ॥ २०१ ॥
**राजादनं** प्रियालद्रौ क्षीरिकायां च किंशुके ।
**ललामवल्ललामं** च चिह्ने रम्ये विभूषणे ॥ २०२ ॥
शृङ्गे प्रधाने लाङ्गूले प्रभावध्वजवाजिषु ।
पुण्ड्रेऽपि **लाङ्गली** तु स्यान्नालिकेरे हलायुधे ॥ २०३ ॥

---

**महाधन**—बडामूल्यवाला, सुंदरवस्त्र, हींग, ( न० )
**महामुनि**—अगस्त्य–मुनि, धनियों, हथिया–वृक्ष, ( पुं० ) ॥ १९८ ॥
**महासेन**—स्वामिकार्त्तिक, महासेनाका पति, ( पुं० )
**मातुलानी**—भंग, मटरअन्न, मामाकी स्त्री ( मामी ) ( स्त्री० ) ॥१९९॥
**मालुधान**—चित्रसर्प,बडाकमल (पुं०)
**मालुधानी**—लताभेद, ( स्त्री० )
**मेधाविन्**—अच्छी बुद्धिवाला, (त्रि०) ॥ २०० ॥
**मेधाविनी**—ब्राह्मी, ( स्त्री० )
**रसायन**—गरुड, (पुं० ) वृद्धता और रोगको हरनेवाला औषध, बच्छ॰ नाग, वायविडंग, (न०) ॥२०१॥
**राजादन**—चिरोंजी–वृक्ष, खिरनी, केसू ( न० )
**ललामन्–ललाम**—चिह्न, सुंदर, विभूषण, ॥ २०२ ॥ सींग, प्रधान, पूँछ, प्रभाव, ध्वजा, अश्व, पौंडा, ( न० )
**लांगलिन्**—नारियल, बलदेव, (पुं०) ॥ २०३ ॥

"Aho Shrutgyanam"

**वनश्वा** जम्बुके व्याघ्रे गन्धमार्जारकेऽपि च ।
**विरोचनो**ऽर्के दहने चन्द्रे प्रह्लादनन्दने ॥ २०४ ॥
तरलायां लसद्वेश्याङ्गनायां च **विलेपनी** ।
**विलासी** भोगिनि व्याले **विश्वप्सा** वह्निचन्द्रयोः ॥ २०५ ॥
**विषयि** त्विन्द्रिये क्लीबं वाच्यवद्विषयान्विते ।
**विषयी** स्यान्मनसिजे लब्धे वैषयिके नृपे ॥ २०६ ॥
अनधीते भुजिष्ये च **विषाणी** शृङ्गिनागयोः ।
**विष्वक्सेनो**ऽच्युते **विष्वक्सेना** तु फलिनीद्रुमे ॥ २०७ ॥
**विसर्जनं** परित्यागे दाने सम्प्रेषणे वधे ।
**विस्मापनो** हरिश्चन्द्रपुरे ना कुहके स्मरे ॥ २०८ ॥
मतं **विहननं** घाते पिञ्जने तूलधूनने ।
नानाविडम्बे हिंसायां मर्दनेऽपि **विहेठनम्** ॥ २०९ ॥

---

**वनश्वन्**–गीदड़, बघेरा, गंधबिलाव, ( पुं० )
**विरोचन**–सूर्य, अग्नि, चंद्रमा, प्रह्लादका पुत्र, ( पुं० ) ॥ २०४ ॥
**विलेपनी**–यवागू, सुंदरवेश्या, (स्त्री०)
**विलासिन्**–भोगी–पुरुष, सर्प, (पुं०)
**विश्वप्सन्**–अग्नि, चंद्रमा, (पुं०) ॥ २०५ ॥
**विषयि**–इंद्रिय, ( न० ) विषययुक्त, ( त्रि० ) कामदेव, लब्धहुवा, विषयमें होनेवाला, राजा ॥२०६॥ विनापढा, नौकर, ( पुं० )
**विषाणिन्**–सींगवाला, नाग, (पुं०)
**विष्वक्सेन**–विष्णु, ( पुं० )
**विष्वक्सेना**–कलिहारी-वृक्ष, (स्त्री०) ॥ २०७ ॥
**विसर्जन**–परित्याग, दान, संप्रेषण ( प्रेरण ), वध, ( न० )
**विस्मापन**–हरिश्चन्द्रराजाका पुर, कपटी, कामदेव, ( पुं० ) ॥२०८॥
**विहनन**–घात ( मारना ), पीनना, रूईका धुनना, ( न० )
**विहेठन**–अनेक प्रकारका विडंबन ( नकल ), हिंसा, मलना, (न०) ॥ २०९ ॥

"Aho Shrutgyanam"

**वृक्षादनी** वृक्षरुहाविदारीकन्दयोर्मता ।
**वृक्षादनं** मधुच्छत्रे कुठाराश्वत्थयोः पुमान् ॥ २१० ॥
**वैरोचन**स्तु बल्यर्कपुत्रयोः सुगतान्तरे ।
**व्यवायी** द्रव्यभेदे स्यात्कामुकेऽप्यभिधेयवत् ॥ २११ ॥
**शिखरी** स्यादपामार्गे गिरौ कोट्टेऽपि शाखिनि ।
**शिखण्डी** शरभिद्भीष्मद्विषोः केकिकलापयोः ॥ २१२ ॥
**शिखण्डिनी** तु गुञ्जायां यूथिकायां **शिखण्डिनी** ।
**शृङ्गारी** चारुवेशेऽपि कामुके क्रमुके गजे ॥ २१३ ॥
मता **श्लेष्मघना** मल्ल्यां केतकीभक्तसज्जयोः ।
**सदादानो**ऽभ्रमातङ्गे हेरम्बे गन्धहस्तिनि ॥ २१४ ॥
**सनातनो** हरे विष्णौ पितृणामतिथौ स्थिरे ।
नित्येऽप्यथ **समापन्नं** प्राप्ते क्लिष्टसमाप्तयोः ॥ २१५ ॥

---

**वृक्षादनी**—अमरबेल, विदारीकंद, ( स्त्री० )
**वृक्षादन**—मधुच्छत्र ( न० ) कुहाड़ा, पीपल—वृक्ष, ( पुं० ) ॥ २१० ॥
**वैरोचन**—बलिका पुत्र, सूर्यका पुत्र, बुद्ध—भगवान्, ( पुं० )
**व्यवायिन्**—द्रव्यभेद, कामी पुरुष आदि ( त्रि० ) ॥ २११ ॥
**शिखरिन्**—चिरचिटा, पर्वत, कोट, वृक्ष, ( पुं० )
**शिखंडिन्**—शरभेद, भीष्मका शत्रु, मोर, मोरपंख, ( पुं० ) ॥२१२॥
**शिखंडिनी**—चोंटली ( चिरमठी ), जूही-पुष्पपेड, ( स्त्री० )
**शृंगारिन्**—सुंदरवेशवाला, कामीपुरुष, सुपारी-वृक्ष, हस्ती, ( पुं० ) ॥ २१३ ॥
**श्लेष्मघना**—मालती या मोतिया, केतकी ( स्त्री० ) भात, कवच ( न० )
**सदादान**—इंद्रहस्ती, गणेश, गंधहस्ती, ( पुं० ) ॥ २१४ ॥
**सनातन**—महादेव, विष्णु, पितरोका अतिथि, स्थिर, नित्य होनेवाला, ( पुं० )
**समापन्न**—प्राप्तहुवा, क्लिष्ट(क्लेशयुक्त), समाप्त, ॥ २१५ ॥ ( त्रि० ) वध, ( न० )

"Aho Shrutgyanam"

**समापन्नं** वधे क्लीबं समाप्तौ तु **समापनम्** ।
**समापनं** परिच्छेदे समाधाने च मारणे ॥ २१६ ॥
**समादानं** समीचीनग्रहणे नित्यकर्म्मणि ।
**समुत्थानं** मतं रोगनिर्णयेऽपि समुद्यमे ॥ २१७ ॥
**संमूर्छन**मभिव्याप्तौ संमूर्छायां च मोहने ।
**संवाहनं** तु भारादेर्वाहनेऽप्यङ्गमर्दने ॥ २१८ ॥
स्यात्**संवदन**मालोचे संवादे च वशीकृतौ ।
**सरोजिनी** तु पद्मिन्यां सरोजे च सरोवरे ॥ २१९ ॥
**सामयोनि**स्तु सामोत्थे मातङ्गे परमेष्ठिनि ।
**सामिधेनी** ऋचि प्रोक्ता **सामिधेनी** समिध्यपि ॥ २२० ॥
मतं **सारसनं** काञ्च्यामुरस्त्रे च तनुत्रिणाम् ।
**सुकर्म्मा** योगभेदेऽपि **सुकर्मा** देवशिल्पिनि ॥ २२१ ॥

---

**समापन**–समाप्ति, परिच्छेद ( ग्रंथविभाग ), समाधान, मारना, ( न० ) ॥ २१६ ॥

**समादान**–अच्छीतरह ग्रहणकरना, नित्यकर्म ( न० )

**समुत्थान**–रोगका निर्णय, अच्छेप्रकारसे उद्यम, ( न० ) ॥ २१७ ॥

**संमूर्छन**–अभिव्याप्ति, संमूर्छा, मोहन, ( न० )

**संवाहन**–भारआदिका वहना, अंगका मर्दन करना, ( न० )॥२१८॥

**संवदन**–देखना, संवादकरना, वशमें करना, ( न० )

**सरोजिनी**–कमलिनी, कमल, सरोवर, ( स्त्री० ) ॥ २१९ ॥

**सामयोनि**–सामसे उत्पन्नहुवा, हस्ती, ब्रह्मा, ( पुं० )

**सामिधेनी**–वेदऋचा, समिधू ( पलाशी ) ( स्त्री० ) ॥ २२० ॥

**सारसन**–तगड़ी, शरीरकी रक्षाकरनेवालोंका उरस्त्र, ( न० )

**सुकर्मन्**–एकयोग, देवताओंका शिल्पी ( कारीगर ) ( पुं० )॥२२१॥

"Aho Shrutgyanam"

**सुदर्शनं** सुरपुरे हरेश्चक्रे **सुदर्शनः** ।
**सुदर्शना** मेरुजम्ब्वामाज्ञायामोषधीभिदि ॥ २२२ ॥
त्रिषु नेत्रानन्दकरे **सुदामा** त्वम्बुदे गिरौ ।
**सुधन्वा** धीरधानुष्के **सुधन्वा** विश्वकर्मणि ॥ २२३ ॥
**सुपर्वा** त्रिदशे वंशे शरे धूमे प्रपर्वणि ।
**सुयामुनो** वत्सराजे सौधेऽप्यभ्रान्तरे हरौ ॥ २२४ ॥
**सौदामिनी** तडिद्भेदविद्युतोरप्सरोन्तरे ।
यमपुर्यां **संयमनी** व्रते **संयमनं** मतम् ॥ २२५ ॥
**स्तनयित्नु**र्घने मेघस्तने मृत्यौ गदेऽपि च ।
**हर्षयित्नुः** सुते पुंसि कनके तु नपुंसकम् ॥ २२६ ॥

नपञ्चमम् ।

**अग्रजन्मा** विधौ विप्रे ज्येष्ठभ्रातरि च स्मृतः ।
**अतिसर्जन**मिच्छन्ति वधे दानेऽपि न द्वयोः ॥ २२७ ॥

---

**सुदर्शन**—स्वर्ग, ( न० ) विष्णुका चक्र, ( पुं० )

**सुदर्शना**—सुमेरुके जामनका वृक्ष, आज्ञा, औषधिभेद, ( स्त्री० ) ॥ २२२ ॥ नेत्रोंको आनंदकरनेवाला, ( त्रि० )

**सुदामन्**—मेघ, पर्वत, ( पुं० )

**सुधन्वन्**—धीरवान, धनुषधारी, विश्वकर्मा ( देवशिल्पी ( पुं० )॥२२३॥

**सुपर्वन्**—देवता, वंश, शर, धूवाँ, श्रेष्ठपर्व, ( पुं० )

**सुयामुन**—चंद्रवंशका एक राजा, महल, मेघभेद, विष्णु, ( पुं० ) ॥ २२४ ॥

**सौदामिनी**—बिजली-भेद, बिजली, अप्सरा-भेद, ( स्त्री० )

**संयमनी**—धर्मराजकी पुरी, ( स्त्री० )

**संयमन**—व्रत ( न० ) ॥ २२५ ॥

**स्तनयित्नु**—मेघ, मेघशब्द, मृत्यु, रोग, ( पुं० )

**हर्षयित्नु**—पुत्र, (पुं०) सुवर्ण, (न०) ॥ २२६ ॥

**नपंचम ।**

**अग्रजन्मन्**—चंद्रमा, ब्राह्मण, बडा-भ्राता, ( पुं० )

**अतिसर्जन**—मारना, दान, ( न० ) ॥ २२७ ॥

"Aho Shrutgyanam"

**अनुवासन**माख्यातं स्नेहकर्मणि धूपने ।
**अन्तेवासी** तु चण्डाले शिष्यप्रान्तगयोरपि ॥ २२८ ॥
**अपवर्जन**मित्येतद् दानेऽपि **परिवर्जनम्** ।
अथ स्याद**भिनिष्ठानः** पुंसि चन्द्रविसर्गयोः ॥ २२९ ॥
स्या**दुपस्पर्शनं** स्पर्शे स्नाने चाचमनेऽपि च ।
त्रिलिंग्या**मुपसंपन्नं** निहितेऽपि सुसंस्कृते ॥ २३० ॥
**कपिशायन**मित्येतन्मद्ये देशान्तरे पुमान् ।
**कामचारी** तु चटके कामिस्वच्छन्दयोस्त्रिषु ॥ २३१ ॥
धातुवादरते कांस्यकारे **कारन्धमी** मतः ।
**किष्कुपर्वा** तु वंशे स्यात्कोषकारे नडे(ले)ऽपि च ॥ २३२ ॥
**कृष्णवर्त्मा** हुतवहे दुराचारे विधुन्तुदे ।
कोपने खरसोल्ले च वर्त्तते **खरभाञ्जनम्** ॥ २३३ ॥

---

**अनुवासन**–स्नेहकर्म (स्नेहबस्ति आदि), धूपन(धूपसे सुगंधि करना) (न०)

**अन्तेवासिन्**–चण्डाल, शिष्य, पासमें रहनेवाला, (पुं०) ॥ २२८ ॥

**अपवर्जन**–दान, परित्याग, (न०)

**अभिनिष्ठान**–चंद्रमा, विसर्ग, (पुं०) ॥ २२९ ॥

**उपस्पर्शन**–स्पर्श, स्नान, आचमन, (न०)

**उपसंपन्न**–स्थापित कियाहुवा, अच्छी तरह संस्कार कियाहुवा (त्रि०) ॥ २३० ॥

**कपिशायन**–मद्य, देशान्तर (पुं०)

**कामचारिन्**–चिड़ा–पक्षी, कामी, स्वच्छंद, (त्रि०) ॥ २३१ ॥

**कारंधमिन्**–धातुवादमें, (धातुके कहनेमें) तत्पर, कांसीका घड़नेवाला, (पुं०)

**किष्कुपर्वन्**–बाँस, कोषकार (इक्षु-भेद या कांस (पुं०) ॥ २३२ ॥

**कृष्णवर्त्मन्**–अग्नि, दुराचारी, राहु–ग्रह, (पुं०)

**खरभाजन**–क्रोधी, लोहपात्र,(न०) ॥ २३३ ॥

"Aho Shrutgyanam"

स्याद्गन्धमादनः शैलभेदे भृङ्गेऽपि गन्धके ।
लतामृगप्रभेदे च सुरायां **गन्धमादनी** ॥ २३४ ॥
**चक्रचारी** मतः पोताधानके ग्रामजालिनि ।
**चिरजीवी** चिरायुष्के स्यादजेऽपि सकृत्प्रजे ॥ २३५ ॥
**तिक्तपर्वा** हिलमोचीगुडूचीमधुयष्टिषु ।
**धूमकेतन**शब्दोयं ग्रहभेदे हुताशने ॥ २३६ ॥
लोकेश्वरे विधौ सूर्ये धनदे **पद्मलाञ्छनः** ।
तारायां च सरस्वत्यां पद्मायां **पद्मलाञ्छना** ॥ २३७ ॥
**पीतचन्दन**मित्येतत्कालीयकहरिद्रयोः ।
**पृष्ठशृङ्गी** तु षण्ढे स्याद्दंशभीरौ वृकोदरे ॥ २३८ ॥
**प्रबलाकी** भुजङ्गेऽपि मेघनादानुलासिनि ।
बोधने प्रतिपत्तौ च दानेऽपि **प्रतिपादनम्** ॥ २३९ ॥

---

**गन्धमादन**–पर्वतभेद, भौंरा, गन्धक, लताभेद, मृगभेद, ( पुं० )
**गन्धमादनी**–मदिरा (स्त्री०) ॥२३४
**चक्रकारिन्**–छोटी २ मछली, ग्राम, जाली ( पुं० )
**चिरजीविन्**–दीर्घ आयुवाला, ब्रह्मा, काग, ( पुं० ) ॥ २३५ ॥
**तिक्तपर्वन्**–हुलहुल-शाक, गिलोय, मुलहटी, ( स्त्री० )
**धूमकेतन**–ग्रहभेद (केतुतारा), अग्नि, ( पुं० ) ॥ २३६ ॥
**पद्मलांछन**–लोकोंका ईश्वर (स्वामी), ब्रह्मा, सूर्य, कुबेर, ( पुं० )
**पद्मलांछना**–तारा-देवी, सरस्वती, लक्ष्मी, ( स्त्री० ) ॥ २३७ ॥
**पीतचंदन**–दारुहलदी, हलदी (स्त्री०)
**पृष्ठशृंगिन्**–नपुंसक, मच्छरोंसे डरनेवाला, भीमसेन, ( पुं० ) ॥ २३८ ॥
**प्रबलाकिन्**–सर्प मोर, ( पुं० )
**प्रतिपादन**–बोधन ( जनाना ), प्रसिद्धि, दान, ( न० ) ॥ २३९ ॥

"Aho Shrutgyanam"

**वनमाली** हृषीकेशे वाराह्यां वनमालिनि।
क्षीरले च फलिन्यां च लाक्षायां **वरवर्णिनी** ॥ २४० ॥
रोचनायां हरिद्रायामपि स्याद्वरवर्णिनी।
देवदारुणि कालीये दृश्यते **वरचन्दनम्** ॥ २४१ ॥
**व्योमचारी** विहङ्गेऽपि सुरे विद्याधरेऽपि च।
वनमालिनि रोलम्बे विज्ञेयो **मधुसूदनः** ॥ २४२ ॥
शातकुम्भे कुसुम्भेऽपि **महारजन**मद्वयोः।
कृत्तिवाससि काकोले श्रीफले **मृत्युवञ्चनः** ॥ २४३ ॥
**विघ्नकारी** मतो भीमदर्शनेऽपि विघातिनि।
**विश्वकर्मा** तु मार्तण्डे मुनिभिद्देवशिल्पिनोः ॥ २४४ ॥
**वृषपर्वा** हरे दैत्ये शृङ्गारिणि कसेरुणि।
मांसिकाजलपिप्पल्योर्दृश्यते **शकुलादनी** ॥ २४५ ॥

---

**वनमालिन्**–गोविंद-भगवान्, वाराहीकंद, वनमाली (वनमाला धारणकरनेवाला,) (पुं०)

**वरवर्णिनी**–रत्नरूप स्त्री, फूलप्रियंगू, लाख, ॥ २४० ॥ गोरोचन, हलदी, (स्त्री०)

**वरचंदन**–देवदार, कालाचंदन (न०) ॥ २४१ ॥

**व्योमचारिन्**–पक्षी, देवता, विद्याधर, (पुं०)

**मधुसूदन**–विष्णु-भगवान्, भौंरा, (पुं०) ॥ २४२ ॥

**महारजन**–सुवर्ण, कसूँभा (न०)

**मृत्युवंचन**–महादेव, कागभेद, बेलका पेड या खिरनीका पेड (पुं०) ॥ २४३ ॥

**विघ्नकारिन्**–भयंकरदर्शनवाला, मारनेवाला, (पुं०)

**विश्वकर्मन्**–सूर्य, मुनिभेद, देवताओंका शिल्पी, (पुं०) ॥ २४४ ॥

**वृषपर्वन्**–महादेव, एक दैत्य, सुपारीवृक्ष, कसेरूकंद, (पुं०)

**शकुलादनी**–जटामांसी, जलपीपली, ॥ २४५ ॥ रूई पीननेकी ताँत, कुटकी (स्त्री०)



"Aho Shrutgyanam"

पिङ्गन्यां कटुकायां च सम्मता **शकुलादनी** ।
**शालङ्कायन**शब्दः स्यादृषिभेदेऽपि नन्दिनि ॥ २४६ ॥
**शिवकीर्त्तन**शब्दोऽयं भृङ्गरीटेऽपि माधवे ।
स्यादर्जुनेऽपि पीयूषधामनि **श्वेतवाहनः** ॥ २४७ ॥
**श्वेतधामा** सुधाधाम्नि घनसाराब्धिफेनयोः ।
सिन्धुरे धान्यभेदे च वर्त्तते **षष्टिहायनः** ॥ २४८ ॥
**संप्रयोगी** कलाकेलौ कामुके **सुप्रयोगिनि** ।
गोशीर्षे दैवततरौ **हरिचन्दन**मस्त्रियाम् ॥ २४९ ॥
ज्योत्स्नायां कुङ्कुमे पद्मपारगे **हरिचन्दनम्** ।
पुमानहस्करे मेघवाहने **करिवाहनः** ॥ २५० ॥

नषष्ठम् ।

**अन्तावसायी** श्वपचे नापिते च मुनेर्भिदि ।
**कलानुनादी** रोलम्बे कलविङ्के कपिञ्जले ॥ २५१ ॥

---

**शालंकायन**–ऋषिभेद, नन्दी-गण, ( पुं० ) ॥ २४६ ॥

**शिवकीर्तन**–शिवका एक गण, विष्णुभगवान्, ( पुं० )

**श्वेतवाहन**–अर्जुन, चंद्रमा, ( पुं० ) ॥ २४७ ॥

**श्वेतधामन्**–चंद्रमा, कपूर, समुद्रझाग, ( पुं० )

**षष्टिहायन**–हस्ती, धान्यभेद, ( सांठीचावल ) ( पुं० ) ॥ २४८ ॥

**संप्रयोगिन्**–कलाकेली (कलाक्रीडा), कामी, अच्छाप्रयोगकरनेवाला, ( पुं० )

**हरिचंदन**–गोरोचन, देववृक्ष, ( पुं० न० ) ॥ २४९ ॥ चाँदकी किरण, केसर, कमलकेसर, ( न० )

**करिवाहन**–सूर्य, इंद्र, ( पुं० ) ॥ २५० ॥

**नषष्ठ ।**

**अन्तावसायिन्**–चंडाल, नाई, मुनिभेद, ( पुं० )

**कलानुनादिन्**–भौंरा, चिड़ा, कपिंजल-पक्षी, ( पुं० ) ॥ २५१ ॥

"Aho Shrutgyanam"

**जायानुजीवी** भरते दुर्गताखिलयोर्बके ।
मतः **सहस्रवेधी** तु रामठे चाम्लवेतसे ॥ २५२ ॥

इति विश्वलोचने नान्तवर्गः ॥

---

## अथ पान्तवर्गः ।

पैकम् ।

**पो** वाते **पा** तु पाने स्यात्पास्तु पातरि वाच्यवत् ॥ १ ॥

पद्वितीयम् ।

**कल्पो** ब्राह्मदिने न्याये प्रलये विधिशान्तयोः ।
**कूपो**ऽन्धुगर्त्तमृन्मानकूपके गुणवृक्षके ॥ २ ॥
**कृपा** दयायां व्यासे तु **कृपो** भारतपूरुषे ।
**खष्पः** क्रोधे बलात्कारे **गोपो** गोपालभूपयोः ॥ ३ ॥

---

**जायानुर्जीविन्**—नट, दुर्गत (दरिद्र), बगला-पक्षी, ( पुं० )
**सहस्रवेधिन्**—हींग, अम्लवेत,(पुं०) ॥ २५२ ॥

इस प्रकार विश्वलोचनकी भाषाटीकामें नांतवर्ग समाप्त हुवा ॥

---

### अथ पान्तवर्ग ।

पैक ।

**प**—वायु ( पुं० )
**पा**—पीना ( स्त्री० )
**पा**—रक्षाकरनेवाला ( त्रि० ) ॥ १ ॥

### पद्वितीय ।

**कल्प**—ब्रह्माका दिन, न्याय, प्रलय, विधि, शान्त, ( पुं० )
**कूप**—कूवाँ, खड्डा, मिट्टीका प्रमाण, नितंबोंका खड्डा, नौकाका स्तंभ, (पुं०) ॥ २ ॥
**कृपा**—दया, ( स्त्री० )
**कृप**—व्यास, कृपाचार्य, ( पुं० )
**खष्प**—क्रोध, बलात्कार, ( पुं० )
**गोप**—गोपाल, राजा, ॥ ३ ॥ ग्रामोंके समूहका अधिकारी, गोष्ठ (गोस्थान )का अधिकारी, कुछकरनेवाला, ( पुं० )

"Aho Shrutgyanam"

**गोपो** ग्रामौघगोष्ठाधिकारिणोश्च क्वचित्करौ ।
**क्षुपः** क्षुपे स्पर्शनेऽपि सन्ताने मारुते **जुपः** ॥ ४ ॥
**तल्पं** कलत्रे शय्यायां **तल्पमट्टे**ऽपि न द्वयोः
सन्तापे दवथौ **तापस्तापी** तु सरिदन्तरे ॥ ५ ॥
**त्रपा** लज्जाकुलटयोस्त्र**पु** सीसकरङ्गयोः ।
**दर्पो** भवेदहङ्कारे **दर्पो** मृगमदेऽपि च ॥ ६ ॥
**नीपो** वलिकदंबे स्यान्नीलवञ्जुलबन्धने ।
**पुष्पं** रजसि नारीणां विकासे कुसुमेऽपि च ॥ ७ ॥
**रूप**माकारसौन्दर्यस्वभावश्लोकनाणके ।
नाटकादौ मृगे ग्रन्थावृत्तौ च पशुशब्दयोः ॥ ८ ॥
**रेपः** स्यान्निन्दिते क्रूरे **रोपो** बाणेऽपि रोपणे ।
**लेपस्तु** लेपने ख्यातः सुधाजेमनयोरपि ॥ ९ ॥

---

**क्षुप**—पौधा, स्पर्शकरना, ( पुं० )
**जुप**—कल्पवृक्ष, वायु, ( पुं० ) ॥ ४ ॥
**तल्प**—स्त्री, शय्या, अटारी, ( न० )
**ताप**—संताप, कष्ट, ( पुं० )
**तापी**—नदी, ( स्त्री० ) ॥ ५ ॥
**त्रपा**—लज्जा, कुलटा स्त्री, ( स्त्री० )
**त्रपु**—शीशा, राँग, ( न० )
**दर्प**—अहंकार, कस्तूरी, ( पुं० ) ॥ ६ ॥
**नीप**—कुंद-वृक्ष, कदंब-वृक्ष, नीला अशोक-वृक्षका नाकू, ( पुं० )
**पुष्प**—स्त्रियोंका रज, खिलना, पुष्प ( फूल ) ( न० ) ॥ ७ ॥
**रूप**—आकार, सुंदरता, स्वभाव, श्लोक, पैसा रुपया आदि, नाटक आदि, मृग, ग्रंथकी आवृत्ति, पशु, शब्द, ( न० ) ॥ ८ ॥
**रेप**—निंदित, क्रूर, ( पुं० )
**रोप**—बाण, रोपणकरना, ( पुं० )
**लेप**—लेपनकरना, सुधा (कली आदि), भोजनकरना ( पुं० ) ॥ ९ ॥

"Aho Shrutgyanam"

**वपा** तु विवरे भेदे **बाष्पो** नेत्रजलोष्मणोः ।
**शष्पं** बालतृणं क्लीबं **शष्पस्तु** प्रतिभाक्षये ॥ १० ॥
शपथाक्रोशयोः **शापः** **शिष्पं** कृत्योचिते ध्रुवे ।
**सूपो** व्यञ्जनभेदेऽपि सूपकारेऽपि च स्मृतः ॥ ११ ॥
**स्वापस्तु** शयनाऽज्ञाननिद्रास्पर्शाज्ञतार्थकः ।
**क्षेपो** विलम्बे हेलायां गर्हाप्रेरणलेपने ॥ १२ ॥

पतृतीयम् ।

**पुंस्यनूपस्तु** महिषे वाच्यवज्जलसङ्कुले ।
**आकल्पो** वेशमात्रे स्यादा**कल्पः** कल्पनेऽपि च ॥ १३ ॥
**आवापो** भाण्डे वपने परिक्षेपालवालयोः ।
**आक्षेपो** भर्त्सनत्यागाकर्षणे काव्यभूषणे ॥ १४ ॥
**उडुपः** पुंसि चन्द्रे स्यादुडुपे भेलकेऽस्त्रियाम् ।
**उलपस्तृणभेदे** स्याद्गुल्मिन्यामुलपं मतम् ॥ १५ ॥

---

**वपा**–छिद्र, मेद, ( स्त्री० )
**बाष्प**–नेत्रजल, बाफ, ( पुं० )
**शष्प**–छोटातृण, ( न० ) **शष्प**–तीक्ष्णबुद्धिकी हानि, (पुं०) ॥१०॥
**शाप**–सौगन, दुराशिष, ( पुं० )
**शिष्प**–कृत्यमें उचित, ध्रुव, ( न० )
**सूप**–व्यंजनभेद, रसोई करनेवाला, ( पुं० ) ॥ ११ ॥
**स्वाप**–सोना, अज्ञान, निद्रा, स्पर्श, अज्ञता ( मूर्खता ) ( पुं० )
**क्षेप**–बिलंब ( देर ), स्त्रियोंका 'करण,' निंदा, प्रेरणकरना, लेपन, ( पुं० ) ॥ १२ ॥

**पतृतीय ।**

**अनूप**–भैंसा, ( पुं० ) जलप्रायदेश आदि ( त्रि० )
**आकल्प**–वेशमात्र, कल्पन (विचार) ( पुं० ) ॥ १३ ॥
**आवाप**–भाण्ड ( बरतन या अश्वभूषण ), क्षौर, परिक्षेप, वृक्षकी क्यारी, ( पुं० )
**आक्षेप**–झिड़कना, त्यागना, खेंचना, काव्यभूषण ( अलंकार ) ( पुं० ) ॥ १४ ॥
**उडुप**–चंद्रमा, ( पुं० ) **उडुप**–नौका, ( पुं० न० )
**उलप**–तृणभेद ( पुं० ) फैली हुई बेल, ( न० ) ॥ १५ ॥

"Aho Shrutgyanam"

**कच्छपः** कमठे काष्ठे मल्लभेदेऽपि **कच्छपः** ।
**कच्छपी** तु ङ्कुलौ क्षुद्ररुग्भेदे वल्लकीभिदि ॥ १६ ॥
**कलापः** संहते बर्हे काञ्च्यादौ तूणवृन्दयोः ।
भक्ते वस्त्रे च **कशिपुरे**कोक्त्या तूभयोरपि ॥ १७ ॥
**काश्यपी** तु क्षितौ मीनमुनिभेदे तु **कश्यपः** ।
**कुटपो**ऽस्त्री मानभेदे **कुटपो** निष्कुटे मुनौ ॥ १८ ॥
विदारिकायां कुणपी पूतिगन्धौ शवे पुमान् ।
**कुतपो** भागिनेये स्यादष्टमांशे दिनस्य च ॥ १९ ॥
कुतपस्तपने छागकम्बले कुशवाद्ययोः ।
**जिह्वापः** शुनि मार्जारे व्याघ्रपादपयोरपि ॥ २० ॥
**पादपः** पादपीठेऽद्रौ पादगण्डे च **पादपः** ।
**पादपा** पादुकायां स्यात्**प्रतापः** स्वेदतेजसोः ॥ २१ ॥

---

**कच्छप**—कछुवा, काष्ठ, मल्लभेद, ( पुं० )

**कच्छपी**—कछवी, क्षुद्ररुग्भेद, वीणाभेद, ( स्त्री० ) ॥ १६ ॥

**कलाप**—इकट्ठाहुवा, मोरपंख, कांची ( करधनीं )आदि, बाणोंका माथा, वृन्द, ( पुं० )

**कशिपु**—अन्न, वस्त्र, अन्नवस्त्र, ( पुं० ) ॥ १७ ॥

**काश्यपी**—पृथ्वी, ( स्त्री० )

**कश्यप**—मीनभेद, मुनिभेद, ( पुं० )

**कुटप**—मानभेद, घरके समीप लगाया हुवा बाग, मुनि, ( पुं० ) ॥ १८ ॥

**कुणपी**—विदारीकंद, ( स्त्री० )

**कुणप**—दुर्गंधवाला मुर्दा, ( पुं० )

**कुतप**—भानजा, दिनका आठवां भाग, ॥ १९ ॥

सूर्य, बकरेके ऊनका कंबल, कुशा, बाजा ( पुं० )

**जिह्वाप**—कुत्ता, बिलाव, बघेरा, वृक्ष, ( पुं० ) ॥ २० ॥

**पादप**—पादपीठ ( पैरोंकीचौकी ), पर्वत, गंडशैल ( पर्वतसे गिरा बडा पत्थर ) ( पुं० )

**पादपा**—खडाऊं, ( स्त्री० )

**प्रताप**—पसीना, तेज, ( पुं० ) ॥२१॥

"Aho Shrutgyanam"

**रक्तपा** स्याज्जलौकायां **रक्तपस्तु** क्षपाचरे ।
**विकल्पो** विचिकित्सायां **विकल्पो** भ्रान्तिपक्षयोः ॥ २२ ॥
**विटपोऽस्त्री** लतास्तम्बखिङ्गविस्तारपल्लवे ।

पचतुर्थम् ।

**अपलापोऽ**पलपने प्रेमापह्नवयोरपि ॥ २३ ॥
**अभिरूपो** बुधे रम्ये **प्राप्तरूपसुरूपवत्** ।
**अवलेपस्तु** दोषे स्याद्गर्वे लेपे च सङ्गमे ॥ २४ ॥
**उपतापो** मतः पुंसि गदोत्तापत्वरार्थकः ।
**उपयापो** विक्षेपे स्यात्तथा भेदेऽवदारणे ॥ २५ ॥
**जलकूपी** पुष्करिण्यां कूपगर्भेऽपि सा स्मृता ।
**नागपुष्पस्तु** पुन्नागे चम्पके नागकेसरे ॥ २६ ॥
परिकम्पे मतो भीतौ **परिकम्पः** प्रकम्पने ।
**परीवापो** जलस्थाने पर्युप्तौ च परिच्छदे ॥ २७ ॥

---

**रक्तपा**–जोक, ( स्त्री० )
**रक्तप**–राक्षस, ( पुं० )
**विकल्प**–संदेह, भ्रांति, पक्ष, ( कल्पना ) ( पुं० ) ॥ २२ ॥
**विटप**–बेल, गुच्छा, कामिशिरोमणि, विस्तार, पल्लव ( पत्ते ) ( पुं० )

**पचतुर्थ ।**

**अपलाप**–खोटाबोलना, प्रेम, छुपाना, ( पुं० ) ॥ २३ ॥
**अभिरूप–प्राप्तरूप–सुरूप**-पंडित, सुंदर, ( पुं० )
**अवलेप**–दोष, अभिमान, लेपन, संगम ( मिलाप ) ( पुं० ) ॥२४॥
**उपताप**–रोग, उत्ताप ( बहुतखेद ), शीघ्रता ( पुं० )
**उपयाप**–विशेष ( भेद ), विदीर्ण करना, फोटना, ( पुं० ) ॥ २५ ॥
**जलकूपी**–नदी, कूवाका गर्भ (बीच) ( स्त्री० )
**नागपुष्प**–पुन्नाग–वृक्ष, चंपा, नागकेसर, ( पुं० ) ॥ २६ ॥
**परिकंप**–भय, काँपना ( पुं० )
**परीवाप**–जलस्थान, अच्छी तरह बीजबोना, परिवार, (पुं०) ॥२७॥

"Aho Shrutgyanam"

**पिण्डपुष्पमशोके** स्याज्जवापुष्पेऽपि पंकजे ।
**बहुरूपः** स्मरहेर स्वभूसरटधूनके ॥ २८ ॥
**मेघपुष्पं** तु पिण्डाभे जलनादेययोरपि ।
**विप्रलापो** विरोधोक्तावपार्थवचनेऽपि च ॥ २९ ॥
**बीजपुष्पं** मरुबके मतं दमनकद्रुमे ।
**वृकधूपस्तु** सरलद्रवकृत्रिमधूपयोः ॥ ३० ॥
**वृषाकपिर्म्महादेवे** कृष्णपावकयोरपि ।
**हेमपुष्पमशोके** स्याज्जवापुष्पेऽपि चम्पके ॥ ३१ ॥

पपञ्चमम् ।

भवेच्चा**मरपुष्पं** तु काशे चूते च केतके ॥ ३२ ॥

इति विश्वलोचने पान्तवर्गः ॥

---

**पिंडपुष्प**—अशोक–वृक्ष, जवापुष्प, कमल, ( न० )

**बहुरूप**—कामदेव, महादेव, विष्णु, गिरगट, राल–वृक्ष, (पुं०) ॥२८॥

**मेघपुष्प**—मेघ, जल, नदीमें होनेवाला ( न० )

**विप्रलाप**—विरोधसे वचन, निरर्थकवचन, ( पुं० ) ॥ २९ ॥

**बीजपुष्प**—मरुवा, दौना, ( न० )

**वृकधूप**—सरलवृक्षका गोंद, बनाई हुई धूप, ( पुं० ) ॥ ३० ॥

**वृषाकपि**—महादेव, कृष्ण, अग्नि ( पुं० )

**हेमपुष्प**—अशोक ७ वृक्ष, जबापुष्प, चंपा, ( न० ) ॥ ३१ ॥

**पपंचम ।**

**अमरपुष्प**—काश, आँब, केतकी–पुष्प, ( न० ॥ ३२ ॥

इस प्रकार विश्वलोचनकी भाषाटीकामें पान्तवर्ग समाप्त हुवा ॥

"Aho Shrutgyanam"

## अथ फान्तवर्गः ।

फैकम् ।

फु मन्त्रे फे रुते सङ्ख्ये स्फा वृद्धौ फेरवे पुमान् ।
फः स्याज्झञ्झानिले पुंसि स्फूः स्फुटे फुल्लभाषयोः ॥ १ ॥

फद्वितीयम् ।

गुम्फो बाह्वोरलंकारे गिरातन्तोश्च गुम्फने ।
रफो रवर्णे पुंस्येव कुत्सिते त्वभिधेयवत् ॥ २ ॥
शफं खुरे गवादीनां तरूणां चरणेऽपि च ।
शिफा जटायां नद्यां च मांसिकायां च मातरि ॥ ३ ॥

इति विश्वलोचने फान्तवर्गः ॥

---

## अथ वान्तवर्गः ।

वैकम् ।

वं प्रचेतसि पुंसि स्यादुपमाने तदव्ययम् ॥ १ ॥

---

### अथ फान्तवर्ग ।

#### फैक ।

**फु**–तंत्र ( उच्चारण करके फूकदेना ), शब्द, युद्ध, ( पुं० )
**स्फा**–वृद्धि, ( स्त्री० ) गीदड, (पुं०)
**फ**–वृष्टिसहित वायु, ( पुं० )
**स्फू**–स्फुट ( प्रकट ), फूलाहुवा, ( पुं० ) ॥ १ ॥

#### फद्वितीय ।

**गुम्फ**–भुजाओंका आभूषण, वाणी और तंतुओंका गुम्फन ( गूंथना ),
**रेफ**–र–वर्ण, (पुं०) कुत्सित, (त्रि०) ॥ २ ॥
**शफ**–गौआदिकोंका खुर, वृक्षोंकी जड, ( न० )
**शिफा**–वृक्षकी जड, नदी, जटामांसी, माता, ( स्त्री० ) ॥ ३ ॥

इस प्रकार विश्वलोचनकी भाषाटीकामें फान्तवर्ग समाप्तहुवा ॥

---

### अथ वान्तवर्ग ।

#### वैक ।

**व**–वरुण, ( पुं० ) उपमान (अव्यय) ॥ १ ॥

"Aho Shrutgyanam"

वद्वितीयम् ।

**स्त्री** वंशांशे खजाकायां **कंबिः कंबुः** पुमान् गजे ।
वलये शङ्खशम्बूक कन्धरामलके स्त्रियाम् ॥ २ ॥
ह्रस्वे सङ्ख्यान्तरे **खर्वश्चार्वी** स्याच्छोभनाधियोः ।
**जम्बूः** स्त्री मेरुसरिति द्वीपपादपभेदयोः ॥ ३ ॥
**डिम्बस्तु** विप्लवप्लीहफुप्फुसैरण्डभीतिषु ।
**डिम्बः** कलकलेऽपि स्याद्दर्वी फणखजाकयोः ॥ ४ ॥
**दार्वी** दारुहरिद्रायां हरिद्रादेवदारुणोः ।
पुंभूम्नि पूर्वजेषु स्यात्**पूर्वः** प्रागाद्ययोस्त्रिषु ॥ ५ ॥
तिक्ततुम्बीश्रियोर्**लम्बा बिम्बं** स्याद्बिम्बिकाफले ।
मण्डले प्रतिबिम्बे च **बिम्बः** पुंसि नपुंसकम् ॥ ६ ॥
**शंबः** शुभान्विते वज्रे मुसलाग्रस्थमण्डले ।
**शुम्बो** मतः पुमानेव भृशगुल्माप्रकाण्डयोः ॥ ७ ॥

---

**वद्वितीय ।**

**कंबि**—वंशविभाग, कडछी, ( स्त्री० )
**कंबु**—हस्ती ( पुं० ) कंकण, शंख, सँखला, ग्रीवा, आँवला ( स्त्री० ) ॥ २ ॥
**खर्व**—बौना,, संख्याभेद, ( पुं० )
**चार्वी**—सुंदरी, बुद्धि, ( स्त्री० )
**जंबू**—सुमेरुकी नदी, ( स्त्री० ) जंबूद्वीप, जामन—वृक्ष, ( पुं० ) ॥ ३ ॥
**डिंब**—हलचल या नाश, तिल्ली, फुप्फुस, अरंड, भय, कोलाहल ( पुं० )
**दर्वी**—सर्पकी फणा, कडछी, ( स्त्री० ) ॥ ४ ॥
**दार्वी**—दारुहलदी, हलदी, देवदार—वृक्ष, ( स्त्री० )
**पूर्व**—पहलेजन्मनेवाले ( पुं० ) बहुवचनांत ) पूर्व ( पहल ) आदिमें-होनेवाला ( त्रि० ) ॥ ५ ॥
**लंबा**—कडवी तूँबी, लक्ष्मी, ( स्त्री० )
**बिंब**—बिंबिका ( गोहल ) फल, (न०) मंडल, प्रतिबिंब, ( पुं० ) ॥ ६ ॥
**शंब**—शुभयुक्त, ( त्रि० ) वज्र, मूसलके आगेका लोहमंडल, ( पुं० )
**शुंब**—सघनगुच्छा, वृक्षस्कन्ध ( वृक्षकी शाख ) ॥ ७ ॥

"Aho Shrutgyanam"

वतृतीयम् ।

**कदम्बं** निकुरुम्बे स्यान्नीपसिद्धार्थयोः पुमान् ।
**गजाह्वा** गजपिप्पल्यां **गजाह्वं** हस्तिनापुरे ॥ ८ ॥
**गन्धर्वो** मृगभेदे स्याद्गायने खेचरे हये ।
अन्तराभवसिद्धे च रससिद्धे च कोकिले ॥ ९ ॥
**गोडुम्बः** शीर्णवृक्षेऽपि गवादिन्याः फलेपि च ।
**द्विजिह्वः** पन्नगे पुंसि **द्विजिह्वः** पिशुने त्रिषु ॥ १० ॥
कटीचक्रे **नितम्बः** स्याच्छिखरिस्कंधरोधसोः ।
**प्रलम्बो** लम्बने दैत्ये तालाङ्कुरकशाखयोः ॥ ११ ॥
**प्रालम्बो** हारभेदेऽपि त्रपुषेपि पयोधरे ।
**भूजम्बूरपि** गोडुम्बे विकङ्कतफले स्त्रियाम् ॥ १२ ॥
**हेरम्बो** महिषे लम्बोदरशूरत्वगर्विते ।

बचतुर्थम् ।

**राजजम्बूस्तु** जम्बूभित्पिण्डखर्जूरयोर्मता ॥ १३ ॥

---

**बतृतीय ।**

**कदंब**–समूह, कदंब-वृक्ष, सिरसों ( पुं० )

**गजाह्वा**–गजपीपल, ( स्त्री० )

**गजाह्व**–हस्तिनापुर ( न० ) ॥ ८ ॥

**गंधर्व**–मृगभेद, गवैया, खेचर ( गंधर्व ), अश्व, अंतराभवमें होनेवाला सिद्ध, रससिद्ध, कोकिल ( नर-कोयल ) ( पुं० ) ॥ ९ ॥

**गोडुंब**–गिराहुवा-वृक्ष, गड़ूँभा ( कटुतुंबी ) ( पुं० )

**द्विजिह्व**–सर्प, ( पुं० ) चुगलखोर, ( त्रि० ) ॥ १० ॥

**नितंब**–चूतड़ या कटी, पर्वतकी ऊँची चोटी, किनारा ( पुं० )

**प्रलंब**–लंबन ( लटकना ), प्रलंब दैत्य, तालका अंकुर और शाखा, ( पुं० ) ॥ ११ ॥

**प्रालंब**–हारभेद, रांग, कुच, ( पुं० )

**भूजंबू**–गड़ूँभा, खटाईका फल,( स्त्री० ) ॥ १२ ॥

**हेरंब**–भैंसा, गणेश, शूरतासें गर्वित, ( पुं० ) ।

**बचतुर्थ ।**

**राजजंबू**–जामनभेद, मैनफल-वृक्ष, खजूर, ( स्त्री० ) ॥ १३ ॥

"Aho Shrutgyanam"

**ललजिह्वः** प्रमानुष्ट्रे शुनि हिंस्रेऽभिधेयवत् ।
**शतपर्वा** तु दूर्वायां भार्गवस्य च योषिति ॥ १४ ॥

बपञ्चमम् ।

**गोरक्षजम्बूर्गोधूमे** तथा गोरक्षतंडुले ।
**धूलीकदम्बस्तिनिशे** कदम्बे वरुणद्रुमे ॥ १५ ॥
**शृगालजम्बूर्गोडुम्बे** कचित्तु बदरीकले ॥ १६ ॥

इति विश्वलोचने बान्तवर्गः ॥

---

## अथ भान्तवर्गः ।

भैकम् ।

**भा** स्यान्मयूखे शुक्रेऽपि पुंसि पुष्पंधये तु **भः** ।
दीप्तौ च स्थानमात्रे **भा भं** नक्षत्रे भये तु भी ॥ १ ॥
**भूर्भुवि** स्थानमात्रेऽपि स्त्रियां भवितरि त्रिषु ।
सम्बुद्धावव्ययं भो स्यात्-

---

**ललज्जिह्व**–ऊँट, कुत्ता, ( पुं० ) हिंसाकरनेवाला, ( त्रि० ) ।
**शतपर्वा**–दूब ( घास ), शुक्रकी स्त्री, ( स्त्री० ) ॥ १४ ॥
**गोरक्षजंबू**–गेहूं, गुलसकरी, (पुं०)
**धूलीकदंब**–तिरिच्छ वृक्ष, कदंब, बरना-वृक्ष, ( पुं० ) ॥ १५ ॥
**शृगालजंबू**–गडूंभा (कटुतुंबी), बेर, ( पुं० ) ॥ १६ ॥

इस प्रकार विश्वलोचनकी भाषाटीकामें बान्तवर्ग समाप्त हुवा ॥

---

### अथ भान्तवर्ग ।

भैक ।

**भा**–किरण ( स्त्री० ) **भ**–शुक्र, भौंरा, ( पुं० ) **भा**–दीप्ति, स्थानमात्र, ( स्त्री० ) नक्षत्र, ( न० ) ।

**भी**–भय ( स्त्री० ) ॥ १ ॥

**भू**–पृथ्वी, स्थानमात्र, ( स्त्री० ) होनेवाला ( त्रि० ) ।

**भो**–संबोधनकरना ( अव्यय )

"Aho Shrutgyanam"

भद्वितीयम् ।

**—कुम्भो** राश्यन्तरे घटे ॥ २ ॥

समाधौ गजमूर्द्धांशे कुम्भकर्णसुते विटे ।

**कुम्भी** स्यात्पाटला वारिपर्णी पिठरकट्फले ॥ ३ ॥

**कुम्भं** गुग्गुलुवृक्षे स्यात्त्रिवृतायां च न द्वयोः ।

**गर्भो** भ्रूणेऽर्भके कुक्षौ सन्धौ पनसकण्टके ॥ ४ ॥

**जम्भो** दन्तेऽपि जम्बीरे दैत्यभेदेऽपि भक्षणे ।

**जृम्भो** विकासे पुंस्येव **जृम्भस्तु** त्रिषु जृम्भणे ॥ ५ ॥

**डिम्भस्तु** बालिशे पोते **दम्भः** कैतवकल्कयोः ।

**दृन्भूः** सूर्ये पवौ **नाभिर्ना** क्षत्रे चक्रवर्तिनि ॥ ६ ॥

द्वयोः प्रधानचक्रान्तःप्राण्यङ्गेषु मदे स्त्रियाम् ।

**निभस्तु** सदृशे व्याजे **संपूर्वः** स्तुल्य एव सः ॥ ७ ॥

---

**भद्वितीय ।**

**कुंभ**—कुंभ-राशि, घट, ॥ २ ॥ समाधि, हस्तीका मस्तक-भाग, कुंभकर्णका पुत्र, कामी, ( पुं० )

**कुंभी**—पाढरका-पुष्प, जलकुंभी, नागरमोथा, कायफल, ( स्त्री० )॥३॥

**कुंभ**—गूगल-वृक्ष, निसोत, ( न० )

**गर्भ**—गर्भ ( भ्रूण ), बालक, कुक्षि, सन्धि, फनसका कांटा, ( पुं० ) ॥ ४ ॥

**जम्भ**—दांत, जम्बीरी नीबू, एक दैत्य, भक्षण, ( पुं० )

**जृंभ**—खिलना-पुष्प आदिका, ( पुं० ) जँभाई, ( त्रि० ) ॥ ५ ॥

**डिम्भ**—मूर्ख, बालक, ( पुं० )

**दम्भ**—छल, कल्क ( तिलपीठी आदि) ( पुं० )

**दृन्भू**—सूर्य, वज्र, ( पुं० )

**नाभि**—चक्रवर्ती क्षत्रिय, नाभिराजा, ॥ ६ ॥ प्रधान, चक्रका मध्य-भाग, प्राणियोंका अंग ( सूँडी ), कस्तूरीमद, ( स्त्री० )

**निभ—संनिभ**—सदृश, व्याज ( बहाना ) ( पुं० ) ॥ ७ ॥

"Aho Shrutgyanam"

**रम्भा** कदल्यप्सरसो **रम्भो** वैणवदण्डके ।
परिपूर्वस्तु संश्लेषे **विभुर्नित्ये** शिवे प्रभौ ॥ ८ ॥
**शुम्भः** स्याद्ब्रह्मशिवयोरर्हत्यपि च केशवे ।
योगे **शुभः शुभं** क्षेमे **शोभा** कान्तीच्छयोर्मता ॥ ९ ॥
**सभा** सामाजिके गोष्ठ्यां धूतमन्दिरयोः **सभा** ।
**स्तम्भो** जडत्वे स्थूणायां **स्वभूर्गोविन्दवेधसोः** ॥ १० ॥

भतृतीयम् ।

पापेऽप्यरिष्टेऽप्य**शुभमात्मभूः** स्मरवेधसोः ।
**आरम्भ** उद्यमे दर्पे त्वरायां च वधेऽपि च ॥ ११ ॥
**ऋषभः** श्रेष्ठवृषयोरष्टवर्गौषधान्तरे ।
स्वराद्रिभेदे वराहपुच्छे रन्ध्रे च कर्णयोः ॥ १२ ॥

---

**रम्भा**–केला, अप्सरा, ( स्त्री० )
**रम्भ**–बांसका दंड, **परिरम्भ**–अच्छीतरह मिलना, ( पुं० )
**विभु**–नित्य, शिव, प्रभु, ( पुं० ) ८
**शुम्भ**–ब्रह्मा, शिव, अर्हत देव, केशव ( विष्णु ) ( पुं० )
**शुभ**–योग, ( पुं० ) क्षेम ( कुशल ) ( न० )
**शोभा**–कान्ति, इच्छा, ( स्त्री० ) ९
**सभा**–सामाजिक ( सहधर्मियोंकी सभा ), गोष्ठी, जूवा, मंदिर, ( स्त्री० )
**स्तंभ**–जडता, स्थूणा ( थून ) (पुं०)
**स्वभू**–विष्णु, ब्रह्मा, ( पुं० ) ॥ १० ॥

**भतृतीय ।**

**अशुभ**–पाप, खेद, ( न० )
**आत्मभू**–कामदेव, ब्रह्मा, ( पुं० )
**आरम्भ**–उद्यम, अभिमान, शीघ्रता, वध, ( मारना ) ( पुं० ) ॥११॥
**ऋषभ**–श्रेष्ठ, बैल, अष्टवर्गकी एक औषधि, एक गानेका स्वर, एक पर्वत, सूकरकी पूँछ, कानका छिद्र ( पुं० ) ॥ १२ ॥

"Aho Shrutgyanam"

**ऋषभी** तु नराकारनारीविधवयोषितोः ।
शूकशिंब्यां शिरालायां श्रेष्ठे स्यादुत्तरस्थितः ॥ १३ ॥
**ककुभो**ऽर्जुनवृक्षेऽपि रागभेदे प्रसेवके ।
**ककुब्** दिक्शोभयोः शास्त्रे कम्बले चम्पकस्रजि ॥ १४ ॥
**करभो** मणिबन्धादिकनिष्ठान्ते क्रमेलके ।
अष्टापदेऽपि **करभः** शरभे च मृगान्तरे ॥ १५ ॥
**कुसुम्भं** हेमनि महारजने ना कमण्डलौ ।
**गर्दभी** रासभे गन्धभेदे क्लीबं तु कैरवे ॥ १६ ॥
**गर्दभी** स्वल्परुग्जन्तुभेदयोरथ पुंस्ययम् ।
**दुन्दुभिर्दै**त्यभेर्योः स्त्री त्वक्षबिन्दुत्रिके द्वये ॥ १७ ॥
दुष्प्रापे वल्लभे कच्छरोगिणि त्रिषु **वल्लभः** ।
**निकुम्भः** कुम्भकर्णस्य पुत्रे दन्त्यामपि स्मृतः ॥ १८ ॥

---

**ऋषभी**–नराकार ( दाढीमूछवाली ) स्त्री, विधवा स्त्री, कौंछ, कमरख ( स्त्री० )

**ऋषभ**–शब्द किसीके आगे जोड़ा-हुवा श्रेष्ठवाचक है ( पुं० ) ॥ १३ ॥

**ककुभ**–अर्जुन ( कोह ) वृक्ष, राग-भेद, बीणाकी तूँबी, ( पुं० )

**ककुभ**–दिशा-पूर्व आदि, शोभा, शास्त्र, कंबल, चंपाकी माला, ( स्त्री० ) ॥ १४ ॥

**करभ**–मणिबंध ( पहुँचा )से लेकर कनिष्ठाके अंततक भाग, ऊँट, चौपड़ या सुवर्ण, शरभ (साबर), मृगभेद ( पुं० ) ॥ १५ ॥

**कुसुंभ**–सुवर्ण, कमंडलु ( जलपात्र ) ( पुं० )

**गर्दभ**–गधा, गंधभेद, ( पुं० ) श्वेत कमल ( न० ) ॥ १६ ॥

**गर्दभी**–क्षुद्ररोग, जन्तुभेद ( स्त्री० )

**दुन्दुभि**–एक दैत्य, भेरी (पुं०) चौपड खेलनेके तीन पासे ( पुं० स्त्री० ) ॥ १७ ॥

**वल्लभ**–जो दुःखसे प्राप्त हो वह, प्रिय, कच्छरोगवाला, ( त्रि० )

**निकुंभ**–कुंभकर्णका पुत्र, जमालगोटाकी जड, ( पुं० ) ॥ १८ ॥

"Aho Shrutgyanam"

**वल्लभो** ना कुलीनाश्वे दयिताध्यक्षयोस्त्रिषु ।
पुनर्नवायां **वर्षाभूः** स्त्री ना किंचुलके प्लवे ॥ १९ ॥
**विष्कम्भो** योगभेदेऽपि बन्धभेदेऽपि योगिनाम् ।
रूपकाङ्गे परिष्टम्भे विस्तारप्रतियत्नयोः ॥ २० ॥
**विष्कम्भः** प्रतिबन्धेऽपि वैदर्भे विस्मृतावपि ।
**विश्रम्भः** केलिकलहे विश्वासे प्रणये वधे ॥ २१ ॥
**वृषभस्तु** वृषे शुक्रे **वृषभः** पुङ्गवेऽपि च ।
**वैदर्भं** वाक्यवक्रत्वे **वैदर्भः** स्यान्नृपान्तरे ॥ २२ ॥
**सनाभिः** पूजने पुंसि **सनाभिः** सदृशे त्रिषु ।
**सुरभिश्च**म्पके चैत्रे वसन्ते गन्धके कवौ ॥ २३ ॥
स्वर्णे जातीफले चाब्जे त्रिषु मद्यसुगन्धयोः ।
ख्याते च स्त्री तु शल्लक्यां **सुरभी** मातृभेदयोः ॥ २४ ॥

---

**वल्लभ**—कुलीन अश्व, ( पुं० ) प्रिय, अध्यक्ष, ( त्रि० )

**वर्षाभू**—साँठी, ( स्त्री० ) कैंचुवा, मेंडक, ( पुं० ) ॥ १९ ॥

**विष्कंभ**—योगभेद, योगियोंका बंधभेद, रूपकका अंग, परिष्टंभ (अरली), विस्तार, प्रतियत्न, ॥ २० ॥ प्रतिबंध, वैदर्भ ( एक राजा ), विस्मृति ( भूलना ) ( पुं० )

**विश्रंभ**—क्रीडाकलह, विश्वास, नम्रता, वध ( मारना ) (पुं० ) ॥ २१ ॥

**वृषभ**—बैल, शुक्र, श्रेष्ठ, ( पुं० )

**वैदर्भ**—वाक्यकी वक्रता, ( न० )

**वैदर्भ**—एक राजा, ( पुं० ) ॥ २२ ॥

**सनाभि**—पूजन, (पुं०) सदृश (तुल्य) ( त्रि० )

**सुरभि**—चंपा, चैत्र—मास, वसंत—ऋतु, गंधक, कवि (पुं०) ॥ २३ ॥ सुवर्ण, जायफल, ( पुं० ) मद्य, सुगंध, विख्यात, ( त्रि० ) शल्लकी ( सेह ), गौ, मातृभेद, ( स्त्री० ) ॥ २४ ॥

"Aho Shrutgyanam"

भचतुर्थम् ।

वाण्यां छन्दःप्रभेदेऽपि स्यादनुष्टुबिति स्मृतः ।
**अवष्टम्भः** सुवर्णेऽपि प्रारम्भस्तम्भयोरपि ॥ २५ ॥
**शातकुम्भं** तु कनके **शातकुम्भो**ऽश्वमारके ॥ २६ ॥

इति विश्वलोचने भान्तवर्गः ॥

---

## अथ मान्तवर्गः ।

मैकम् ।

**मः** शिवे पुंसि **मश्चन्द्रे मो** विधौ **मां** तु मातरि ।
स्त्रियां स्यान्**मा** रमायां च **मा**क्षेपे मानबन्धयोः ॥ १ ॥
**मा** निषेधेऽव्ययं **मे** च ममेत्यर्थे **मम**ाव्ययम् ।

मद्वितीयम् ।

**अमो** रोगेऽपि तद्भेदे स्यादपक्के तु वाच्यवत् ॥ २ ॥
**इध्मः** पुंसि वसन्ते स्या**दिध्मः** स्यान्मीनकेतने ।
**उमा** गौर्यामतस्यां च हरिद्राकान्तिकीर्तिषु ॥ ३ ॥

---

**भचतुर्थ ।**

**अनुष्टुभ्**—सरस्वती, छन्दोभेद, (स्त्री०)
**अवष्टम्भ**—सुवर्ण, प्रारंभ, स्तम्भ ( थंभ ) ( पुं० ) ॥ २५ ॥
**शातकुंभ**—सुवर्ण, ( न० ) कनेरका पेड, ( पुं० ) ॥ २६ ॥

इस प्रकार विश्वलोचनकी भाषाटीकामें भान्तवर्ग समाप्त हुवा ॥

---

**अथ मान्तवर्ग ।**

मैक ।

**म**—शिव, चंद्रमा, ब्रह्मा, ( पुं० )
**मा**—माता, लक्ष्मी, ( स्त्री० )
**मा**—आक्षेप, माप, बंधन, ॥ १ ॥ ( स्त्री० )
**मा**—निषेध, ( अव्यय )
**मे—मम**—मम ( मेरा ) शब्दका अर्थ ( अव्यय )

**मद्वितीय ।**

**अम**—रोग, रोगभेद, ( पु० ) अपक्क, ( त्रि० ) ॥ २ ॥
**इध्म**—वसंत—ऋतु, कामदेव, ( पुं० )
**उमा**—पार्वती—देवी, अलसी, हलदी, कान्ति, कीर्ति, ( स्त्री० ) ॥ ३ ॥



"Aho Shrutgyanam"

**उमस्तु** स्यात्पुमानेव मतो नगरघट्टयोः ।
**ऊर्म्मिर्द्वयो**स्तरङ्गे स्याद्भङ्गे वेगप्रकाशयोः ॥ ४ ॥
वस्त्रसंकोचरेखायामुत्कण्ठापीडयोरपि ।
**कामः** स्मरेच्छयोः काम्ये **कामं** रेतोनिकामयोः ॥ ५ ॥
सम्मते स्यादनुमतौ **काम**मित्येतदव्ययम् ।
**कामिः** स्त्री कामकान्तायां **कामिः** स्यात्कामुके पुमान् ॥ ६ ॥
सर्वनाम्नि **किमि**त्येतद्विज्ञेयमभिधेयवत् ।
**किं** वितर्केऽव्ययं प्रश्ने क्षेपे निन्दाप्रकारयोः ॥ ७ ॥
**किर्म्मिः** स्त्री स्वर्णपुत्र्यां स्यादपि मालापलाशयोः ।
**कृमि**र्ना क्रिमिवत्कीटे लाक्षायां कृमिले खरे ॥ ८ ॥
**क्रमः** शक्तिपरीपाटीचलने कम्पनेऽपि च ।
**खर्मः** क्षौमप्रभेदेऽपि **खर्मं** स्यादपि पौरुषे ॥ ९ ॥

---

**उम**—नगर, घाट, ( पुं० )
**ऊर्मि**—तरंग, भंग ( टूटना ), वेग, प्रकाश ॥ ४ ॥ वस्त्रसंकोचकी रेखा, उत्कंठा ( उसेर ), पीडा, ( पुं० स्त्री० )
**काम**—कामदेव, इच्छा, इच्छित,(पुं०) वीर्य, निकाम (यथेच्छित), (न०) ॥ ५ ॥
**कामम्**—सम्मति, अनुमति, (अव्यय)
**कामि**—कामदेवकी स्त्री (रति) (स्त्री०) कामी पुरुष, ( पुं० ) ॥ ६ ॥
**किम्**—वितर्क, प्रश्न, क्षेप ( आक्षेप ), निंदा, प्रकार, ( सर्वनाम होनेपर त्रिलिंग और अव्यय होनेपर अलिंग) ॥ ७ ॥
**किर्मि**—सनाय, असवरग—वृक्ष, ढाक-वृक्ष ( स्त्री० )
**कृमि**—**क्रिमि**—कीट, लाख, जिसके क्रिमि पडीहैं ऐसा गर्दभ, ( पुं० ) ॥ ८ ॥
**क्रम**—शक्ति, परिपाटी, चलना, काँपना ( पुं० )
**खर्म**—रेशमी वस्त्रका भेद, पुरुषार्थ, ( न० ) ॥ ९ ॥

"Aho Shrutgyanam"

**गमो** द्यूतान्तरे मार्गेऽप्यपर्यालोचितेऽपि च ।
**गुल्मः** स्तम्बे चमूरक्षासैन्ययोः प्लीहघट्टयोः ॥ १० ॥
**गुल्मी** स्यादामलक्येलावनिकावस्त्रवेश्मसु ।
**ग्रामः** स्वरे संवसथे वृन्दे शब्दादिपूर्वकः ॥ ११ ॥
**घर्म्मः** स्यादातपे ग्रीष्मे ऊष्मस्वेदजलेऽपि च ।
**जाल्मः** स्यात्पामरे क्रूरे **जाल्मो**ऽसमीक्ष्यकारिणि ॥ १२ ॥
**जिह्मं** तु तगरे **जिह्म**स्त्रिषु स्यान्मन्दवक्रयोः ।
हरिद्यवेऽपि हरिते **तोकमस्तोक्मं** श्रुतेर्म्मले ॥ १३ ॥
**दमस्तु** दमने दण्डे दमथे कर्द्दमेऽपि च ।
**दस्मो** वैश्वानरे चौरे यजमानेऽपि च स्मृतः ॥ १४ ॥
**द्रुमस्तु** पादपे पारिजाते किंपुरुषेश्वरे ।
**धर्म्मः** स्यादस्त्रियां पुण्ये **धर्म्मो** न्यायस्वभावयोः ॥ १५ ॥

---

**गम**–जूवा, मार्ग, अच्छी तरह नहीं देखा हुवा, ( पुं० )
**गुल्म**–गुच्छा, सेनाकी रक्षा, सेनाभेद, तिल्ली, घाट, ( पुं० ) ॥ १० ॥
**गुल्मी**–आँवला, इलायची, वनी ( छोटावन ), तंबू-डेरा, ( स्त्री० )
**ग्राम**–स्वरभेद, ग्राम ( गाँव ), ग्रामके पूर्व शब्दआदि लगानेसे समूह, ( जैसे–शब्दग्राम ) (पुं०) ॥११॥
**घर्म**–धूप, ग्रीष्म–ऋतु, गरमी, पसीनाका जल, ( पुं० )
**जाल्म**–नीच, क्रूर, बिनाविचारे करनेवाला ( पुं० ) ॥ १२ ॥
**जिह्म**–तगरका वृक्ष, ( न० ) मंद, कुटिल, ( त्रि० )
**तोक्म**–हरा जव, हरा ( सबजा ), ( पुं० ) कानका मैल, ( न० ) ॥ १३ ॥
**दम**–दमनकरना ( इंद्रियोंको शांत करना)दंडदेना, रोकना, कीचड़(पुं०)
**दस्म**–अग्नि, चोर, यजमान, ( पुं० ) ॥ १४ ॥
**द्रुम**–वृक्ष, कल्पवृक्ष, कुबेर ( पुं० )
**धर्म**–पुण्य, (पुं० न०) **धर्म**–न्याय, स्वभाव, ( पुं० ) ॥ १५ ॥

"Aho Shrutgyanam"

उपमायां यमाचारवेदान्तेऽपि धनुष्यपि ।
यागे योगेऽप्यहिंसायां सोमपेऽपि क्वचिन्मतः ॥ १६ ॥

**ध्यामो** गन्धतृणे पुंसि **ध्यामो** दमनकेऽपि च ।
श्यामवर्णे त्रिषु **ध्यामो नुमा** नाम्नि परद्युतौ ॥ १७ ॥

**नेमिः** कूपत्रिकायां स्याच्चक्रान्ते तिनिशद्रुमे ।
**नेमो**ऽर्द्धकीलसीमासु गर्त्तप्राकारकैतवे ॥ १८ ॥

**पद्मो**ऽस्त्री पद्मनालेऽब्जे व्यूहसंख्यान्तरे निधौ ।
पद्मके नागभेदे ना **पद्मा** भार्ङ्गीश्रियोः स्त्रियाम् ॥ १९ ॥

**ब्राह्मी** तु भारतीपङ्कगतिकाब्रह्मशक्तिषु ।
फञ्जिकायां तथा सोमवल्लरीशाकयोरपि ॥ २० ॥

**भामः** क्रोधे रवौ भासि **भीमः** शम्भौ वृकोदरे ।
स्यादम्लवेतसे **भीम**स्त्रिषु घोरे भयानके ॥ २१ ॥

---

उपमा, धर्मराज, आचार, वेदान्त, धनुष, याग, योग, अहिंसा, अमृत पान करनेवाला, ( पुं० ) ॥१६॥

**ध्याम**–सुगंधि तृण–विशेष, दौना ( पुष्पवेड ) ( पुं० ) श्यामवर्ण, ( त्रि० )

**नुमा**–नाम, परमकांति, ( स्त्री० ) ॥ १७ ॥

**नेमि**–कूएकी त्रिका ( चौखटा ), चक्रकी पुटी, तिरिच्छ वृक्ष, (पुं०)

**नेम**–आधा, कीला, सीमा, खड्डा, किला, कपट, ( पुं० ) ॥ १८ ॥

**पद्म**–कमलनाल, कमल, सेनारचना, संख्याभेद, निधि, पद्माक, नागभेद, ( पुं० )

**पद्मा**–भारंगी, लक्ष्मी, ( स्त्री० ) १९

**ब्राह्मी**–सरस्वती, मत्स्यभेद ( कीचडकी मच्छी ), ब्रह्मशक्ति, धमासा, सोमबेल, शाकभेद, ( स्त्री० ) २०

**भाम**–क्रोध, सूर्य, प्रभा, ( पुं० )

**भीम**–महादेव, भीमसेन, अम्लवेत, ( पुं० ) घोर, भयानक ( पुं० ) ॥ २१ ॥

"Aho Shrutgyanam"

**भीष्मस्तु** हरगाङ्गेयरक्षसि त्रिषु भीषणे ।
स्थानमात्रे क्षितौ **भूमिर्भौमस्तु** नरके कुजे ॥ २२ ॥
**भ्रमो** भ्रान्तौ च कुन्दाख्ययन्त्रे च जलनिर्गमे ।
संयमे यमजे धर्मराजे ध्वाङ्क्षे युगे **यमः** ॥ २३ ॥
नित्यकर्मप्रभेदे च यमुनायां **यमी** स्त्रियाम् ।
प्रहरे संयमे **यामो यामिः** स्वसृकुलस्त्रियोः ॥ २४ ॥
**प्रध्मश्चा**पेपि संग्रामे राममाधवयोषिति ।
**रमस्तु** मन्मथे कान्ते **रमो**ऽशोकमहीरुहे ॥ २५ ॥
**रश्मिरं**शुप्रग्रहयो **रश्मि**र्लोचनलोमनि ।
**रामस्तु** राघवे जामदग्न्ये हलधरेऽपि च ॥ २६ ॥
पशुभेदे सितश्याममनोज्ञेषु तु वाच्यवत् ।
**रामा**ङ्गनाहिङ्गुलिन्यो **रामं** वास्तुककुष्ठयोः ॥ २७ ॥

---

**भीष्म**–महादेव, भीष्मपितामह, राक्षस, ( पुं० ) भीषण, ( त्रि० )
**भूमि**–स्थानमात्र, पृथ्वी, ( स्त्री० )
**भौम**–भौमासुर ( नरकासुर ), मंगलग्रह, ( पुं० ) ॥ २२ ॥
**भ्रम**–भ्रान्ति, कुंदनामक यंत्र, जलनिर्गम ( चक्राकार होकर जलोंका नीचेको जाना ) ( पुं० )
**यम**–संयम ( इंद्रियादिकोंका रोकना), शनि-ग्रह, धर्मराज, काग, जोडा ॥ २३ ॥ नित्यकर्मभेद, ( पुं० )
**यमी**–यमुना, ( स्त्री० )
**याम**–प्रहर ( पहर ), संयम, (पुं०)
**यामि**–बहन, कुलकी स्त्री, ( स्त्री० ) ॥ २४ ॥
**प्रध्म**–धनुष, संग्राम, ( पुं० )
**प्रध्मा**–बलदेव कृष्णकी स्त्री ( स्त्री० )
**रम**–कामदेव, सुंदर, अशोक-वृक्ष, ( पुं० ) ॥ २५ ॥
**रश्मि**–किरण, घोडा आदिकोंकी रस्सी, नेत्र, लोम, (पलख) (पुं०)
**राम**–रामचंद्र, परशुराम, बलदेव, ॥ २६ ॥ पशुभेद, ( पुं० ) श्वेत, श्याम, सुंदर, ( त्रि० )
**रामा**–स्त्री, कटेहली, ( स्त्री )
**राम**–बथुवा, कूठ ( न० ) ॥ २७ ॥

"Aho Shrutgyanam"

मनोरमेऽभिपूर्वायां **रुक्मं** तु स्वर्णलोहयोः ।
**रुमा** सुग्रीवकान्तायां **रुमा** तु लवणाकरे ॥ २८ ॥
**लक्ष्मीः** श्रीरिव संपत्तौ पद्माशोभाप्रियङ्गुषु ।
**लक्ष्मीः** स्यादौषधीभेदे नञः पूर्वा तु निर्ऋतौ ॥ २९ ॥
**वमिः** स्यात्पावके पुंसि **वमिस्तु** वमने स्त्रियाम् ।
**वामः** सव्ये हरे कामे धने वित्ते तु न द्वयोः ॥ ३० ॥
**वल्गु** प्रतीपयोर्वामस्त्रिषु **वामा** तु योषिति ।
**वामी** शृगाल्यां वडवारासभीकरभीष्वपि ॥ ३१ ॥
**शमी** शक्तुफलायां स्याच्छिवायां वल्गुलावपि ।
**शुष्मः** पुमान्दिनपतौ मतं **शुष्मं** तु तेजसि ॥ ३२ ॥
**श्यामस्तु** हरिते कृष्णे प्रयागस्य वटद्रुमे ।
पिके पयोधरे वृद्धदारकेऽपि पुमानयम् ॥ ३३ ॥

---

**अभिराम**–सुंदर, ( त्रि० )
**रुक्म**–सुवर्ण, लोह, ( न० )
**रुमा**–सुग्रीवकी स्त्री, नमककी खान, ( स्त्री० ) ॥ २८ ॥
**लक्ष्मी**–(**श्री**) संपत्ति, लक्ष्मी, शोभा, फूलप्रियंगु, औषधी–भेद (ऋद्धि–वृद्धि–आदि ( स्त्री० )
**अलक्ष्मी**–नरककी अशोभा ( स्त्री० ) ॥ २९ ॥
**वमि**–अग्नि, ( पुं० ) **वमि**–वमन ( स्त्री० )
**वाम**–सव्य ( बायां अंग ), महादेव, कामदेव, मेघ, ( पुं० ) धन, ( न० ) ॥ ३० ॥
**वाम**–सुंदर, प्रतिकूल, ( पुं० )
**वामा**–स्त्री, ( स्त्री० )
**वामी**–गीदड़ी, घोड़ी, गर्दभी, ऊँटनी ( स्त्री० ) ॥ ३१ ॥
**शमी**–जाँट–वृक्ष, कौंछ, बाघल-पक्षी, ( स्त्री० )
**शुष्म**–सूर्य, ( पुं० ) **शुष्म**–तेज, ( न० ) ॥ ३२ ॥
**श्याम**–हरित, कृष्ण, प्रयागका वड़, कोयल–पक्षी, मेघ, भिदारा (पुं०) ॥ ३३ ॥

"Aho Shrutgyanam"

श्यामवर्णे हरिद्वर्णे त्रिषु **श्यामा** तु वल्गुलौ ।
अप्रसूताङ्गनायां च **श्यामा** सोमलतोषधौ ॥ ३४ ॥

त्रिवृताशारिवागुन्द्रानिशानीलीप्रियङ्गुषु ।
**श्यामं** लवणभेदेऽपि **श्यामं** स्यान्मरिचेऽपि च ॥ ३५ ॥

**श्रामस्**तु मण्डपे काले विपूर्वः श्रमवञ्चने ।
**समा** वर्षे सदृक्सर्वमान्येषु च **समं** त्रिषु ॥ ३६ ॥

**सीमा**ऽवधौ च वेलायां क्षेत्रे घाटे स्थितावपि ।
**सूक्ष्मं** तु नभसि क्षीरे **सूक्ष्म**मल्पेऽभिधेयवत् ॥ ३७ ॥

कतकाऽध्यात्मयोः **सूक्ष्मं सूक्ष्मः** पुंस्यणुमात्रके ।
**सोमः** सुधांशुकर्पूरकुबेरपितृदैवते ॥ ३८ ॥

दिव्यौषधीश्यामलतावसुभिद्वातवानरे ।
तुषारे चन्दने शीते **हिमं** त्रिषु तु शीतले ॥ ३९ ॥

---

श्यामवर्णवाला, हरितवर्णवाला (त्रि०)
**श्यामा**–बाघल–पक्षी, नहीं प्रसूति हुई स्त्री, सोमलता औषधि ॥३४॥ निसोथ, अनंतमूल, भद्रमोथा, हलदी, लीलका पेड, फूलप्रियंगु, (स्त्री०)
**श्याम**–लवणभेद, स्याह मिरच, (न०) ॥ ३५ ॥
**श्राम**–मंडप, काल, (पुं०)
**विश्राम**–श्रम (खेद) का दूरकरना, (पुं०)
**समा**–वर्ष, (स्त्री०)
**सम**–तुल्य, संपूर्ण, श्रेष्ठ, (त्रि०)॥३६॥
**सीमा**–अवधि, वेला (नदीआदिका तीर), क्षेत्र, घाट, स्थिति, (स्त्री०)
**सूक्ष्म**–आकाश, दुग्ध, (न०) अल्प (त्रि०) ॥ ३७ ॥ **सूक्ष्म**–कतक (निर्मली), अध्यात्म (आत्म-विचार) (न०) **सूक्ष्म**–अणु (सूक्ष्ममात्र,) (पुं०)
**सोम**–चंद्रमा, कपूर, कुबेर, पितृदेवता, ॥ ३८ ॥ दिव्य औषधि, सोमलता, वसुभेद, बायु, बंदर, (पुं०)
**हिम**–बर्फ, चंदन, ठंढा, (पुं०)
**हिम**–ठंढा, (त्रि०) ॥ ३९ ॥

"Aho Shrutgyanam"

**होमि**रग्नौ घृते चाथ क्षितौ क्षान्तावपि **क्षमा** ।
**क्षमं** युक्ते **क्षमः** शक्ते हिते क्षान्त्यन्वितेऽन्यवत् ॥ ४० ॥
**क्षुमा**ऽतसीनीलिकयोः **क्षेमं** स्याल्लब्धरक्षणे ।
मङ्गले चोरके वा स्त्री **क्षेमा** चण्डाहरस्त्रियोः ॥ ४१ ॥
**क्षौमं** स्यादतसीवस्त्रे **क्षौम**मट्टदुकूलयोः ।

मतृतीयम् ।

**अधमः** कुत्सिते न्यूनेऽप्या**गमः** शास्त्र आगतौ ॥ ४२ ॥
**आश्रमो** ब्रह्मचर्यादौ मुनिस्थाने मठे स्त्रियाम् ।
**उत्तमा** दुग्धिकायां स्यादुत्कृष्टे तु त्रिषू**त्तमम्** ॥ ४३ ॥
**कलमः** शालिलेखन्योश्चौरे लाक्षारसेऽपि च ।
**कुसुमं** पुष्पफलयोरार्त्तवे लोचनामये ॥ ४४ ॥
**कृत्रिमं** लवणे पुंसि सिह्लके कृतके त्रिषु ।
**गुडार्मः** स्याद्गुडक्षोदे क्षीरदारुणि च स्मृतः ॥ ४५ ॥

---

**होमि**–अग्नि, घृत, ( पुं० )
**क्षमा**–पृथ्वी, क्षान्ति, ( स्त्री० )
**क्षम**–युक्त, (न०) समर्थ, हित (पुं०) क्षान्तियुक्त, ( त्रि० ) ॥ ४० ॥
**क्षुमा**–अलसी, नीली ( लील) (स्त्री०)
**क्षेम**–लब्धकी रक्षा, मंगल, चोरक गंधद्रव्य, ( भटेउर ) ( न० स्त्री० )
**क्षेमा**–चंडा–औषधी, पार्वती (स्त्री०) ॥ ४१ ॥
**क्षौम**–अलसीवस्त्र, अट्ट ( अटारी ), रेशमीवस्त्र ( न० )

**मतृतीय ।**

**अधम**–निंदित, न्यून ( कमती ), ( पुं० )
**आगम**–शास्त्र, आना, (पुं०) ॥४२॥
**आश्रम**–ब्रह्मचर्य आदि, मुनिका स्थान, मठ ( विद्यार्थियोंका स्थान ) ( पुं० न० )
**उत्तमा**–दूधी–औषधि, ( स्त्री० )
**उत्तम**–उत्कृष्ट ( श्रेष्ठ ) ( त्रि० ) ॥ ४३ ॥
**कलम**–साँठी–चावल, कलम, चोर, लाखका रंग, ( पुं० )
**कुसुम**–पुष्प, फल, स्त्रीका रज, नेत्रका रोग, ( न० ) ॥ ४४ ॥
**कृत्रिम**–लवण, हींग, (पुं०) नकली वस्तु, ( त्रि० )
**गुडार्म**–गुडका चूर्ण, दूधवाला वृक्ष, ( पुं० ) ॥ ४५ ॥

"Aho Shrutgyanam"

**गोधूमो** व्रीहिभेदे स्यान्नारङ्गे भेषजान्तरे ।
**गोलोमी** श्वेतदूर्वायां वारस्त्रीवचयोरपि ॥ ४६ ॥
**गौतमः** शाक्यसिंहेऽपि मुनिभेदेऽपि **गौतमः**
**गौतमी** चण्डिकायां च रोचन्यामपि **गौतमी** ॥ ४७ ॥
**तलिमं** कुट्टिमे तल्पे विताने यावकेऽपि च ।
**दाडिमः** पुंसि दाडिम्ब एलायामपि **दाडिमः** ॥ ४८ ॥
**निगमो** हट्टपूर्वेदकटलुण्डीषु वाणिजे ।
**नियमो** निश्चये बन्धे यन्त्रणे संविदि व्रते ॥ ४९ ॥
**निष्क्रमो** निर्गमे बुद्धिसम्पत्तौ दुष्कुलेऽपि च ।
**नैगमः** क्षुरिवेदान्तवणिग्वाणिज्यनागरे ॥ ५० ॥
**पञ्चमो** रागभेदे स्यात्पञ्चानां पूरणे त्रिषु ।
त्रिषु दक्षिणमेघेऽपि **पञ्चमी** पाण्डवस्त्रियाम् ॥ ५१ ॥

---

**गोधूम**–गेहूँ, नारंजी, औषधिभेद ( पुं० )
**गोलोमी**–सफेद–दूब, वेश्या, बच–औषधि, ( स्त्री० ) ॥ ४६ ॥
**गौतम**–बुद्धदेव, एकमुनि, ( पुं० )
**गौतमी**–चंडिका, गोरोचन, ( स्त्री० ) ॥ ४७ ॥
**तलिम**–कुट्टिम (रचितभूमि), शय्या, चँदोवा, यावक (कुल्माष) (न०)
**दाडिम**–अनार, इलायची, ( पुं० ) ॥ ४८ ॥
**निगम**–हाट, पुर, वेद, कट (मुर्दा), न्यायसारिणी, वाणिज, ( पुं० )
**नियम**–निश्चय, बन्ध, प्रेरणा, बुद्धि, व्रत, ( पुं० ) ॥ ४९ ॥
**निष्क्रम**–निकसना, बुद्धिसंपत्ति, दुष्कुल ( नेष्टकुल ) ( पुं० )
**नैगम**–नाई, वेदान्त, बणियां, वाणिज्य, नागर ( नगरमें होनेवाला पुरुष ) ( पुं० ) ॥ ५० ॥
**पंचम**–रागभेद, ( पुं० ) पांचोंको-पूर्ण करनेवाला ( पांचवां ) (त्रि०) दक्षिण दिशाका मेघ, ( त्रि० )
**पंचमी**–पांडवोंकी स्त्री(द्रौपदी)(स्त्री०) ॥ ५१ ॥

"Aho Shrutgyanam"

**परमस्तु** त्रिषूत्कृष्टे प्रधानाद्योश्च पुंसि तु ।
ओंकारे **परमं** तु स्यादनुज्ञायामसंज्ञकम् ॥ ५२ ॥
**प्रक्रमो**ऽवसरे चानुक्रमे चापक्रमे क्रमे ।
**प्रतिमा**ऽनुकृतौ दन्तबन्धनेऽपि च दन्तिनाम् ॥ ५३ ॥
आदावपि प्रधानेऽपि **प्रथमं** वाच्यलिङ्गकम् ।
**प्रहर्म्मः** सौधकूटस्थकलशाद्रिनितम्बयोः ॥ ५४ ॥
**मध्यमो** मध्यदेशे स्यात्स्वरे मध्येऽथ **मध्यमा** ।
त्रिषु दृष्टरजोनारीराकयो**र्मध्यमा** स्त्रियाम् ॥ ५५ ॥
कर्णिकात्र्यक्षरच्छन्दकरमध्याङ्गुलीषु च ।
**विक्रमस्**तूद्यमक्रान्तौ क्षमायां शक्तिसंपदि ॥ ५६ ॥
**विद्रुमो** रत्नवृक्षेऽपि प्रवाले नवपल्लवे ।
**विभ्रमस्**तु विलासे स्याद् **विभ्रमो** भ्रान्तिहावयोः ॥ ५७ ॥

---

**परम**—श्रेष्ठ, ( त्रि० ) प्रधान (मुख्य) आदि, ( पुं० )
**परम**—ॐकार, ( न० ) आज्ञा ( अव्यय ) ॥ ५२ ॥
**प्रक्रम**—अवसर, अनुक्रम, अपक्रम ( उलटा क्रम ) क्रम, ( पुं० )
**प्रतिमा**—अनुकृति ( अनुकरण ), हस्तियोंका दंतबंधन, ( स्त्री० ) ५३
**प्रथम**—आदि, प्रधान, ( त्रि० )
**प्रहर्म्म**—महलकी शिखरका कलश, पर्वतका नितंब, ( पुं० ) ॥ ५४ ॥
**मध्यम**—मध्यदेश, मध्यम-स्वर, (पुं०)
**मध्यमा**—रजस्वला स्त्री, पूर्णचंद्रवाली पूर्णिमा, ( स्त्री० ) ॥ ५५ ॥ कर्णिका ( पुष्पकी केसर ), तीन अक्षरोंका छंद, हाथकी मध्यम अंगुली, ( स्त्री० )
**विक्रम**—उद्यम, क्रान्ति, क्षमा, शक्ति, संपत्, ( पुं० ) ॥ ५६ ॥
**विद्रुम**—रत्नवृक्ष, मूंगा, नवीन पत्ता, ( पुं० )
**विभ्रम**—विलास, भ्रान्ति, हाव (स्त्रीकरणभेद ) ( पुं० ) ॥ ५७ ॥

"Aho Shrutgyanam"

**विलोमो** विपरीतेऽपि भुजङ्गेऽङ्गुलिरोमनि ।
**विलोमी** तु व्यवस्थायां **विलोम**मरघट्टके ॥ ५८ ॥
**व्यायामो** दुर्गसंचारे वियामे पौरुषे श्रमे ।
**सङ्क्रमः** सङ्क्रमणेऽस्त्री तु वारिसंचारयन्त्रके ॥ ५९ ॥
त्रिषूत्तमे पूज्यतमे साधीयसि च **सत्तमः** ।
**सम्भ्रम**स्त्वादरे पुंसि संवेगे साध्वसेऽपि च ॥ ६० ॥
**सुषमं** चारुसमयोस्त्रिषु स्यात्**सुषमा** द्युतौ ।
अतिद्युतौ च **सुषमा सुषीमः** पन्नगान्तरे ॥ ६१ ॥
**सुषीमं** शिशिरे क्लीबं चारुशीतलयोस्त्रिषु ।

मचतुर्थम् ।

सुन्दरेऽप्युपमाशून्ये भवे**दनुपमो**ऽन्यवत् ॥ ६२ ॥
गौरीनायकदिङ्नागयोषित्य**नुपमा** मता ।
**अभ्यागमो**ऽन्तिके घाते विरोधेऽप्युद्गमे युधि ॥ ६३ ॥

---

**विलोम**–विपरीत, सर्प, अंगुलियोंके रोम, ( पुं० )
**विलोमी**–व्यवस्था, ( स्त्री० )
**विलोम**–अरहट ( न० ) ॥ ५८ ॥
**व्यायाम**–दुर्गसंचार, संयम, पौरुष, परिश्रम, ( पुं० )
**संक्रम**–संक्रमण, ( पुं० ) जलमें संचारका यंत्र, ( पुं० न० )॥५९॥
**सत्तम**–उत्तम, पूज्यतम, अतिश्रेष्ठ, ( पुं० )
**सम्भ्रम**–आदर, संवेग, भय, (पुं०) ॥ ६० ॥
**सुषम**–सुंदर, सम ( तुल्य ), (त्रि०)
**सुषमा**–कान्ति, अतिकान्ति, (स्त्री०)
**सुषीम**–सर्पभेद, ( पुं० ) शिशिर, ( न० ) सुंदर, शीतल, ( त्रि० ) ॥ ६१ ॥

**मचतुर्थ ।**

**अनुपम**–सुंदर, उपमाशून्य, ( त्रि० ) ॥ ६२ ॥
**अनुपमा**–ईशान कोणके हाथीकी हथिनी, ( स्त्री० )
**अभ्यागम**–समीप, घात, विरोध, उद्गम, युद्ध, ( पुं० ) ॥ ६३ ॥

"Aho Shrutgyanam"

**उपक्रम**श्चिकित्सायामुपधाने च विक्रमे ।
भवे**दुपगमः** पार्श्वगमनेऽङ्गीकृतावपि ॥ ६४ ॥
**जलगुल्मो** जलावर्त्तजलचत्वरकच्छपे ।
**दण्डयाम**स्तु दिवसे कीनाशे कुम्भसम्भवे ॥ ६५ ॥
**पराक्रम**स्तु सामर्थ्ये विक्रमोद्योगयोरपि ।
**प्लवङ्गमः** कपौ भेके **महापद्मं** तु मानके ॥ ६६ ॥
**महापद्मः** पुमान्सङ्ख्यानिधिनागान्तरे मतः ।
**यातयामो** मतो जीर्णे परिभुक्तोज्झिते त्रिषु ॥ ६७ ॥
**सार्वभौम**स्तु दिग्नागभेदे सर्वमहीपतौ ।
**अभ्युपगमः** स्वीकारे समीपागमनेऽपि च ॥ ६८ ॥

इति विश्वलोचने मान्तवर्गः ॥

---

**उपक्रम**—चिकित्सा ( इलाज ), उपधा, विक्रम, ( पुं० )

**उपगम**—समीपआना, अंगीकार, ( पुं० ) ॥ ६४ ॥

**जलगुल्म**—जलका भँवर, जलचौक, कछुवा ( पुं० ) ।

**दण्डयाम**—दिन, धर्मराज, अगस्त्य मुनि, ( पुं० ) ॥ ६५ ॥

**पराक्रम**—सामर्थ्य, विक्रम, उद्योग, ( पुं० ) ।

**प्लवंगम**—बन्दर, मेंडक, ( पुं० )

**महापद्म**—प्रमाण, ( न० ) ॥ ६६ ॥

**महापद्म**—संख्याभेद, निधिभेद, नागभेद, ( पुं० )

**यातयाम**—जीर्ण, अच्छीतरह भोगाहुवा, त्यागाहुवा, ( त्रि० ) ॥६७॥

**सार्वभौम**—दिग्हस्तीभेद, संपूर्णपृथ्वीका राजा, ( पुं० )

**अभ्युपगम**—अंगीकार, समीपमें आना, ( पुं० ) ॥ ६८ ॥

इस प्रकार विश्वलोचनकी भाषामें मान्तवर्ग समाप्त हुवा ॥

"Aho Shrutgyanam"

## अथ यान्तवर्गः ।

यैकम् ।

**यो** वातयशसोः पुंसि **या** यानत्यागयातृषु ।

यद्वितीयम् ।

**अन्यो**ऽसमाने भिन्ने च स्याद**न्त्यो**ऽन्तभवेऽधमे ॥ १ ॥
**अर्थ्यो** बुधे त्रिषु न्याय्ये शिलाजतुनि न द्वयोः ।
अर्घार्थे यत्तद**र्घ्यं** स्यात्त्रिषु यश्चार्घमर्हति ॥ २ ॥
**अर्घ्यः** स्याद्योग्यमात्रेऽपि स्याद**र्यः** स्वामिवैश्ययोः ।
पुंस्या**र्यः** सौविदल्ले स्यादा**र्य**स्त्वभ्यर्हिते त्रिषु ॥ ३ ॥
**आस्या** स्थितौ मुखे **चास्यं** मुखमध्ये मुखोद्भवे ।
**इज्यो** गुरौ पुमा**निज्या** दानार्चासङ्गमेष्टिषु ॥ ४ ॥

---

**अथ यान्तवर्ग ।**

यैक ।

**य**–वायु, यश, ( पुं० )
**या**–यान ( सवारी ), त्याग, गमन करनेवाला, ( पुं० )

**यद्वितीय ।**

**अन्य**–असमान, भिन्न ( त्रि० )
**अन्त्य**–अन्तमें होनेवाला, अधम, ( त्रि० ) ॥ १ ॥
**अर्थ्य**–पंडित, ( पुं० ) न्याय्य (न्याययुक्त) ( त्रि० ) शिलाजीत ( न० )
**अर्घ्य**–जो अर्घके लिये द्रव्य है वह, जिसको अर्घ दियाजाय वह ( त्रि० ) ॥ २ ॥
**अर्घ्य**–योग्यमात्र, ( पुं० )
**अर्य**–स्वामी, वैश्य, ( पुं० )
**आर्य**–कंचुकी, ( रनवासका पहरेदार) ( पुं० ) पूज्य, ( त्रि० ) ॥ ३ ॥
**आस्या**–स्थिति, ( स्त्री० )
**आस्य**–मुख, मुखमध्य, मुखसे उत्पन्न, ( त्रि० )
**इज्य**–गुरु ( बृहस्पति ) ( पुं० )
**इज्या**–दान, अर्चा ( पूजा ), संगम, इष्टि ( यज्ञ ) ( स्त्री० ) ॥ ४ ॥

"Aho Shrutgyanam"

**इभ्य** आढ्यं भवेद्**इभ्या** करेण्वामपि शल्लकौ ।
**कन्या** कुमारिकानार्यो राशिभेदौषधीभिदोः ॥ ५ ॥
प्रातर्ह्योदिनयोः **कल्यं कल्यो** नीरोगदक्षयोः ।
सज्जेऽपि त्रिषु **कल्या** तु मद्ये **कल्या** च वाचि च ॥ ६ ॥
**कश्यं** मद्ये कशार्हे च **कश्यं** मध्ये च वाजिनाम् ।
**कक्ष्या** बृहतिकाकाञ्च्योर्मध्यबन्धे च दन्तिनाम् ॥ ७ ॥
हर्म्यादीनां प्रकोष्ठे तु **कांस्यं** स्यात्पानभाजने ।
तैजसद्रव्यभेदेपि वाद्यभेदेऽपि न द्वयोः ॥ ८ ॥
**कायो** वर्ष्म स्वभावे च सङ्घे लक्ष्ये कदैवते ।
**कायं** मनुष्यतीर्थे स्यात्**कार्यं** हेतौ प्रयोजने ॥ ९ ॥
**काव्यः** शुक्रग्रहे पुंसि **काव्या** स्यात्पूतनाधियोः ।
**काव्यं** ग्रन्थान्तरे क्लीबं **कुड्यं** भित्तौ विलेपने ॥ १० ॥

---

**इभ्य**–धनी ( पुं० )
**इभ्या**–हथिनी, शल्लकी ( सालई ) वृक्ष ( स्त्री० )
**कन्या**–कुमारी, स्त्रीमात्र, राशिभेद, औषधिभेद, ( स्त्री० ) ॥ ५ ॥
**कल्य**–प्रातःकाल, कलका दिन, (न०)
**कल्य**–नीरोग, चतुर, सज्ज (कवच) आदिसे सजाहुवा ( त्रि० )
**कल्या**–मदिरा, वाणी, ( स्त्री० ) ६
**कश्य**–मद्य ( मदिरा ), चाबुक लगाने योग्य, (त्रि०) घोड़ोंका मध्यभाग ( न० )
**कक्ष्या**–कटेहली, करधनी, हस्तियोंका मध्यबंध, ( नाडी ) ॥ ७ ॥
हर्म्य ( महल ) आदिकोंका प्रकोष्ठ ( कोठा ) ( स्त्री० )
**कांस्य**–जलआदि पीनेका पात्र, तैजस द्रव्यभेद, वाद्य ( बाजा ) भेद, ( न० ) ॥ ८ ॥
**काय**–शरीर, स्वभाव, समूह, निशाना क ( प्रजापति ) देवतावाला,(पुं०)
**कार्य**–हेतु, प्रयोजन ( न० ) ॥ ९ ॥
**कायं**–मनुष्यतीर्थ, ( न० )
**काव्य**–शुक्र–ग्रह, ( पुं० )
**काव्या**–पूतना, बुद्धि, ( स्त्री० )
**काव्य**–ग्रंथ,(न०)
**कुड्य**–दीवार, विलेपन ( लीपना ) ( न० ) ॥ १० ॥

"Aho Shrutgyanam"

**कुल्यो** मान्ये कुलोद्भूतकुलातिहितयोस्त्रिषु ।
कुल्यं स्यादामिषे शूर्पेप्यष्टद्रोण्यां च कीकसे ॥ ११ ॥
**कुल्या**ऽल्पकृत्रिमनदीनदीजीवासु निर्झरे ।
**कृत्या** क्रियादेवतयोस्त्रिषु भेद्ये धनादिभिः ॥ १२ ॥
विद्विष्टकार्ययोश्चायं **कृत्यास्**तव्यादिषु स्मृताः ।
**क्रिया** कर्म्मणि चेष्टायां करणे संप्रधारणे ॥ १३ ॥
उपायारम्भशिक्षार्चाचिकित्सानिष्कृतिष्वपि ।
**गव्यं** नपुंसकं ज्यायां गवां क्षीरादिकेऽपि च ॥ १४ ॥
रागद्रव्येऽपि **गव्या** तु गोकुले गोहिते त्रिषु ।
**गुह्यं** रहस्युपस्थे च **गुह्यो** दम्भेपि कच्छपे ॥ १५ ॥
**गृह्या** शाखापुरे **गृह्यस्**त्ववसक्तमृगपक्षिणोः ।
**गुह्यं** पुरीषमार्गेऽपि **गृह्यम**स्वैरिपक्षयोः ॥ १६ ॥

---

**कुल्य**–मान्य–पुरुष ( पुं० ) कुलमें उत्पन्नहुवा, कुलका अतिहित, (त्रि०)

**कुल्य**–मांस, छाज, अष्ट द्रोणी, अस्थि ( हाड ) ( न० ) ॥ ११ ॥

**कुल्या**–छोटी कृत्रिमनदी, नदी, जीवन्ती–औषधि, झिरना, (स्त्री०)

**कृत्या**–क्रिया, देवता, ( स्त्री० ) धन आदिकरके भेद्य, ॥ १२ ॥
शत्रु, कार्य, ( त्रि० )

**कृत्य**–तव्य आदि प्रत्यय, ( पुं० )

**क्रिया**–कर्म, चेष्टा, करण, संप्रधारण ( अच्छेप्रकार धारण ) ॥ १३ ॥
उपाय, आरंभ, शिक्षा, पूजा, चिकित्सा, निकालना, ( स्त्री० )

**गव्य**–धनुषकी ज्या, गौवोंका दूध दधि आदि ॥१४॥ रंगनेका द्रव्य, (न०)

**गव्या**–गोकुल, गोहित, ( त्रि० )

**गुह्य**–रहस्य ( गुप्तसलाह ), स्त्रीपुरुषका योनि और शिश्न, (न०) दंभ, कछुवा, ( पुं० ) ॥ १५ ॥

**गृह्या**–शाखानगर ( एकपुरमाहँसे बसाहुवा दूसरा नगर), ( स्त्री० )

**गृह्य**–घरमें हिलाहुवा मृग और पक्षी, ( पुं० ) गुद, ( न० ) रोकाहुवा, पक्षकरने योग्य, ( त्रि० ) ॥१६॥

"Aho Shrutgyanam"

**गेय**स्तु त्रिषु गातव्ये **गेयः** स्याद्गायने पुमान् ।
**गोप्यो** दास्या अपत्ये स्याद्रक्षणीयेऽपि वाच्यवत् ॥ १७ ॥

**ग्राम्यो** जने त्रिषु **ग्राम्यं** त्वश्लीलरतबन्धयोः ।
**चय**स्त्वाहरणे वृन्दे प्राकारे मूलबन्धने ॥ १८ ॥

**चव्यं** तु चविके यच्च **चव्या** दूर्वोग्रगन्धयोः ।
**चित्या** मृतचितायां स्याच्चित्यं मृतकचैत्यके ॥ १९ ॥

**चैत्य**मायतने क्लीबं स्याच्चिताचूडकेऽपि च ।
बुद्धबिम्बे पुमांश्चैत्यश्चैत्यं उद्देश्यपादपे ॥ २० ॥
**चोद्यं** प्रश्नेऽद्भुते **चोद्यं** वाच्यवच्चोदनोचिते ।
**छाया** स्यादातपाभावे सत्कान्त्युत्कोचकान्तिषु ॥ २१ ॥
प्रतिबिम्बेऽर्ककान्तायां तथा पङ्क्तौ च पालने ।
**जन्य**स्ताते वरवधूज्ञातिभृत्यप्रियेहिते ॥ २२ ॥

---

**गेय**—गानेके योग्य, ( त्रि० ) गायन ( पुं० )

**गोप्य**—दासीकी संतान, रक्षाकरने योग्य, ( त्रि० ) ॥ १७ ॥

**ग्राम्य**—ग्राममें होनेवाला जन, (त्रि०) अश्लील, रतबंध, ( न० )

**चय**—इकट्ठाकरना, समूह, किला, जड़का बांधना, ( पुं० ) ॥ १८ ॥

**चव्य**—चव्य, ( न० )

**चव्या**—दूब, अजमोद, ( स्त्री० )

**चित्या**—मृतककी चिता, ( स्त्री० )

**चित्य**—मृतकका चौतरा, ( न० ) ॥ १९ ॥

**चैत्य**—यज्ञस्थान, चिताका चिह्न, (न०) बुद्धदेवकी मूर्ति, उद्देश्य(प्रसिद्ध)वृक्ष (जिन-सभाका वृक्ष) (पुं०) ॥२०॥

**चोद्य**—प्रश्न, अद्भुत ( न० ) प्रेरणाके योग्य, ( त्रि० )

**छाया**—धूपका अभाव, अच्छी कान्ति, खिलना, शोभा, ॥ २१ ॥ प्रतिबिंब, सूर्यकी स्त्री, पंक्ति, पालनकरना, ( स्त्री० )

**जन्य**—पिता, वरवधू, ज्ञाति, भृत्य, प्रिय, हित ( हितू ) ॥ २२ ॥

"Aho Shrutgyanam"

**जन्यस्तु** जननीये स्यात्रिषु **जन्यं** तु संयुगे ।
परीवादेऽपि हट्टेऽपि **जन्या** मातृसखीमुदोः ॥ २३ ॥
**जन्युः** प्राणिनि वह्नौ च **जन्युः** स्यात्परमेष्ठिनि ।
**जयो** जयन्ते विजये **जया** तिथ्यन्तरोमयोः ॥ २४ ॥
उमासखीजयन्त्योश्च पथ्यायामग्निमन्थके ।
**जात्यं** कुलीने श्रेष्ठेऽपि **तार्क्ष्यो**ऽनूरुसुपर्णयोः ॥ २५ ॥
रथेऽश्वे चाश्वकर्णद्रौ मतं **तार्क्ष्यं** रसाञ्जने ।
**तिष्यः** पुष्ये कलौ **तिष्या** धात्र्यां **तिष्यैव पुष्य**वत् ॥ २६ ॥
**त्रयी** त्रिवेद्यां त्रितये पुरन्ध्र्यां सुमतावपि ।
**दस्यु**र्विद्विषि चौरे च **दायः** सोल्लुण्ठभाषिते ॥ २७ ॥
यौतकादिधने दाने भागार्हपितृवस्तुनि ।
**दिव्यं** तु शपथे बाले लवङ्गकुसुमेऽपि च ॥ २८ ॥

---

जननेके योग्य, ( त्रि० )
**जन्य**—युद्ध, परिवाद, हाट, ( न० )
**जन्या**—माताकी सखी, आनंद (स्त्री०) ॥ २३ ॥
**जन्यु**—प्राणी, अग्नि, ब्रह्मा, ( पुं० )
**जय**—जयन्त ( इंद्रपुत्र ), विजय ( जीतना ) ( पुं० )
**जया**—तिथिभेद, पार्वती, ॥ २४ ॥ पार्वतीकी सखी, जयंती या अगेथु पुष्पवृक्ष, हरड, अरड्डूँ, ( स्त्री० )
**जात्य**—कुलीन, श्रेष्ठ, ( त्रि० )
**तार्क्ष्य**—अरुण, गरुड, ॥ २५ ॥ रथ, अश्व, साल—वृक्षभेद, (पुं०)
**तार्क्ष्य**—रसोत—औषधि ( न० )
**तिष्य-पुष्य**—पुष्य—नक्षत्र, कलि युग, ( पुं० )
**तिष्या**—आँवला, ( स्त्री० ) ॥ २६ ॥
**त्रयी**—त्रिवेदी ( तीनवेद ), तीन अवयवोंवाला, पतिपुत्रवाली स्त्री, श्रेष्ठ—बुद्धि, ( स्त्री० )
**दस्यु**—शत्रु, चोर, ( पुं० )
**दाय**—हास्य सहित भाषण ॥ २७ ॥ वरवधूको देनेका द्रव्य, दान, भागकरने योग्य पिताकी वस्तु, (पुं०)
**दिव्य**—सौगन, बालक, लौंग, पुष्प, ( न० ) ॥ २८ ॥



"Aho Shrutgyanam"

**दिव्या**ऽऽमलक्यां **दिव्यं** तु वल्गौ दिविभवेऽन्यवत् ।
**दूष्यं** वस्त्रगृहे वस्त्रे दूषणीये तु वाच्यवत् ॥ २९ ॥
**दैत्या** सुरामुराचण्डौषधीषु दितिजे पुमान् ।
**द्रव्यं** तु पित्तले वित्ते द्रुविकारे जतुन्यपि ॥ ३० ॥
भेषजे च पृथिव्यादौ त्रिषु भव्यविलेपयोः ।
**धन्या** धात्र्यामलक्योः स्याद्धन्यः पुण्यवति त्रिषु ॥ ३१ ॥
**धान्यं** व्रीहिषु धान्याके **धिष्ण्यः** स्यादनले पुमान् ।
**धिष्ण्यं** सद्मनि नक्षत्रे स्थाने शक्तौ च न द्वयोः ॥ ३२ ॥
**नयो** द्यूतान्तरे नीतौ व्यञ्जके त्वभिपूर्वकः ।
**नाट्यं** तौर्यत्रिके लास्ये **नित्यं** तु सतते ध्रुवे ॥ ३३ ॥
हरीतक्यां मता **पथ्या** मतं **पथ्यं** हिते त्रिषु ।
**पद्यः** शूद्रे पुमान्पद्यं श्लोके **पद्या** तु वर्त्मनि ॥ ३४ ॥

---

**दिव्या**–आँवला, ( स्त्री० )
**दिव्य**–सुंदर, आकाश या स्वर्गमें होनेवाला, ( त्रि० )
**दूष्य**–वस्त्रका घर ( तंबूडेरा ), वस्त्र, (न०) दूषणीय (निंदनीय) (त्रि०) ॥ २९ ॥
**दैत्या**–मदिरा, कपूरकचरी, चोर नामक गंध–द्रव्य, ( स्त्री० )
**दैत्य**–दितिके पुत्र, ( असुर ) (पुं०)
**द्रव्य**–पीतल, धन, वृक्षविकार, लाख, ॥ ३० ॥ औषधि, पृथिवी आदि, कल्याण, विलेप, ( त्रि० )
**धन्या**–धाय ( बच्चोंको दूध पिलाने-वाली ), आँवला, ( स्त्री० )
**धन्य**–पुण्यवान, ( त्रि० ) ॥ ३१ ॥
**धान्य**–व्रीहि (धान), धनियाँ, (न०)
**धिष्ण्य**–अग्नि, ( पुं० ) मकान, नक्षत्र, स्थान, शक्ति, ( न० ) ॥ ३२ ॥
**नय**–द्यूतभेद, नीति, (पुं०)
**अभिनय**–हाथ आदिके इशारेसे बा-तका समझाना, ( पुं० )
**नाट्य**–नाचना-गाना-बजाना, नाचना, ( न० )
**नित्य**–निरंतर, ध्रुव ( स्थिर ) ( न० ) ॥ ३३ ॥
**पथ्या**–हरड, ( स्त्री० )
**पथ्य**–हित भोजनादि, ( त्रि० )
**पद्य**–शूद्र, ( पुं० ) श्लोक ( न० )
**पद्या**–मार्ग ( स्त्री० ) ॥ ३४ ॥

"Aho Shrutgyanam"

नपुंसकं तु **पाक्यं** स्याद्यवक्षारे बिडाह्वये ।
**पाद्यं** पयसि निन्द्ये च **पीयुः** कालार्कपेचके ॥ ३५ ॥
**पुण्यं** तु सुकृते धर्मे त्रिषु मध्यमनोज्ञयोः ।
श्वशुरे पुंसि **पूज्यः** स्यात्**पूज्यो** वन्द्योऽभिधेयवत् ॥ ३६ ॥
**पेयं** पातव्यपयसोः **पेया** श्राणाच्छमण्डयोः ।
**प्रायः** पुमाननशने मृत्युबाहुल्ययोस्तथा ॥ ३७ ॥
**प्रियस्तु** त्रिषु हृद्ये स्याद्धवे वृद्ध्यौषधे पुमान् ।
**वन्यं** त्रिषु वनोद्भूते **वन्या** वृन्दे वनाम्भसोः ॥ ३८ ॥
अप्रजातस्त्रियां **वन्ध्या वन्ध्यस्त्रिषु** हलिद्रुमे ।
**वल्यं** प्रधानधातौ **स्याद्वल्यं** बलकरे त्रिषु ॥ ३९ ॥
वरेण्ये वाच्यव**द्वर्यो वर्यः** पञ्चशरे पुमान् ।
**विन्ध्या** त्रुटौ लवल्यां च **विन्ध्यो** व्याधाद्रिभेदयोः ॥ ४० ॥

---

**पाक्य**—जवाखार, बिड-नमक, (न०)
**पाद्य**—जल, निंद्य, ( न० )
**पीयु**—काल, सूर्य, उल्लू, (पुं०) ॥३५॥
**पुण्य**—सुकृत ( अच्छा कर्म करना ), धर्म, ( न० ) मध्य, सुंदर, (त्रि०)
**पूज्य**—ससुर ( पुं० ) वंदनाके योग्य, ( त्रि० ) ॥ ३६ ॥
**पेय**—पीनेके योग्य, दुग्ध, ( न० )
**पेया**—पकायाहुवा पतला अन्न, स्वच्छ-माँड, ( स्त्री० )
**प्रायः**—अन्नजलका त्यागना, मृत्यु, बाहुल्य ( जियादहपना ) ( पुं० ) ॥ ३७ ॥
**प्रिय**—मनोरम, ( त्रि० ) पति, वृद्धि-नामक औषधि, ( पुं० )
**वन्य**—वनमें उत्पन्न होनेवाला, (त्रि०)
**वन्या**—वनका और जलका समूह ( स्त्री० ) ॥ ३८ ॥
**बन्ध्या**—अप्रसूता स्त्री, ( स्त्री० )
**बन्ध्य** कलिहारी—वृक्ष ( पुं० )
**बल्य**—प्रधान–धातु ( वीर्य ) ( न० ) बल करनेवाला ( त्रि० ) ॥ ३९ ॥
**वर्य**—श्रेष्ठ, ( त्रि० ) कामदेव, (पुं०)
**विन्ध्या**—छोटी–इलायची, हरफा रेवडी, ( स्त्री० )
**विन्ध्य**—व्याध, पर्वत-भेद, ( पुं० ) ॥ ४० ॥

"Aho Shrutgyanam"

**वीर्यं** प्रभावे शुक्रे च तेजःसामर्थ्ययोरपि ।
**वेश्या** तु गणिकायां स्याद् **वेश्यं** वेश्यानिकेतने ॥ ४१ ॥
**भयं** घोरे प्रतिभये प्रसूने कुब्जवीरुधः ।
कर्म्मरङ्गतरौ **भव्यो भव्या** करिकणोमयोः ॥ ४२ ॥
**भाग्यं** शुभात्मकविधौ स्याच्छुभाशुभकर्म्मणि ।
**भृत्यो** दासे भृतौ **भृत्या मत्स्यो** मीने जनान्तरे ॥ ४३ ॥
विष्णोर्मूर्त्यन्तरे **मत्स्यो** विराटाख्ये च यादवे ।
**मध्यं** न्याय्येऽवकाशे च **मध्यं** मध्यस्थिते त्रिषु ॥ ४४ ॥
लग्नकेऽप्यधमे **मध्यम**स्त्रियामवलग्नके ।
**मन्युर्दै**न्ये क्रतौ क्रोधे वासवे तु शतात्परः ४५ ॥
**मयः** शिल्पिनि दैत्यानां करभेऽश्वतरे **मयः** ।
**मयुर्मृ**गे किंपुरुषे **मायः** पीताम्बरेऽसुरे ॥ ४६ ॥

---

**वीर्य**—प्रभाव, शुक्र ( वीर्य ), तेज, सामर्थ्य, ( न० )
**वेश्या**—गणिका, ( स्त्री० )
**वेश्य**—वेश्याका घर, ( न० ) ॥४१॥
**भय**—भयानक, ( त्रि० ) भय, कूजा बेलका पुष्प, ( न० )
**भव्य**—कमरख—वृक्ष, ( पुं० )
**भव्या**—गजपीपल, पार्वती, ( स्त्री० ) ॥ ४२ ॥
**भाग्य**—शुभात्मक विधि ( भाग्य ), शुभअशुभ कर्म, ( न० )
**भृत्य**—दास (नौकर) ( पुं० )
**भृत्या**—नौकरी, ( स्त्री० )
**मत्स्य**—मछली, जनभेद, ॥ ४३ ॥ विष्णुका अवतार, विराट—देश, यादव, ( पुं० )
**मध्य**—न्याय्य ( युक्त ), अवकाश, ( न० ) मध्यमें स्थित ॥ ४४ ॥ जामिन, अधम, ( त्रि० ) शरीरका मध्यभाग, ( पुं० न० )
**मन्यु**—दीनता, यज्ञ, क्रोध, **शतमन्यु**-इंद्र, ( पुं० ) ॥ ४५ ॥
**मय**—दैत्योंका कारीगर, ऊँट, खिचर, ( पुं० )
**मयु**—मृग, किन्नर, ( पुं० )
**माय**—पीतांबर, असुर, (पुं०) ॥४६॥

"Aho Shrutgyanam"

**माया** दम्भे कृपायां च स्यान्**माया** शाम्बरीधियोः ।
**माल्यं** पुष्पेऽपि मालायां **मूल्यं** वेतनवस्नयोः ॥ ४७ ॥
**मृत्युः** स्यान्मरणे दैवे **मेध्यं** पूतेऽपि मेदुरे ।
**मेध्या** रक्तवचायां च रोचनायामपि स्त्रियाम् ॥ ४८ ॥
क्लीबं स्यादाश्रमे **मेध्यं** **ययुः** क्रतुहये हये ।
**याम्या**ऽपाच्यां भरण्यां च **याम्यो**ऽगस्त्येऽपि चन्दने ॥ ४९ ॥
**योग्यः** प्रवीणयोगार्हशक्तोपायिषु वाच्यवत् ।
**योग्या**ऽभ्यासेऽर्ककान्तायां **योग्यमृद्ध्**याख्यभेषजे ॥ ५० ॥
**रथ्या** तु विशिखायां स्याद्रथौघे पथि चत्वरे ।
मतो रथोद्वहे **रथ्यो** **रथ्यं** त्रिषु मनोरमे ॥ ५१ ॥
**रम्या** विभावरी **रम्यः** पुंसि चम्पकपादपे ।
**रूप्यं** स्यादाहतस्वर्णरजते रजते तथा ॥ ५२ ॥

---

**माया**–दंभ, कृपा, बाजीगरकी विद्या, बुद्धि, ( स्त्री० )
**माल्य**–पुष्प, पुष्पमाला, ( न० )
**मूल्य**–नौकरी, वस्तुका मोल (कीमत) ( न० ) ॥ ४७ ॥
**मृत्यु**–मरना, धर्मराज, ( पुं० )
**मेध्य**–पवित्र, सघन सचिक्कण, (त्रि०)
**मेध्या**–रक्तबच, गोरोचन, ( स्त्री० ) ॥ ४८ ॥
**मेध्य**–आश्रम ( न० )
**ययु**–यज्ञके लिये अश्व, अश्व–मात्र, ( पुं० )
**याम्या**–दक्षिण दिशा, भरणी-नक्षत्र, ( स्त्री० )
**याम्य**–अगस्त्य-मुनि, चन्दन (पुं०) ॥ ४९ ॥
**योग्य**–प्रवीण (चतुर), योगके योग्य, समर्थ, उपायवाला ( त्रि० )
**योग्या**–अभ्यास, सूर्यकी स्त्री, (स्त्री०)
**योग्य** ऋद्धि–औषध (न०) ॥ ५० ॥
**रथ्या**–गली, रथोंका समूह, मार्ग, घरका आँगन, ( स्त्री० )
**रथ्य**–रथको बहनेवाला अश्व आदि ( पुं० )
**रम्य**–सुंदर, (त्रि० ) ॥ ५१ ॥
**रम्या**–रात्रि, ( स्त्री० )
**रम्य**–चंपाका वृक्ष, ( पुं० )
**रूप्य**–घड़ाहुवा ( सिका ) सुवर्ण या रजत ( चाँदी ) का, चांदी–मात्र, ( न० ) ॥ ५२ ॥

"Aho Shrutgyanam"

त्रिषु प्रशस्तरूपेऽपि **लभ्यं** लब्धव्यमुक्तयोः ।
**लयो** नृत्यादिसाम्ये स्याद्विनाशाश्लेषयोर्लयः ॥ ५३ ॥
सङ्ख्याशरव्ययोर्लक्ष्यं **लक्ष्यं** स्याच्छद्मनि स्मृतः ।
अथ तौर्यत्रिके **लास्यं लास्यं** स्त्रीनृत्यनृत्ययोः ॥ ५४ ॥
**वाच्यं** दोषेऽपि वक्तव्ये वचोर्हे कुत्सितेऽन्यवत् ।
वीक्ष्योऽविलासके **वीक्ष्यो** द्रष्टव्याद्भुतयोस्त्रिषु ॥ ५५ ॥
वर्गप्रस्थानयोर्व्रज्या **व्रज्या** पर्यटनेऽपि च ।
**शयः** शय्याहिहस्तेषु **शय्या** तु शयनीयके ॥ ५६ ॥
शब्दगुम्फेऽपि **शल्यस्तु** श्वाविन्मदनवृक्षयोः ।
**शल्यं** शङ्कौ शरे वंशकर्णिकायां च तोमरे ॥ ५७ ॥
**शुन्या** तु नलिकायां स्याच्छून्यं तु त्रिषु निर्जने ।
मतं **शौर्यं** तु शूरत्वे चारभट्यां च तन्मतम् ॥ ५८ ॥

---

श्रेष्ठरूपवाला, ( त्रि० )
**लभ्य**–लब्ध होनेके योग्य, युक्त, ( त्रि० )
**लय**–नृत्य आदिकी समता, विनाश, मिलना, ( पुं० ) ॥ ५३ ॥
**लक्ष्य**–संख्याभेद, निशाना, मिस ( बहाना ) ( न० )
**लास्य**–नाचना–गाना-बजाना, ये मिले हुए तीनों, स्त्री–नृत्य, नृत्य, (न०) ॥ ५४ ॥
**वाच्य**–दोष, कहनेयोग्य, वचनके योग्य, कुत्सित, ( त्रि० )
**वीक्ष्य**–अश्व, नाचनेवाला, ( पुं० ) देखने योग्य, अद्भुत, (त्रि०) ॥५५॥
**व्रज्या**–वर्ग, प्रस्थान, घूमना, (स्त्री०)
**शय**–शय्या, सर्प, हाथ, ( पुं० )
**शय्या**–पलंग, शब्द-गुंफ ( रचना ) ( स्त्री० ) ॥ ५६ ॥
**शल्य**–सेह, मैनफल–वृक्ष, ( पुं० )
**शल्य**–शंकु ( कीला ), शर, वंशकर्णिका, तोमर–शस्त्र, ( न० ) ॥ ५७ ॥
**शून्या**–बाँस आदिकी नली, ( स्त्री० )
**शून्य**–निर्जनस्थानादि, ( त्रि० )
**शौर्य**–शूरता, निडरपना, ( न० ) ॥ ५८ ।

"Aho Shrutgyanam"

**सङ्ख्यं** तु सङ्गरे क्लीबं **सङ्ख्यै**कत्वादिचर्चयोः ।
तपोलोकात्परे **सत्यं सत्यं** सत्यप्रगर्त्तयोः ॥ ५९ ॥
दिव्येपि **सत्या** पामायां **सत्यं** तु त्रिषु तद्वति ।
**सन्ध्या** साये सरिद्भेदे सन्धाने कुसुमान्तरे ॥ ६० ॥
प्रतिज्ञायां च चिंतायां मर्यादायामपि स्त्रियाम् ।
वामदक्षिणयोः **सव्यं सह्यं** शस्त्रकले गुणे ॥ ६१ ॥
**सह्यः** शैलेऽपि सोढव्ये नैरुज्ये **सह्य**मद्वयोः ।
**साध्यस्तु** योगभेदे स्या**त्साध्यो**ऽपि गणदैवते ॥ ६२ ॥
वाच्यवत्साधनीयेऽपि **सायः** काण्डाऽपराह्णयोः ।
**सूर्यो**ऽर्के तत्प्रियायां तु **सूर्या** स्यादोषधीभिदि ॥ ६३ ॥
**सेव्यं** त्रिलिङ्गं सेवार्हे **सेव्यं** तु नलदे द्वयोः ।
सेनायां समवेते तु **सैन्यः सैन्यं** बले मतम् ॥ ६४ ॥

---

**संख्य**–युद्ध, ( न० )
**संख्या**–एक आदि–गिन्ती, विचार, ( स्त्री० )
**सत्य**–तप लोकसे ऊपर लोक, सत्य, प्रगर्त्त ( गहरा खड्डा ) ( न० ) ॥ ५९ ॥ सौगन, ( न० ) पाम ( स्त्री० ) सत्यवाला ( त्रि० )
**सन्ध्या**–सायंकाल, नदीभेद, स्मरण, पुष्पभेद, ॥ ६० ॥
प्रतिज्ञा, चिंता, मर्यादा, ( स्त्री० )
**सव्य**–वाम ( बामा ) अंग, दक्षिण ( दहना ) अंग, ( न० )
**सह्य**–शस्त्रकी कलावाली रज्जु (रस्सी) ( न० ) ॥ ६१ ॥
एक पर्वत, ( पुं० ) सहनेके योग्य, ( त्रि० ) नीरोगता ( न० )
**साध्य**–योगभेद, गणदेवता, ( पुं० ) ॥ ६२ ॥ साधनेके योग्य ( त्रि० )
**साय**–बाण, अपराह्ण काल ( दिनका तृतीय प्रहर ) ( पुं० )
**सूर्य**–सूर्य, ( पुं० )
**सूर्या**–सूर्यकी स्त्री, औषधिभेद, ( स्त्री० ) ॥ ६३ ॥
**सेव्य**–सेवाके योग्य, ( त्रि० )
**सेव्य**–खस, ( पुं० स्त्री० )
**सैन्य**–सेना, सैनिक, ( पुं० )
**सैन्य**–बल ( न० ) ॥ ६४ ॥

"Aho Shrutgyanam"

इल्वलासु स्त्रियः **सौम्या** बुधे **सौम्यो**ऽथ वाच्यवत् ।
बौद्धे मनोरमेऽनुग्रे पामरे सोमदैवते ॥ ६५ ॥
विवादपक्षनिर्णेतर्यपि **स्थेयः** पुरोहिते ।
**स्थेयं** स्याद्द्रव्यमात्रेऽपि पुंसि गर्वेऽद्भुते **स्मयः** ॥ ६६ ॥
**हार्यो** बिभीतकीवृक्षे हर्त्तव्ये **हार्य**मन्यवत् ।
**हृद्य**स्तु वशकृद्वेदमन्त्रे वृद्धयाख्यभेषजे ॥ ६७ ॥
स्याच्छ्वेतजीरके **हृद्यं** हृत्प्रिये हृद्भवे त्रिषु ।
**क्षयो**ऽपचयकल्पान्तनिवासेषु रुगन्तरे ॥ ६८ ॥

यतृतीयम् ।

**अत्ययो** दूषणे कृच्छ्रेऽतिक्रमे नाशदण्डयोः ।
**अधृष्य**स्तु प्रगल्भे स्या**दधृष्या** सरिदन्तरे ॥ ६९ ॥
**अनयो** व्यसनानीतिदैवाशुभविपत्तिषु ।
**अपत्यं** पुत्रयोः क्लीब**मभयो** निर्भये त्रिषु ॥ ७० ॥

---

**सौम्या**–इल्वला ( मृगशिरके ऊपरकी पांच तारा ) ( स्त्री० )
**सौम्य**–बुध, ( पुं० ) बौद्ध ( बुद्धशास्त्र ) सुंदर, नाम्र, पामर, सोमहै देवता जिसका वह (त्रि०) ॥६५॥
**स्थेय**–विवादपक्षका निर्णेता, पुरोहित, ( पुं० ) द्रव्यमात्र, ( त्रि० )
**स्मय**–गर्व, अद्भुत, ( पुं० ) ॥ ६६ ॥
**हार्य**–बहेडाका–वृक्ष, ( पुं० ) हडने योग्य, ( त्रि० )
**हृद्य**–वशमें करनेवाला वेदमंत्र, (पुं०)
**हृद्या**–वृद्धिनामक औषधि, ( स्त्री० ) ॥ ६७ ॥
**हृद्य**–सफेद जीरा, ( न० ) हृदयको प्रिय, हृदयमें प्राप्त ( त्रि० )
**क्षय**–कमहोना, कल्पका अन्त, निवास, रोगभेद ( पुं० ) ॥ ६८ ॥

**यतृतीय।**

**अत्यय**–दूषण, कृच्छ्र ( कष्ट ), उल्लंघन, नाश, दंड ( पुं० )
**अधृष्य**–प्रगल्भ ( धृष्ट ) ( त्रि० )
**अधृष्या**–नदीभेद, (स्त्री०) ॥ ६९ ॥
**अनय**–व्यसन ( फिराक ), अनीति, दैव, अशुभ, विपत्ति, ( पुं० )
**अपत्य**–पुत्री, पुत्र, ( न० )
**अभय**–निर्भय, ( त्रि० ) ॥ ७० ॥

"Aho Shrutgyanam"

मताऽ**भया** तु पथ्यायाम**भयं** स्यादुशीरके ।
**अभिख्या** तु यशःकीर्त्तिशोभाविख्यातिनामसु ॥ ७१ ॥
त्रिष्व**वध्यं** वधानर्हे क्लीबेऽनर्थकभाषिते ।
स्याद**वन्ध्यं** तु सफले त्रिषु त्रिष्वफलेग्रहौ ॥ ७२ ॥
**अश्वीय**मश्वसङ्घातेऽ**श्वीय**मश्वहिते त्रिषु ।
**अहल्या**प्सरसोभेदे तथा गौतमयोषिति ॥ ७३ ॥
**अहार्यः** पर्वते पुंसि स्याद**हार्यः** स्थिरे त्रिषु ।
**आतिथ्य**मातिथेयेस्याद**ातिथ्य**स्त्वतिथौ पुमान् ॥ ७४ ॥
**आत्रेयी** पुष्पवत्यां स्याद**ात्रेयी** निम्नगान्तरे ।
**आत्रेय**स्तु मुनेर्भेदे स्याद**ादित्यः** सुरे रवौ ॥ ७५ ॥
**आम्नाय** उपदेशेपि स्याद**ाम्नायः** श्रुतावपि ।
**आशयः** स्यादभिप्रायेऽप्याधारे पनसे धने ॥ ७६ ॥

---

**अभया**–हरड, ( स्त्री० )
**अभय**–खस, ( न० )
**अभिख्या**–यश, कीर्ति, शोभा, विख्याति, नाम, ( स्त्री० ) ॥७१॥
**अवध्य**–वधके अयोग्य, ( त्रि० ) अनर्थक भाषण, ( न० )
**अवन्ध्य**–सफल, ( त्रि० ) कालके अनुकूल फलोंको धारण करनेवाला वृक्ष, ( त्रि० ) ॥ ७२ ॥
**अश्वीय**–अश्वोंका समूह, ( न० ) अश्वोंका हित, ( त्रि० )
**अहल्या**–अप्सराभेद, गौतमऋषिकी स्त्री, ( स्त्री० ) ॥ ७३ ॥
**अहार्य**–पर्वत, ( पुं० ) स्थिर,(त्रि०)
**आतिथ्य**–जो वस्तु अतिथिके लिये हो वह, ( त्रि० ) अतिथि (पुं०) ॥ ७४ ॥
**आत्रेयी**–रजस्वला, नदीभेद, (स्त्री०)
**आत्रेय**–मुनिभेद ( पुं० )
**आदित्य**–देवता, सूर्य, (पुं०) ॥७५॥
**आम्नाय**–उपदेश, वेद, ( पुं० )
**आशय**–अभिप्राय, आधार, पनस–वृक्ष, धन ॥ ७६ ॥

"Aho Shrutgyanam"

कोष्ठागारेऽप्यजीर्णेऽपि किंपचानेऽपि **चाशयः** ।
**इन्द्रियं** रेतसि क्लीबमि**न्द्रियं** विषयीन्द्रिये ॥ ७७ ॥
पुंसि स्या**दुदयः** पूर्वपर्वतेऽपि समुन्नतौ ।
**उपायः** सामभेदादावु**पायः** स्यादुपागतौ ॥ ७८ ॥
**ऊर्णायु**रेडके मेषकम्बलक्षणभङ्गयोः ।
**एणेय**मेण्याश्चर्माद्ये रतबन्धान्तरे स्त्रियाः ॥ ७९ ॥
**औचित्य**मुचितत्वे स्या**दौचित्यं** सत्ययोग्ययोः ।
अस्त्री **कषायो** निर्यासे रसे रक्ते विलेपने ॥ ८० ॥
अङ्गरागे सुगन्धे तु त्रिषु स्याल्लोहितेऽपि च ।
**कालेयो** दैत्यभेदे स्यात्**कालेयं** कालखण्डकम् ॥ ८१ ॥
**कुलायो** नीडवत्पक्षिनिलयस्थानयोः पुमान् ।
**कौकृत्य**मनुतापे स्यादयुक्तकरणेऽपि च ॥ ८२ ॥

---

कोष्ठागार (शरीरके भीतरकी पोल, अजीर्ण, धनलोभी, ( पुं० )

**इंद्रिय**–वीर्य, विषयि ( चक्षुआदि ) इंदिय, ( न० ) ॥ ७७ ॥

**उदय**–पूर्वपर्वत, समुन्नति (ऊँचापना) ( पुं० )

**उपाय**–साम भेद आदि, समीपमें आना, ( पुं० ) ॥ ७८ ॥

**ऊर्णायु**–भेड, भेडीके ऊनका कंबल, क्षणभंग ( मकड़ी ) ( पुं० )

**एणेय**–मृगीका चर्म आदि, स्त्रीका रतबंध, ( न० ) ॥ ७९ ॥

**औचित्य**–उचितपना, सत्य, योग्य, ( न० )

**कषाय**–काढा, रस, रक्त, विलेपन, ( पुं० ) ॥ ८० अंगराग, सुगंध, लोहित, ( त्रि० )

**कालेय**–दैत्यभेद, ( पुं० ) कालखंड, ( न० ) ॥ ८१ ॥

**कुलाय ( नीड )**–पक्षीका घूँसला, स्थान, ( पुं० )

**कौकृत्य**–पश्चात्ताप, अयुक्त करना, ( न० ) ॥ ८२ ॥

"Aho Shrutgyanam"

**गाङ्गेयस्तु** महासेने भीष्मे गङ्गाभवे त्रिषु ।
**चक्षुष्यः** केतके पुण्डरीकवृक्षे रसाञ्जने ॥ ८३ ॥
अस्त्री स्त्री तु कुलथ्यां स्यादयुक्तकरणेऽपि च ।
**गाङ्गेयं** मुस्तकस्वर्णकसेरुषु नपुंसकम् ॥ ८४ ॥
**गाङ्गेयस्तु** महासेने भीष्मे गङ्गोद्भवे त्रिषु ।
**चक्षुष्यः** केतके पुंसि शुभगेऽक्षिहिते त्रिषु ॥ ८५ ॥
**चाम्पेयश्चम्पके** नागकेसरे पुष्पकेसरे ।
स्वर्णे क्लीबं **जघन्यं** तु निन्द्ये चरमशिश्नयोः ॥ ८६ ॥
**जटायुः** पक्षिभेदे स्यात्पुंसि गुग्गुलपादपे ।
**तपस्या** व्रतचर्यायां **तपस्यः** फाल्गुने पुमान् ॥ ८७ ॥
**देवयुर्द्धार्मिके** देवयात्रिकेऽप्यभिधेयवत् ।
**द्वितीया** तिथिभित्पत्न्योः पूरणेऽपि द्वयोस्त्रिषु ॥ ८८ ॥

---

**गांगेय**–स्वामिकार्त्तिक, भीष्म, (पुं०) गंगासे होनेवाला, ( त्रि० )

**चक्षुष्य**–केतकी ( पुष्पवृक्ष ), दौना पुष्पवृक्ष, कमल-वृक्ष, रसोत,॥८३॥ (पुं० न० ) कुलथी, ( स्त्री० ) अलग करना ( न० )

**गांगेय**–नागरमोथा, सुवर्ण, कसेरु-कंद, ( न० ) ॥ ८४ ॥

**गांगेय**–स्वामिकार्त्तिक, भीष्म, (पुं०) गंगामें होनेवाला ( त्रि० )

**चक्षुष्य**–केतक ( केतक ) ( पुं० ) अच्छे भाग्यवाला, नेत्रोंका हित-कारी ( त्रि० ) ॥ ८५ ॥

**चांपेय**–चंपा, नागकेर, पुष्पकेसर, ( पुं० ) सुवर्ण, ( न० )

**जघन्य**–निंद्य, पिछला, शिश्न (लिंग) ( न० ) ॥ ८६ ॥

**जटायु**–पक्षिभेद, गूगल–वृक्ष, (पुं०)

**तपस्या**–व्रतचर्या, ( स्त्री० )

**तपस्य**–फाल्गुन–मास, (पुं०) ॥८७॥

**देवयु**–धर्मात्मा, देवयात्रिक, ( त्रि०)

**द्वितीया**–तिथिभेद, पत्नी ( स्त्री० ) दोयोंको पूरण करनेवाला, ( त्रि० ) ॥ ८८ ॥

"Aho Shrutgyanam"

**नादेयी** नीरवानीरे भूजम्बूनागरङ्गयोः ।
जपाजयन्त्योर्व्यङ्गुष्ठे **निकाय**स्त्वात्मवेश्मनोः ॥ ८९ ॥

सधर्मिनिवहे लक्ष्ये संहतानां च मेलके ।
रङ्गभूमौ तु **नेपथ्यं नेपथ्यं** च प्रसाधने ॥ ९० ॥

**पयस्या** क्षीरकाकोल्यां स्वर्णक्षीर्यामपि स्मृता ।
**पयस्या** दुग्धिकायां च पयोहितभवेऽन्यवत् ॥ ९१ ॥

**पर्जन्यो** वासवे मेघध्वनौ च ध्वनदम्बुदे ।
**पर्यायः** क्रमनिर्वाणप्रकारावसरे पुमान् ॥ ९२ ॥

पेयवारिणि **पानीयं पारुष्य**स्तु बृहस्पतौ ।
**पारुष्यं** परुषत्वे स्यादपि शक्रस्य कानने ॥ ९३ ॥

**पौलस्त्यः** किन्नराधीशे **पौलस्त्यो** दशकन्धरे ।
**प्रकीर्यः** पूतिकरजे विनिकीर्णे तु वाच्यवत् ॥ ९४ ॥

---

**नादेयी**–जलबेत, भूईजामन, नारंगी, जपा ( अलसी ), जैत–पुष्पवृक्ष, व्यंगुष्ठ ( अंगूठाहीन ) ( स्त्री० )

**निकाय**–परमात्मा, स्थान ॥ ८९ ॥ सधर्मियोंका समूह, लक्ष्य, संहतोंका मिलाप, ( पुं० )

**नेपथ्य**–रंगभूमि, अलंकृतकी शोभा ( न० ) ॥ ९० ॥

**पयस्या**–क्षीरकाकोली, एक प्रकारकी कटेहरी, दूधी, दुग्धका हित, दूधसे उत्पन्नहुवा, ( त्रि० ) ॥ ९१ ॥

**पर्जन्य**–इंद्र, मेघध्वनि, गर्जताहुवा मेघ, ( पुं० )

**पर्याय**–क्रम, निर्वाण ( मोक्ष ), प्रकार, अवसर, ( पुं० ) ॥ ९२ ॥

**पानीय**–पीनेके योग्य ( त्रि० ), जल, ( न० )

**पारुष्य**–बृहस्पति, ( पुं० ) **पारुष्य**-कठोरता, इंद्रका वन, (न०)॥९३॥

**पौलस्त्य**–कुबेर, रावण, ( पुं० )

**प्रकीर्य**–काँटाकरंज (करंजुवा), (पुं०) बिखराहुवा, ( त्रि० ) ॥ ९४ ॥

"Aho Shrutgyanam"

**प्रणयः** प्रेमविश्रम्भप्रश्रयप्रसरेऽर्थने ।
**प्रणाय्यो**ऽसंमते तृष्णावर्जितेऽप्यभिधेयवत् ॥ ९५ ॥
**प्रत्ययः** शपथे हेतौ ज्ञानविश्वासनिश्चये ।
सन्नाद्यधीनरन्ध्रेषु ख्यातत्वाचारयोरपि ॥ ९६ ॥
**प्रलयो** मृत्युकल्पान्तमूर्च्छासु विदितः पुमान् ।
**प्रसव्यम**न्यलिङ्गं स्यात्प्रतिकूलानुकूलयोः ॥ ९७ ॥
**वलयः** कङ्कणे न स्त्री बलाकण्ठरुजोरपि ।
**बालेयः** फञ्जिकायां स्यात्खरे बालहिते मृदौ ॥ ९८ ॥
**ब्रह्मण्यस्**तु शनौ यूषे ब्रह्मसाधौ तु वाच्यवत् ।
**ब्राह्मण्यं** ब्राह्मणत्वे स्याद्ब्राह्मणानां च संहतौ ॥ ९९ ॥
**भुजिष्यस्**तु सहायेऽपि हस्तसूत्रेऽप्यथ त्रिषु ।
अनधीते **भुजिष्या** तु वेश्याचेटिकयोर्मता ॥ १०० ॥

---

**प्रणय**–प्रेम, विश्वास, नम्रता, प्रसर ( फैलना ), याचना ( पुं० )
**प्रणाय्य**–असंमत ( नहीं मानाहुवा), तृष्णासे रहित, ( त्रि० )॥ ९५ ॥
**प्रत्यय**–सौगन, हेतु ( कारण ), ज्ञान, विश्वास, निश्चय, सन् आदि-प्रत्यय, अधीन, छिद्र, विख्यात, आचार, ( पुं० ) ॥ ९६ ॥
**प्रलय**–मृत्यु, कल्पान्त, मूर्छा, ( पुं०)
**प्रसव्य**–प्रतिकूल, अनुकूल, ( त्रि० ) ॥ ९७ ॥
**वलय**–कंगन, खरैंटी, कंठरोग, ( पुं० न० )
**बालेय**–भारंगी, गर्दभ, बालहित, कोमल, ( पुं० ) ॥ ९८ ॥
**ब्रह्मण्य**–शनैश्चर, यूष, ( पुं० ) ब्रह्ममें साधु ( श्रेष्ठ ) ( त्रि० )
**ब्राह्मण्य**–ब्राह्मणपना, ब्राह्मणोंका समूह, ( न० ) ॥ ९९ ॥
**भुजिष्य**–दास ( नौकर ), हस्तसूत्र ( मंगलसूत्र ) ( पुं० ) विनापढा ( त्रि० )
**भुजिष्या**–वेश्या, दासी, ( स्त्री० ) ॥ १०० ॥

"Aho Shrutgyanam"

**भुवयुः** स्याद्धृहद्भानुभानुशीतलभानुषु ।
**भ्रातृव्यो** भ्रातृतनये त्रिषु पुंसि तु विद्विषि ॥ १०१ ॥
**मङ्गल्यं** दध्नि **मङ्गल्यं** तत्रसाधौ मनोहरे ।
**मङ्गल्यः** श्रीफले स्वच्छे मसूरत्रायमाणयोः ॥ १०२ ॥
**मङ्गल्या** रोचनायां स्यात्प्रियङ्गुशतपुष्पयोः ।
मल्लिगन्धि च यत्कृष्णागुरु तत्रापि सा स्मृता ॥ १०३ ॥
अधःपुष्पीशमीखण्डपुष्पीश्वेतवचासु च ।
**मलयः** पुंसि देशाद्रिभेदयोः पर्वतांशके ॥ १०४ ॥
आरामे चन्दने चाथ **मलया** तृवृतौषधौ ।
**मृगयुर्**ब्रह्मणि प्रोक्तो गोमायुव्याधयोरपि ॥ १०५ ॥
**रहस्यं** वाच्यवद्गोप्ये **रहस्या** तु नदीभिदि ।
**लौहित्यं** रक्ततायां स्यात्पुंसि व्रीहौ नदान्तरे ॥ १०६ ॥
**वक्तव्यः** कुत्सिते हीनेऽप्यधीने वाच्यवत्त्रिषु ।
**वदान्यस्तु** सुवाग्दात्रो**र्विजयो** जयपार्थयोः ॥ १०७ ॥

---

**भुवन्यु**–अग्नि, सूर्य, चंद्रमा, ( पुं० )
**भ्रातृव्य**–भाईका पुत्रआदि ( त्रि० ) शत्रु, ( पुं० ) ॥ १०१ ॥
**मंगल्य**–दही ( न० ) मंगलकरनेवाला, सुंदर, ( त्रि० )
**मंगल्य**–बेलका–वृक्ष, निर्मल, मसूर, त्रायमाणा, ( पुं० ) ॥ १०२ ॥
**मंगल्या**–गोरोचन, फूलप्रियंगु, सौंफ, मल्लिका ( मोगरा ) सरीखी गंधवाला काला अगर, (स्त्री०) ॥१०३॥ गोभी, जांट, खंडपुष्पी ( शाखाहुली ), सफेद बच, ( स्त्री० )
**मलय**–देशभेद, पर्वतभेद, पर्वतका भाग, (पुं०) ॥१०४॥ बाग, चंदन, निसोत, ( स्त्री० )
**मृगयु**–ब्रह्म, गीदड, व्याधा (शिकारी) ( पुं० ) ॥ १०५ ॥
**रहस्य**–गोप्य, ( त्रि० )
**रहस्या**–नदीभेद, ( स्त्री० )
**लौहित्य**–रक्तता, ( न० ) धान, नदभेद, ( पुं० ) ॥ १०६ ॥
**वक्तव्य**–निंदित, हीन, अधीन, ( त्रि० )
**वदान्य**–अच्छी वाणीवाला, दानशील ( बहुत देनेवाला ) ( पुं० )
**विजय**–जय, अर्जुन, ( पुं० )॥१०७

"Aho Shrutgyanam"

**विजया** तु मता गौर्यां तत्सखीतिथिभेदयोः ।
**विनय**स्तु नतौ नीतौ शिक्षायां **विनयो** द्वयोः ॥ १०८ ॥
**विशल्या**ऽग्निशिखादन्तीगुडूचीत्रिवृति स्त्रियाम् ।
वाच्यवद्गतशल्ये स्या**द्विस्मयो**ऽद्भुतगर्वयोः ॥ १०९ ॥
**विषयो** गोचरे देशे इन्द्रियार्थेऽपि नीवृति ।
प्रबन्धाद्यस्य यो ज्ञातः स तस्य **विषयः** स्मृतः ॥ ११० ॥
**व्यवायः** सुरतेऽन्तर्द्धौ **व्यवायं** तेजसि स्मृतम् ।
**शाण्डिल्यो** मुनिभेदेऽपि श्रीफले पावकान्तरे ॥ १११ ॥
**शालेयः** शतपुष्पायां त्रिषु शाल्युद्भवोचिते ।
**शीर्षण्यः** पुंसि विशदे कचे क्लीबं तु शीर्षके ॥ ११२ ॥
**शैलेयं** सिन्धुलवणे तालपर्ण्यां च शैलजे ।
भृङ्गे पुंसि **श्वशुर्य**स्तु देवरे श्यालकेऽपि च ॥ ११३ ॥

---

**विजया**—गौरी, गौरीकी सखी, तिथिभेद, ( स्त्री० )
**विनय**—नति, नीति, शिक्षा, ( पुं० स्त्री० ) ॥ १०८ ॥
**विशल्या**—कलिहारी, जमालगोटाकी जड, गिलोय, निसोत, ( स्त्री० ) शल्यरहित ( त्रि० )
**विस्मय**—अद्भुत, गर्व, ( पुं० )॥१०९
**विषय**—गोचर ( समक्ष ), देश, शब्द स्पर्श आदि, जनपद, ( मनुष्यके नामसे विख्यात देश), जिसके प्रबंधसे जो जाना है वह उसका विषय कहा है ( पुं० ) ॥ ११० ॥
**व्यवाय**—स्त्रीसंग, व्यवधान, ( पुं० )
**व्यवाय**—तेज, ( न० )
**शांडिल्य**—एकमुनि, बिल्व-वृक्ष, अग्निभेद, ( पुं० ) ॥ १११ ॥
**शालेय**—सौंप, ( पुं० ) शालि ( चावल ) की उत्पत्तिवाला क्षेत्र ( त्रि० )
**शीर्षण्य**—श्वेत, केश, ( पुं० ) शिरकी रक्षाकरनेवाला, ( न० ) ११२
**शैलेय**—समुद्रलवण, तालपर्णी ( मुसली ), पत्थरका फूल, ( न० ) भौंरा, ( पुं० )
**श्वशुर्य**—देवर, साला, ( पुं० ) ११३

"Aho Shrutgyanam"

पृष्ठस्थायिबले नीतौ समवायेऽपि **सन्नयः** ।
**समयः** पुंसि सिद्धान्तशपथाचारसंविदि ॥ ११४ ॥
कालसिद्धान्तनिर्देशक्रियाकारेषु सङ्गमे ।
मेलके योगियोगिन्योः **समयः** क्वापि दृश्यते ॥ ११५ ॥
**सरण्युर्**वारिदे वाते **सामर्थ्यं** योग्यताबले ।
**सौकर्यं** स्यादनायासे क्रियायां सूकरस्य च ॥ ११६ ॥
**सौभाग्यं** सुभगत्वे स्याद्योगभेदे पुमानयम् ।
**सौरभ्यं** तु सुगन्धत्वे गुरुत्वे गुणगौरवे ॥ ११७ ॥
**संस्त्यायः** सन्निवेशेऽपि संस्थाने विस्मृतौ गणे ।
**हरिण्य**मक्षये द्रव्ये वराटे स्वर्णरेतसि ॥ ११८ ॥
घटिताऽघटितस्वर्णरूप्ययोर्मानभिद्यपि ।
बुक्कायां **हृदयं** ज्ञेयं **हृदयं** हृदि वक्षसि ॥ ११९ ॥

---

**सन्नय**–पिछाड़ी स्थितहुई सेना, नीति, समूह, ( पुं० )

**समय**–सिद्धान्त, सौगन, आचार, बुद्धि ॥ ११४ ॥ काल, सिद्धान्त, निर्देश, क्रियाकार, संगम, कहीं योगी और योगिनीके मिलाप में भी समय देखा है ( पुं० ) ॥ ११५ ॥

**सरण्यु**–मेघ, वायु, ( पुं० )

**सामर्थ्य**–योग्यता, बल, ( न० )

**सौकर्य**–विनापरिश्रम, सूकरकी क्रिया ( न० ) ॥ ११६ ॥

**सौभाग्य**–सुभगपना ( न० ) योगभेद, ( पुं० )

**सौरभ्य**–सुगंधपना, गुरुपना, गुणोंसे बडप्पन, ( न० ) ॥ ११७ ॥

**संस्त्याय**–अच्छीतरह बनाहुवा वासस्थान, अच्छीतरह स्थिति, विस्तार, ( पुं० )

**हिरण्य**–अक्षय, द्रव्य, कौडी, सुवर्ण, वीर्य, ॥ ११८ ॥ घड़ाहुवा नहीं घड़ाहुवा सुवर्ण और चाँदी, मानभेद, ( न० )

**हृदय**–हृदयके अंदर कमलाकार मांसभेद, हृदय, छाती, ( न० ) ॥ ११९ ॥

"Aho Shrutgyanam"

तनौ स्त्रियां **क्षिपण्युः** स्यात्क्षिपण्युः सुरभौ नरि ।
परदाररताऽसाध्यरोगयोः **क्षेत्रियः** पुमान् ॥ १२० ॥
अन्यदेहे चिकित्सार्हे क्लीबं क्षेत्रतृणेपि च ।

यचतुर्थम् ।

दीर्घद्वेषानुतापानुबन्धेष्व**नुशयः** पुमान् ॥ १२१ ॥
**अन्तशय्या** तु मरणे भूमिशय्याश्मशानयोः ।
**अपसव्यम**वामे स्यात्प्रतिकूले तु वाच्यवत् ॥ १२२ ॥
गर्वेऽपि तुहिनेपि स्याद**वश्यायः** पुमानयम् ।
**उपकार्या** नृपावासेऽप्युपकारोचितेऽन्यवत् ॥ १२३ ॥
**उपक्रय**श्चिकित्सायामारम्भवधयोरपि ।
**काद्रवेयः** पुमान्नागे तथा सीसकरङ्गयोः ॥ १२४ ॥
**चन्द्रोदयो** विताने स्यात्स्त्रियामेवौषधीभिदि ।
**जलाशयो** जलाधारे जलदे तु **जलाशयम्** ॥ १२५ ॥

---

**क्षिपण्यु**–शरीर ( स्त्री० ) **क्षिपण्यु**–सुगंधि द्रव्य ( त्रि० )

**क्षेत्रिय**–परस्त्रीमें रत, असाध्य रोग, ( पुं० ) ॥ १२० ॥ दूसराका शरीर, चिकित्साके योग्य, क्षेत्रका तृण, ( न० )

**यचतुर्थ ।**

**अनुशय**–बहुतदिनोंका बैर, पिछताना, प्रकृति–प्रलय–आगम–आदेशमें विनश्वर, ( पुं० ) ॥१२१॥

**अन्तशय्या**–मरना, भूमिशय्या, श्मशान ( मरघट ) ( स्त्री० )

**अपसव्य**–दहना-हाथ आदि, प्रतिकूल, ( त्रि० ) ॥ १२२ ॥

**अवश्याय**–अभिमान, पाला या बर्फ ( पुं० )

**उपकार्या**–राजभवन, ( स्त्री० ) उपकारके योग्य, ( त्रि० )॥१२३॥

**उपक्रय**–चिकित्सा, आरंभ, वध ( मारना ) ( पुं० )

**काद्रवेय**–नाग ( सर्प ), शीशा, रांग, ( पुं० ) ॥ १२४ ॥

**चन्द्रोदय**–चंदोवा, ( पुं० ) औषधीभेद ( स्त्री० )

**जलाशय**–तालाब आदि, ( पुं० ) खस, ( न० ) ॥ १२५ ॥



"Aho Shrutgyanam"

**तण्डुलीयो** विडङ्गद्रावल्पमारिषताप्ययोः ।
**तृणशून्यं** तु केतक्याः फले मल्ल्यां च निस्तृणे ॥ १२६ ॥
**धनंजयोऽग्नौ** ककुभे नागदेहानिलेऽर्जुने ।
**निरामयं** हुडुके स्यात्कल्पे त्रिषु **निरामयः** ॥ १२७ ॥
**परिधायो** जलस्थाने नितम्बे च परिच्छदे ।
**पाञ्चजन्यो** हरेः शङ्खे शङ्खपोटगलेऽनले ॥ १२८ ॥
**पौरुषेयस्तु** पुरुषविकारेऽपि पदान्तरे ।
पुंसः समूहवधयोः पुरुषेण कृते त्रिषु ॥ १२९ ॥
क्लीबं **प्रतिभयं** भीतौ वाच्यवत्तु भयानके ।
**प्रतिश्रयः** सभायां स्यादाश्रयेऽपि **प्रतिश्रयः** ॥ १३० ॥
फलानामुदये लाभे त्रिदिवेऽपि **फलोदयः** ।
मतो **बिलेशयः** पुंसि मूषिकेऽपि भुजङ्गमे ॥ १३१ ॥

---

**तंडुलीय**—वायबिडंग—वृक्ष, चौलाई शाक, सोनामाखी, ( पुं० )

**तृणशून्य**—केतकीका फल, मल्लिका ( मोतिया ) ( न० ) तृणरहित ( त्रि० ) ॥ १२६ ॥

**धनंजय**—अग्नि, कोह-वृक्ष, सर्प, शारीरका वायु, अर्जुन, ( पुं० )

**निरामय**—वाद्यभेद(एक बाजा),(न०) समर्थ (नीरोग) ( त्रि० ) ॥१२७॥

**परिधाय**—जलस्थान, नितंब, परिकर, ( पुं० )

**पांचजन्य**—विष्णुका शंख, शंख-मात्र, काश या देवनल, अग्नि ( पुं० ) ॥ १२८ ॥

**पौरुषेय**—पुरुषविकार, पदान्तर, ( त्रि० ) समूह, वध, ( पुं ० ) पुरुषका कियाहुवा ( त्रि० ) ॥१२९॥

**प्रतिभय**—भय, ( न० ) भयानक, ( त्रि० )

**प्रतिश्रय**—सभा, आश्रय, ( पुं० ) ॥ १३० ॥

**फलोदय**—फलोंका उदय, लाभ, स्वर्ग, ( पुं० )

**बिलेशय**—मूसा, सर्प, ( पुं० ) ॥ १३१ ॥

"Aho Shrutgyanam"

**भागधेयं** स्मृतं भाग्ये पुंसि स्यात्करभागयोः ।
**भूतेन्द्रियं** तु करणशब्दगोचरसंहतौ ॥ १३२ ॥
**महोदयः** समुदये कान्यकुब्जापवर्गयोः ।
**महालयो** विहारेऽपि तीर्थेऽपि परमात्मनि ॥ १३३ ॥
**महामूल्यं** पद्मरागे महार्घे त्वभिधेयवत् ।
**मार्जारीयस्तु** शूद्रे स्याद्बिडाले कायशोधने ॥ १३४ ॥
**रौहिणेयः** प्रलम्बघ्ने बुधे वत्से तु वाच्यवत् ।
**वैनतेयस्तु** कथितो गरुडे गरुडाग्रजे ॥ १३५ ॥
उत्सेधेऽपि विरोधेपि पुमानेव **समुच्छ्रयः** ।
मतः **समुदयो** वृन्दे संयुगे समुपक्रमे ॥ १३६ ॥
**समुदायः** समूहे स्यात्समुद्भूतौ रणेऽपि च ।
**संपरायस्तु** सङ्ग्रामे विपदुत्तरकालयोः ॥ १३७ ॥
**समाह्वयो** रणे नाम्नि क्रीडायां पशुपक्षिभिः ।
**स्थूलोच्चयस्त्व**साकल्ये गण्डोपलवरण्डयोः ॥ १३८ ॥

---

**भागधेय**–भाग्य, ( न० ) कर (दंड), विभाग, ( पुं० )
**भूतेंद्रिय**–करण ( इंद्रिय ), शब्द आदि गोचर, समूह ( न० ) ॥ १३२ ॥
**महोदय**–अच्छे प्रकारसे उदय, कान्यकुब्ज, मोक्ष, ( पुं० )
**महालय**–विहार ( क्रीडा ), तीर्थ, परमात्मा, ( पुं० ) ॥ १३३ ॥
**महामूल्य**–पुक्खराज, ( न० ) बहुत कीमतवाला, ( त्रि० )
**मार्जारीय**–शूद्र, बिलाव, शरीरशोधन, ( पुं० ) ॥ १३४ ॥
**रौहिणेय**–शूद्र, बुध–ग्रह, ( पुं० ) प्रिय, ( त्रि० )
**वैनतेय**–गरुड, अरुण, (पुं०)॥१३५॥
**समुच्छ्रय**–ऊँचापन, विरोध, (पुं०)
**समुदाय**–समूह, युद्ध, प्रारंभ या उद्गम ( पुं० ) ॥ १३६ ॥
**समुदाय**–समूह, उद्भव, रण, (पुं०)
**संपराय**–संग्राम, विपत्, उत्तरकाल, ( पुं० ) ॥ १३७ ॥
**समाह्वय**–रण, नाम, पशुपक्षियों करके क्रीडा, ( पुं० )
**स्थूलोच्चय**–असंपूर्णता, पर्वतसे गिरा शृंग, मुखरोग, ॥ १३८ ॥

"Aho Shrutgyanam"

**स्थूलोच्चयो** मतङ्गानां स्यान्मध्यमगतेऽपि च ।
**हिरण्मयः** स्वर्णमये लोकधात्रन्तरे पुमान् ॥ १३९ ॥

यपञ्चमम् ।

**कालानुसार्यं** कालेये शैलेये शिंशपाद्रुमे ।
मतं तु **दुग्धतालीयं** दुग्धाम्रे दुग्धफेनके ॥ १४० ॥
स्याद्दुग्धचमसेऽप्येतत्खण्डकीटे पुमानयम् ॥
त्रिषु **प्रवचनीयं** स्यात्प्रवाच्येऽपि प्रवक्तरि ॥ १४१ ॥
**वृषाकपायी** श्रीगौरीजीवन्तीषु शतावरौ ।

यषष्ठम् ।

**प्रत्युद्गमनीयमुपस्थेये** धौतांशुकद्वये ।
**विष्वक्सेनप्रिया** तु स्यात्कमलात्रायमाणयोः ॥ १४२ ॥

इति विश्वलोचने यान्तवर्गः ॥

---

हस्तियोंका मध्यम गमन, ( पुं० )
**हिरण्मय**—सुवर्णमय, लोकधातृ ( ब्रह्मा ) ( पुं० ) ॥ १३९ ॥

**यपंचम ।**

**कालानुसार्य**—कालमें होनेवाला, शिलाजीत, सीसम—वृक्ष, ( न० )
**दुग्धतालीय**—दुग्ध-आम्र, दुगधका फेन ( झाग ) ॥ १४० ॥ दुग्ध-पीनेका पात्र, ( न० ) शक्करका कीट ( पुं० )
**प्रवचनीय**—कहनेके योग्य, कहने-वाला, ( त्रि० ) ॥ १४१ ॥
**वृषाकपायी**—लक्ष्मी, गौरी, जीवंती, शतावरी, ( स्त्री० )

**यषष्ठ ।**

**प्रत्युद्गमनीय**—आगेसे उठनेके योग्य या धौतवस्त्रजोड़ा ( न० )
**विष्वक्सेनप्रिया**—लक्ष्मी, त्रायमाण-औषधि, ( स्त्री० ) ॥ १४२ ॥

इस प्रकार विश्वलोचनकी भाषाटीकामें यान्तवर्ग समाप्त हुआ ॥

"Aho Shrutgyanam"

## अथ रान्तवर्गः ।

रैकम् ।

**र**स्तु कामाऽनले वह्नौ तीक्ष्णे **रा**स्त्वर्थरुक्मयोः ।
**रु**र्ना शब्दे भये भागे **रीः** श्रोतरि भुवि स्त्रियाम् ॥ १ ॥
क्रेतरि **क्रीः** क्रये तु स्त्री **घ्रा** घ्राणे घ्रातरि स्मृतः ।
**द्रु**र्वृक्षेऽपि द्रुमेऽपि स्याद्द्रुः स्वर्णे कामरूपिणि ॥ २ ॥
**श्री**र्लक्ष्मीभारतीशोभाप्रभासु सरलद्रुमे ।
वेशत्रिवर्गसम्पत्तौ शेषापकरणे मतौ ॥ ३ ॥
**स्रुः** स्रवे निर्झरे चाथ **ह्रीर्व्री**डे लज्जिते त्रिषु ।

रद्वितीयम् ।

**अग्रं** त्रिषु प्रधाने स्यादग्रं मूर्द्धाधिकादिषु ॥ ४ ॥
पुरस्तात्पलमाने च व्रातेप्यालम्बनान्तयोः ।
**अङ्घ्रिः** पुंस्येव चरणे मूलेऽपि च महीरुहे ॥ ५ ॥

---

**अथ रान्तवर्गः ।**

रैक ।

**र**–कामाग्नि, अग्नि, तीक्ष्ण, (पुं०)
**रा**–द्रव्य, सुवर्ण, ( पुं० )
**रु**–शब्द, भय, भाग, ( पुं० )
**री**–श्रोता (पुं०) पृथ्वी, (स्त्री०) ॥१॥
**क्री**–खरीदनेवाला, ( पुं० ) खरीदना, ( स्त्री० )
**घ्रा**–नासिका, ( स्त्री० ) सूंघनेवाला, ( पुं० )
**द्रु**–वृक्ष, कल्पवृक्ष, सुवर्ण, यथेच्छरूप धारण करनेवाला, ( पुं० ) ॥ २ ॥
**श्री**–लक्ष्मी, सरस्वती, शोभा, प्रभा, (स्त्री०) सरल–वृक्ष, वेश (शृंगार), त्रिवर्गसंपत्ति, शेषका नहीं करना, बुद्धि, ( स्त्री० ) ॥ ३ ॥
**स्रु**–स्रव (झिरना), निर्झर (फुँवारा ),
**ह्री**–लज्जा, ( स्त्री० ) लज्जावान, (त्रि०)

**रद्वितीय ।**

**अग्र**–आदि, ( त्रि० ) मस्तक, अधिक आदि, ॥ ४ ॥ अगाड़ी, पल ( ४ तोला प्रमाण) समूह, आलम्बन, अन्त, ( न० )
**अंघ्रि**–पाँव, जड़, वृक्ष, ( पुं० )॥५॥

"Aho Shrutgyanam"

**अद्रिः** शैले द्रुमे सूर्येऽप्य**भ्रं** खे गिरिजेऽम्बुदे ।
स्वर्गेप्यथाऽ**रं** शीघ्रे स्याच्चक्राङ्गे शीघ्रगे त्रिषु ॥ ६ ॥
**अस्रं** तु शोणिते लोभेऽप्य**स्रः** स्यात्कोणकेशयोः ।
**अस्त्रं** प्रहरणे चापेऽप्या**र्द्रा** भे स्तिमिते त्रिषु ॥ ७ ॥
**आरा** तु चर्म्मवेधन्या**मारो** भौमे शनैश्चरे ।
**आरुर्ना** द्रुमभेदे स्यादपि कर्कटदंष्ट्रिणोः ॥ ८ ॥
**इन्द्रः** शक्रात्मसूर्येषु योगेऽपी**न्द्रा** फणिज्जके ।
**इरा** तु मदिरावारिभारव्यसनभूमिषु ॥ ९ ॥
**उग्र**स्तीव्रे त्रिषु क्षात्राच्छूद्रापुत्रे हरे पुमान् ।
**उग्रा** वचाछिक्किकयो**रुष्ट्र**स्तु स्यात्क्रमेलके ॥ १० ॥
**उष्ट्री** गोलकिकायां स्या**दुष्ट्री** करभयोषिति ।
**उस्रा** गव्युपचित्राया**मुस्र**स्तु किरणे पुमान् ॥ ११ ॥

---

**अद्रि**—पर्वत, वृक्ष, सूर्य, ( पुं० )
**अभ्र**—आकाश, धातुभेद, मेघ, स्वर्ग, ( न० )
**अर**—शीघ्र, चक्रका अंग (अरा) (न०) शीघ्रचलनेवाला, ( त्रि० ) ॥ ६ ॥
**अस्र**—रुधिर, लोभ, ( न० )
**अस्र**—कोण, केश ( बाल ) ( पुं० )
**अस्त्र**—फेंककर मारनेका हथियार, धनुष, ( न० )
**आर्द्रा**—एक नक्षत्र, ( स्त्री० ) गीला, ( त्रि० ) ॥ ७ ॥
**आरा**—चर्मवेधनी ( आर ) (स्त्री० )
**आर**—भौम, शनैश्चर, ( पुं० )
**आरु**—वृक्षभेद, कर्कट ( केकड़ा) प्राणी, डाढोंवाला-प्राणी, ( पुं० ) ॥ ८ ॥
**इन्द्र**—इन्द्र, आत्मा, सूर्य, योग, (पुं०)
**इन्द्रा**—छोटेपत्तोंकी तुलसी ( स्त्री० )
**इरा**—मदिरा, जल, भार, व्यसनभूमि, ( स्त्री० ) ॥ ९ ॥
**उग्र**—तीव्र, ( त्रि० ) क्षत्रियसे शूद्राका पुत्र, महादेव, ( पुं० )
**उग्रा**—बच, नकछीकनी, ( स्त्री० )
**उष्ट्र**—ऊँट ( पुं० ) ॥ १० ॥
**उष्ट्री**—चावलआदिके धोनेका उपयोगी पात्र, ऊँटनी, ( स्त्री० )
**उस्रा**—गौ, चीता—औषधि, ( स्त्री० )
**उस्र**—किरण, ( पुं० ) ॥ ११ ॥

"Aho Shrutgyanam"

**ऐन्द्रिः** काके जयन्ते स्यादोड्रा जनपदान्तरे ।
**ओड्रो** जने जवावृक्षे देशे पुष्पे तु न द्वयोः ॥ १२ ॥
**अंघ्रिः** पादे च बुध्ने च **कद्रुः** कनकपिङ्गले ।
तद्वति त्रिषु **कद्रुः** स्यात्**कद्रुः** स्त्री नागमातरि ॥ १३ ॥
**करस्तु** पाणिप्रत्यायशुण्डारश्मिघनोपले ।
**कारो** वधे तुषाराद्रौ निश्चये यतियत्नयोः ॥ १४ ॥
बलावप्यथ **कारा** स्याद्बन्धनागारबन्धयोः ।
सुबन्ते कारिकापीडादूतिकासु प्रसेवके ॥ १५ ॥
**कारुः** शिल्पिनि शिल्पे च कारके विश्वकर्मणि ।
**कारिः** क्रियानापिताद्योः **कीरो** जनपदे शुके ॥ १६ ॥
**कुरुर्नृ**पान्तरे भक्ते **कुरुः** श्रीकण्ठजाङ्गले ।
**कृच्छ्रं** तु कष्टे पापे च तथासान्तपनादिके ॥ १७ ॥

---

**ऐन्द्रि**–काग, जयंत (इंद्रपुत्र) (पुं०)

**ओड्र**–जनपद (देशविशेष) (पुं० बहुवचनांत)

**ओड्र**–जन, जया वृक्ष, देश, (पुं०) पुष्प, (न०) ॥ १२ ॥

**अंघ्रि**–चरण, वृक्षकी जड, (पुं०)

**कद्रु**–सुवर्ण, कुछेक पीला रंग, (पुं०) कुछपीलारंगवाला (त्रि०) नागमाता (स्त्री०) ॥ १३ ॥

**कर**–हस्त, निश्चय, हस्तीकी सूँड, किरण, ओला, (पुं०)

**कार**–मारना, हिमाद्रि (पर्वत), निश्चय, यति, यत्न, ॥ १४ ॥ बलि, (पुं०)

**कारा** बंधनका स्थान, बंधन, सुबन्त, कारिका, पीडा, दूती, वीणाकी तूँबी, (स्त्री०) ॥ १५ ॥

**कारु**–शिल्पी, शिल्प, करनेवाला, विश्वकर्मा, (पुं०)

**कारि**–क्रिया, (स्त्री०) नाई आदि, (त्रि०)

**कीर**–देशविशेष, (पुं० बहुवचनांत) सूवा–पक्षी, (पुं०) ॥ १६ ॥

**कुरु**–नृपभेद, अन्न, महादेव, जांगल–देश, (पुं०)

**कृच्छ्र**–कष्ट, पाप, सान्तपन आदि–व्रत, (न०) ॥ १७ ॥

"Aho Shrutgyanam"

**क्रूर**स्त्रिषु नृशंसे स्यादपि निर्दयघोरयोः ।
**क्रोष्ट्री** शृगालिकाक्षीरविदारीलाङ्गलीष्वथ ॥ १८ ॥
देवताडे द्वये तीक्ष्णे त्रिषु ना गर्दभे **खरः** ।
**खरु**र्दशन ईशेऽश्वे दर्पे पुंसि सिते त्रिषु ॥ १९ ॥
**खुरः** शफे कोलदले खड्गादेश्चरणेऽपि च ।
**गरो** विषे चोपविषे **गरं** करणरोगयोः ॥ २० ॥
**गात्रं** गजाग्रजङ्घादिविभागेऽप्यङ्गदेहयोः ।
**गिरि**र्गीर्णौ गिरियकग्रावनेत्रगदेषु ना ॥ २१ ॥
**गिरिः** पूज्येऽन्यलिङ्गः स्याद्भारत्यां भाषणे च **गीः** ।
**गुरु**र्निषेकादिकरे पित्रादिसुरमन्त्रिणोः २२ ॥
**गुरु**स्त्रिषु स्यान्महति दुर्जरे वाऽलघुन्यपि ।
**गुन्द्र**स्तेजनके **गुन्द्रा** मुस्तके भद्रमुस्तके ॥ २३ ॥

---

**क्रूर**–हिंसाकरनेवाला, निर्दय, भयंकर ( पुं० )
**क्रोष्ट्री**–गीदड़ी, क्षीरविदारीकंद, कलिहारी, ( स्त्री० ) ॥ १८ ॥
**खर**–देवताड़, ( पुं० स्त्री० ) तीक्ष्ण, ( त्रि० ) गर्दभ, ( पुं० )
**खरु**–दांत, महादेव, अश्व, अभिमान, ( पुं० ) सफेदरंगवाला, ( त्रि० ) ॥ १९ ॥
**खुर**–पशुका खुर, नख नामका गंधद्रव्य, गैंडा आदिका चरण, ( पुं० )
**गर**–विष, उपविष ( धतूरा आदि ) ( पुं० )
**गर**–करण, रोग, ( न० ) ॥ २० ॥
**गात्र**–गजका अग्रभाग, जंघा आदिविभाग, अंग, शरीर, ( न० )
**गिरि**–निगलना, खिन्नू, पर्वत, नेत्ररोग ( पुं० ) ॥ २१ ॥
**गिरि**–पूज्य, ( त्रि० )
**गिर्**–सरस्वती, भाषण, ( स्त्री० )
**गुरु**–निषेक ( गर्भाधान ) आदि संस्कार करानेवाला, पिता आदि, देवताओंका मंत्री, ( पुं० )॥ २२॥
**गुरु**–महान्, दुर्जर, भारी, ( त्रि० )
**गुन्द्र**–सरकंडा, ( पुं० )
**गुंद्रा**–मोथा, भद्रमोथा, ॥ २३ ॥

"Aho Shrutgyanam"

कुटंनटे प्रियङ्गौ च **गृध्रो** लुब्धे खगान्तरे ।
**गोत्रः** क्षोणीधरे **गोत्रं** कुले क्षेत्रे च नाम्नि च ॥ २४ ॥
सम्भावनीयबोधेऽपि वित्ते वर्त्मनि कानने ।
**गोत्रा** भुवि गवां वृन्दे **गौरः** पुंसि निशाकरे ॥ २५ ॥
**गौरः** पीतारुणश्वेतविशुद्धेष्वभिधेयवत् ।
**गौरी** तु पार्वतीनग्नकन्ययोर्वरुणस्त्रियाम् ॥ २६ ॥
नदीभिद्यामिनीपिङ्गारोचनीक्ष्माप्रियङ्गुषु ।
**गौरं** तु विशदे श्वेतसर्षपे पद्मकेसरे ॥ २७ ॥
**घस्रो**ऽह्नि हिंस्रे **घोरस्तु** हरे भीमेऽभिधेयवत् ।
अथ पुंस्येव **चक्रः** स्याच्चक्रवाकसमूहयोः ॥ २८ ॥
**चक्रं** सैन्ये रथाङ्गेऽपि आम्रजालेऽम्भसाम्भ्रमे ।
कुलालकृत्यनिष्पत्तिभाण्डे राष्ट्रास्त्रभेदयोः ॥ २९ ॥

---

अरलू या टेंटू-वृक्ष, फूलप्रियंगू, (स्त्री० )
**गृध्र**-व्याध, पक्षिभेद, ( पुं० )
**गोत्र**-पर्वत, ( पुं० )
**गोत्र**-कुल, क्षेत्र, नाम, ॥ २४ ॥ संभावनीय बोध, धन, मार्ग, वन, ( न० )
**गोत्रा**-पृथ्वी, गौवोंका समूह, (स्त्री०)
**गौर**-चंद्रमा, ( पुं० ) ॥ २५ ॥
**गौर**-पीला, लाल, सफेद, स्वच्छ, ( त्रि० )
**गौरी**-पार्वती, नहीं उत्पन्न हुवा है रजस् जिसके ऐसी कन्या, वरुणकी स्त्री, ॥ २६ ॥ नदीभेद, रात्रि, पीलारंगवाली, गोरोचन, पृथ्वी, फूलप्रियंगु, (स्त्री०)
**गौर**-स्वच्छ ( सफेद ) ( त्रि० ) सफेद सरसों, कमलकेसर, (न० ) ॥ २७ ॥
**घस्र**-दिन, हिंसाकरनेवाला, ( पुं० )
**घोर**-महादेव, ( पुं० ) भयंकर, ( त्रि० )
**चक्र**--चकवा-पक्षी, समूह, (पुं० ) २८
**चक्र**-सैना, रथका पहियाँ, आम्रजाल, जलोंका भ्रमण, कुम्हारके कृत्यकेलिये पात्र, देशभेद, अस्त्रभेद, (न०) ॥ २९ ॥

"Aho Shrutgyanam"

**चन्द्रः** सुधांशुकर्पूरस्वर्णकम्पिल्लवारिषु ।
**चरश्चारे** चले द्यूतप्रभेदे जङ्गमेऽपि च ॥ ३० ॥
**चरुर्भाण्डे**पि हव्यान्ने **चारश्चर**पियालयोः ।
गतौ बन्धेऽपि **चित्रं** तु कर्बुराद्भुतयोस्त्रिषु ॥ ३१ ॥
**चित्र**मालेख्यतिलकव्योमसु स्यान्नपुंसकम् ।
**चित्रा**ऽस्रवन्तीनक्षत्रभुजङ्गाऽप्सरसाम्भिदि ३२ ॥
**चित्रा**ऽऽखुपर्णीगोडुंबासुभद्रादन्तिकासु च ।
**चीरं** तु वस्त्रे चूडायां त्रपुण्यालेखरेखयोः ॥ ३३ ॥
**चीरी** कच्छाटिकाझिल्योश्चु**क्र**स्त्वम्लेऽम्लवेतसे ।
**चुक्री** चाङ्गेरिकायां स्याच्चु**क्रं** वृक्षाम्लके मतम् ३४ ॥
मासाद्रिभेदयो**श्चैत्रश्चैत्रं** मृतकचैत्यके ।
**चौरश्चौरे** सुगन्धे च **छत्र**मातपवारणे ॥ ३५ ॥

---

**चन्द्र**—चंद्रमा, कपूर, सुवर्ण, कबीला-औषधि, जल, ( पुं० )
**चर**—चार ( फिरताहुवा ) पुरुष, हिलताहुवा, जूवाभेद, जंगम, (पुं०) ॥ ३० ॥
**चरु**—भांड ( पात्र ), हव्यअन्न ( देवान्न ) ( पुं० )
**चार**—राजाका गुप्त पुरुष, चरोंजी, गमन, बंधन, ( पुं० )
**चित्र**—कबरा, अद्भुत, ( त्रि० )॥३१॥
**चित्र**—आलेख्य ( चित्रनिकालना ), तिलक, आकाश, ( न० )
**चित्रा**—नदी, नक्षत्र, सर्प, और अप्सराओंका भेद, ( स्त्री० ) ॥ ३२ ॥
**चित्रा**—मूसाकन्नी, गडूँभा, सरिवन, जमालगोटाकी जड़ ( स्त्री० )
**चीर**—वस्त्र, चोटी, सीसा, लेखभेद, रेखा, ( न० ) ॥ ३३ ॥
**चीरी**—धोतीकी कच्छ, भँभीरी (वर्षाऋतुमें झीं झीं बोलनेवाला प्राणी ) ( स्त्री० )
**चुक्र**—खट्टा-द्रव्य, अम्लवेत, ( पुं० )
**चुक्री**—अम्ललोना ( स्त्री० )
**चुक्र**—चूका-वृक्ष, ( न० ) ॥ ३४ ॥
**चैत्र**—चैत्र—मास, पर्वतभेद, ( पुं० )
**चैत्र**—मृतकका चौतरा, ( न० )
**चोर**—चोर, सुगंध-द्रव्य, ( पुं० )
**छत्र**—छत्र, ( न० ) ॥ ३५ ॥

"Aho Shrutgyanam"

**छत्रा** मधुरिकायां स्यात्कुस्तुम्बुरुशिलीन्ध्रयोः ।
**जारस्तू**पपतौ **जारी** मता वश्यौषधीभिदि ॥ ३६ ॥
**जीरस्तू** जीरे खड्गे च **टारो** लिङ्गतुरङ्गयोः ।
**तन्त्रं** प्रधाने सिद्धान्ते श्रुतिशाखान्तरेऽपि च ॥ ३७ ॥
कुटुम्बधारणे शास्त्रे कारणे च परिच्छदे ।
इतिकर्तव्यतायां च सूत्रवायेऽगदोत्तमे ॥ ३८ ॥
**तत्रं** द्विसाधके पात्रे **तन्त्री** स्याद्वल्लकी गुणे ।
शिरायां च गुडूच्यां च **तन्द्री** निद्राप्रमीलयोः ॥ ३९ ॥
वस्त्रादिपेटके नावि दशायां च **तरिः** स्त्रियाम् ।
**ताम्रं** शुल्बे त्रिष्वरुणे **तारो**ऽस्युच्चध्वनौ त्रिषु ॥ ४० ॥
**तारो** मुक्तादिसंशुद्धौ तरुणे शुद्धमौक्तिके ।
**तारं** तु रजते **तारा** सुग्रीवगुरुयोषितोः ॥ ४१ ॥

---

**छत्रा**–सौंफ, धनियाँ, छत्राक ( भौंफोड़ ) ( स्त्री० )
**जार**–उपपति, ( पुं० )
**जारी**–वशीभूत करनेवाली औषधीभेद ( स्त्री० ) ॥ ३६ ॥
**जीर**–जीरा, खड्ग, ( पुं० )
**टार**–लिंग, अश्व, ( पुं० )
**तन्त्र**–प्रधान, सिद्धान्त, वेदशाखाभेद, ॥३७॥ कुटुंबधारण, शास्त्र, कारण, सामग्री, निश्चित करना, सूत्रबुननेवाला, उत्तम औषधी, ( न० ) ॥ ३८ ॥
**तंत्र**–दोयोंका साधक, पात्र, ( न० )
**तंत्री**–बीणाका तार, नाडी, गिलोय, ( स्त्री० )
**तन्द्री**–निद्रा, आलस्य, (स्त्री०)॥३९॥
**तरि**–वस्त्रआदिकी पेटी, नौका, वस्त्रका पल्ला, ( स्त्री० )
**ताम्र**–तांबा, ( न० ) रक्तवर्णवाला, ( त्रि० )
**तार**–अति उच्चध्वनि, (त्रि०)॥४०॥
**तार**–मोती आदिकी संशुद्धि, जवान, स्वच्छमोती, ( पुं० )
**तार**–चाँदी, ( न० )
**तारा**–सुग्रीवकी स्त्री, बृहस्पतिकी स्त्री ( स्त्री० ) ॥ ४१ ॥

"Aho Shrutgyanam"

बुद्धदर्शनदेव्यां च दृग्मध्यतारके न ना ।
**तीर**रूपौ नटे **तीरं** तटे प्रादुत्तरं च तत् ॥ ४२ ॥
**तीव्र**मत्यन्तकटुके नितान्ते तद्वतोस्त्रिषु ।
**तीव्रा** तु कटुरोहिण्यामासुरीगण्डदूर्वयोः ॥ ४३ ॥
वेणुके प्राजने **तोत्रं** **दरो**ऽस्त्री भीतिगर्त्तयोः ।
**दरी** स्यात्कन्दरे स्त्री तदीषदर्थे **दरा**ऽव्ययम् ॥ ४४ ॥
**दस्रः** खरेऽप्याश्विनेये **दारु** स्याद्देवदारुणि ।
अस्त्री त्वारेऽप्यथ क्लीबं **द्वारं** द्वाराऽभ्युपाययोः ॥ ४५ ॥
**धरः** कच्छपनाथे स्याद्गिरौ कर्प्पासतूलके ।
**धरा** धरण्यां स्त्रीणां च गर्भाधारेऽपि मेदसि ॥ ४६ ॥
**धात्री** त्वामलकीक्षित्योरुपमातरि मातरि ।
**धारस्तु** धारासम्पातवर्षणे स्यादृणेऽपि च ॥ ४७ ॥

---

बुद्धधर्मकी देवी, ( स्त्री० ) नेत्रका तारा ( स्त्री० न० )
**तीर**–रांग, नट, ( पुं० ) तीर
**तीर–प्रतीर**–तट–नदी आदिका, ( न० ) ॥ ४२ ॥
**तीव्र**–अत्यंत चर्चरा, अत्यर्थ, ( न० ) कटुरसवाला, अत्यर्थवाला ( त्रि० )
**तीव्रा**–कुटकी, राई, गाँडर दूब, (स्त्री०) ॥ ४३ ॥
**तोत्र**–चावुक, पैनी, ( न० )
**दर**–भय, खड्डा, ( पुं० न० )
**दरी**–गुफा, ( स्त्री० )
**दर**–ईषत्का अर्थ ( थोड़ा ) ( अव्यय ) ॥ ४४ ॥
**दस्र**–गर्दभ, अश्विनीकुमार, ( पुं० )
**दारु**–देवदार–वृक्ष ( न० ) पीतल ( पुं० न० )
**द्वार**–दरवाजा, अभ्युपाय ( अंगीकार या उपाय ) ( न० ) ॥ ४५ ॥
**धर**–कूर्माधिप ( बड़ा कछुवा ), पर्वत, कपासकी रूई, ( पुं० )
**धरा**–पृथ्वी, स्त्रियोंका गर्भाशय, मेद, ( स्त्री० ) ॥ ४६ ॥
**धात्री**–आँवला, पृथ्वी, धाय ( स्तन प्यानेवाली ), माता ( स्त्री० )
**धार**–धारापूर्वक बरसना, ऋण, ( पुं० ) ॥ ४७ ॥

"Aho Shrutgyanam"

**धारा** पङ्क्तौ द्रवद्रव्यस्रवेऽश्वगतिपञ्चके ।
खड्गादीनां मुखे सेनाग्रिमस्कन्धपुरान्तरे ॥ ४८ ॥

भृङ्गारादेश्च नालायां धाराभ्यासे नुतावपि ।
हरिद्रानिशयोश्चाथ **धीरः** स्यात्पुंसि पण्डिते ॥ ४९ ॥

धैर्यशालिनि मन्दे च त्रिषु **धीरं** तु कुङ्कुमे ।
**नक्रस्तु** पुंसि कुम्भीरे **नक्रं** घ्राणेऽग्रदारुणि ॥ ५० ॥

**नरः** पार्थाजयोर्मर्त्ये रामकर्पूरके **नरम्** ।
**नारस्तु** तन्दुके नीरे **नीध्रः** पुंसि निशापतौ ॥ ५१ ॥

**नीध्रं** वलीके नेमौ च रेवतीतारके वने ।
**नेत्रं** विलोचने वृक्षमूले वस्त्रे गुणे मथि ॥ ५२ ॥

**नेत्रं** रथेऽपि नद्यां च **नेत्रो** नेतरि वाच्यवत् ।
**कलिकारस्तु** धूम्याटे पीतमुण्डे करञ्जके ॥ २६० ॥

**कादम्बरस्तु** दध्यग्रे मद्यभेदेऽपि न द्वयोः ।
**कादम्बरी** परभृतासीधुगीःसारिकास्वपि ॥ २६१ ॥
**कालंजरो** योगिचक्रमेलके भैरवे गिरौ ।
देशभेदेऽपि पार्वत्यां भवेत्**कालञ्जरी** मता ॥ २६२ ॥

**कुम्भकारः** कुलाले स्यात्कुलथ्यां तु स्त्रियामपि ।
**कृष्णसारो** मृगे पुंसि स्नुहीशिंशपयोः स्त्रियाम् ॥ २६३ ॥
**गङ्गाधरो** गिरिसुतानाथे नाथे च पाथसाम् ।
**गिरिसारस्तु** लौहे स्यान्मलयाचललिङ्गयोः ॥ २६४ ॥

कम्बलच्छन्नदोलायां कुन्थाङ्गेऽपि **गृहाम्बरः** ।
**घनसारो**ऽप्सु कर्पूरे दक्षिणावर्त्तपारदे ॥ २६५ ॥

---

**कर्मकरी**–चुरनहार या मरोरफली, कन्दूरी, ( स्त्री० )

**कलिकार**–खुटकबढैया–पक्षी, गुरसल-पक्षी, करंजुवा ( पुं० ) २६०

**कादंबर**–दहीकी मलाई ( पुं० ) मद्यभेद ( न० )

**कादंबरी**–कोयल, सीधु ( वारुणी ), वाणी, मैना–पक्षी ( स्त्री० ) ॥ २६१ ॥

**कालंजर**–योगिचक्रका मिलाप, भैरव, एकपर्वत, देशभेद, ( पुं० )

**कालंजरी**–पार्वती ( स्त्री० ) २६२

**कुंभकार**–कुम्हार,(पुं०)**कुंभकारी**–कुलथी ( स्त्री० )

**कृष्णसार**–मृग ( पुं० )

**कृष्णसारा**–थोहर, शिंशपा–वृक्ष ( स्त्री० ) ॥ २६३ ॥

**गंगाधर**–महादेव, समुद्र ( पुं० )

**गिरिसार**–लोहा, मलयाचल-पर्वत, लिङ्ग ( पुं० ) ॥ २६४ ॥

**गृहांबर**–कंबलसे ढकीहुई डोली, गुदड़ीवाला मनुष्य, ( पुं० )

**घनसार**–जल, कपूर, दक्षिणावर्त्त पारा ( पुं० ) ॥ २६५ ॥

"Aho Shrutgyanam"

भवेच्चक्रधरो विष्णौ भुजङ्गे ग्रामजालिनि ।
चराचरं तु भुवने स्यादिङ्गे जङ्गमे त्रिषु ॥ २६६ ॥

चर्म्मकारः पुमान्पादूकृति चर्मकषौषधौ ।
चर्म्मकारी स्त्रियां चित्राटीरस्तु रजनीपतौ ॥ २६७ ॥

घण्टाकर्णवलिहतच्छागासृतिलकेऽपि च ।
जटाटीरो जटायां स्यादोकणे पार्वतीपतौ ॥ २६८ ॥

वरोहे पादपानां च समावेदोक्तवैजवे ।
रण्डायां तालपत्री स्यात्तालपत्रं तु कुण्डले॥ २६९ ॥

तुङ्गभद्रा नदीभेदे तुङ्गभद्रो मदोत्कटे ।
तुण्डिकेरी तु कर्पास्यां बिम्बिकायामपि स्त्रियाम् ॥ २७० ॥

तुलाधारस्तुलाराशौ तुलाधारो वणिक्ष्वपि ।
भवेत्तोयधरो मेघे मुस्तके सुनिषण्णके ॥ २७१ ॥

---

**चक्रधर**–विष्णु, सर्प,...( पुं० )

**चराचर**–जगत्, अभिप्रायके अनुरूप चेष्टा, जंगम ( चलनेवाला ), ( त्रि० ) ॥ २६६ ॥

**चर्मकार**–चमार–जाति ( पुं० )

**चर्मकारी**–थोहरका भेद ( स्त्री० )

**चित्राटीर**–चंद्रमा, घंटाकर्णयक्षकी बलिके लिये माराहुवा बकराके रुधिरका जिसने तिलक किया है वह, ( पुं० ) ॥ २६७ ॥

**जटाटीर**–जटा, महादेव, ( पुं० ) ॥ २६८ ॥ वृक्षकी जडसे चलकर आगेतक गई हुई शाखा ( पुं० )

**तालपत्री**–रंडा स्त्री, ( स्त्री० )

**तालपत्र**–कुंडल ( न० ) ॥ २६९ ॥

**तुंगभद्रा**–नदीभेद ( स्त्री० )

**तुंगभद्र**–मदोन्मत्त ( पुं० )

**तुंडिकेरी**–कपास, कन्दूरी, ( स्त्री० ) ॥ २७० ॥

**तुलाधार**–तुला-राशि, बणियां,(पुं०)

**तोयधर**–मेघ, नागरमोथा, चौपतिया या सिरिआरी शाक, ( पुं० ) ॥ २७१ ॥



"Aho Shrutgyanam"

यमे नृपे **दण्डधरो दण्डधारो** यमे नृपे ।
**दण्डयात्रा** दिग्विजये संयानवरयात्रयोः ॥ २७२ ॥

क्लीबं **दशपुरं** देशे पुरगोनर्दयोरपि ।
**दिगम्बरस्तु** क्षपणे नग्ने ध्वान्ते च शूलिनि ॥ २७३ ॥

**दरोदरं** पणे द्यूते द्यूतकारे **दुरोदरः** ।
**देहयात्रा** मता मृत्यौ **देहयात्रा**ऽपि भोजने ॥ २७४ ॥

**द्वैमातुरो** जरासन्धे **द्वैमातुर** इभानने ।
**धराधरश्च**क्रधरे क्ष्माधरे च **धराधरः** ॥ २७५ ॥

भवेद्**धाराधरो** वारिवाहिनिस्त्रिंशयोः पुमान् ।
**धाराङ्कुरस्तु** ना सीरे करकायां च शीकरे ॥ २७६ ॥

**धार्तराष्ट्रो**ऽसितैश्चञ्चुपदैर्हंसेऽपि कौरवे ।
सर्पेऽप्यथो धवतरौ धूर्वहे च **धुरन्धरः** ॥ २७७ ॥

---

**दंडधर**–धर्मराज, राजा, ( पुं० )
**दंडधार**–धर्मराज, राजा, ( पुं० )
**दंडयात्रा**–दिग्विजय, अच्छीतरह-यात्रा, श्रेष्ठ यात्रा, ( स्त्री० )२७२
**दशपुर**–देश, पुर, केवटीमोथा, ( न० ) ।
**दिगम्बर**–मुनि, नग्न, अन्धकार, महादेव, ( पुं० ) ॥ २७३ ॥
**दुरोदर**–पण, जुवा, ( न० ) जूवाकर-नेवाला, ( पुं० )
**देहयात्रा**–मृत्यु, भोजन, ( स्त्री० ॥ २७४ ॥
**द्वैमातुर**–जरासन्ध, गणेश, ( पुं०
**धराधर**–विष्णु, पर्वत, ( पुं० )२७
**धाराधर**–मेघ, खड्ग, ( पुं० )
**धारांकुर**–हल, ओला, वायुप्रेरि जलबिन्दु, ( पुं० ) ॥ २७६ ॥
**धार्तराष्ट्र**–श्यामचोंच चरणोंवाल हंस, कौरव, सर्पभेद, ( पुं० )
**धुरंधर**–धव–वृक्ष, धुरको वहनेवाल बैलआदि, ( पुं० ) ॥ २७७ ॥

"Aho Shrutgyanam"

**धुन्धुमारः** शक्रगोपे गृहधूमे पदालिके ।
**धृतराष्ट्र**स्त्वांबिकेये पक्षिभेदे सुराज्ञि च ॥ २७८ ॥
**धृतराष्ट्री** मता हंसपदीनामौषधान्तरे ।
**नभश्चरो** घने विद्याधरे वाते विहङ्गमे ॥ २७९ ॥
**निशाचरः** फेरवभूतरक्षोभुजङ्गघूकेषु **निशाचरी** तु ।
भवेदसत्यां हि **निषद्वरः** स्यात्पङ्के निशायां तु **निषाद्वरी** स्यात्
**परम्परः** प्रपौत्रादौ मृगभेदे **परम्परः** ।
**परम्परा** तु सन्ताने खङ्गकोशे परिच्छदे ॥ २८१ ॥
भवेत्**परिसरो** दैवोपात्ते मृत्युप्रदेशयोः ।
यूथभ्रष्टपृथक्चारिगजे **पक्षचरो** विधौ ॥ २८२ ॥
**पात्रटीरो** जरत्पात्रे मुक्तव्यापारमन्त्रिणि ।
सिङ्घाणे लोहकांस्ये च जतुपात्रे च पाठके ॥ २८३ ॥

---

**धुन्धुमार**–बीरबहूटी, गृहधूम ( घर-का धुवां ), ( पुं० )

**धृतराष्ट्र**–अंबिकाका पुत्र ( धृतराष्ट्र–राजा ), पक्षिभेद, श्रेष्ठराजा, ( पुं० ) ॥ २७८ ॥

**धृतराष्ट्री**–लालरंगका लज्जालू (स्त्री०)

**नभश्चर**–मेघ, विद्याधर, वायु, पक्षी, ( पुं० ) ॥ २७९ ॥

**निशाचर**–गीदड़, भूत, राक्षस, सर्प, उल्लू-पक्षी, ( पुं० )

**निशाचरी**–कुलटा स्त्री ( स्त्री० )

**निषद्वर**–कीच, ( पुं० ) **निषद्वरी**-रात्रि ( स्त्री० ) ॥ २८० ॥

**परम्पर**–प्रपौत्र आदि, मृगभेद, ( पुं० )

**परम्परा**–सन्तान ( वंश ), तलवारका म्यान, ढकनेवाला, (स्त्री०) ॥२८१॥

**परिसर**–भाग्यवशसे प्राप्त, मृत्यु, प्रदेश, ( प्रान्त ) ( पुं० )

**पक्षचर**–समूहसे बिछड़कर अलग विचरनेवाला हस्ती, चंद्रमा, ( पुं० ) ॥ २८२ ॥

**पात्रटीर**–व्यापाररहित मंत्री, नासिकाका मल, लोहेका पात्र, काँसीका-पात्र, लाखका पात्र, अग्नि, ( पुं० ) ॥ २८३ ॥

"Aho Shrutgyanam"

**पारावारः** सरिन्नाथे **पारावारं** तटद्वये ।
**पारिभद्रः** पुमान्निम्बतरौ मन्दारपादपे ॥ २८४ ॥

मतः **पीताम्बरश्च**क्रपाणौ **पीताम्बरो** नटे ।
**पीतसारस्तु** गोमेदे मणौ मलयसम्भवे ॥ २८५ ॥

**पूर्णपात्रं** तु सम्पूर्णपात्रे वर्धापकेऽपि च ।
यात्रायां पटहे चैव **पूर्णपात्र**मिति स्मृतम् ॥ २८६ ॥

द्वारि द्वाःस्थे **प्रतीहारः प्रतीहारी** त्वनन्तरा ।
पुंसि **प्रतिसरो** माल्ये चमूपृष्ठेऽपि कङ्कणे ॥ २८७ ॥

भूषायां व्रणशुद्धौ च नियोज्याऽऽरक्षयोरपि ।
मन्त्रभेदे स्त्रियां पुंसि हस्तसूत्रेऽपि न स्त्रियाम् ॥ २८८ ॥

समे प्रतिक्रियायां च **प्रतीकारो** भटेऽपि च ।
**प्रभाकरोऽर्के** दहने **वक्रनक्रः** शुके खले ॥ २८९ ॥

---

**पारावार**–समुद्र ( पुं० ) **पारावार**-दोनों तट ( न० )

**पारिभद्र**–नींब–वृक्ष, कल्पवृक्षभेद ( देवतरु ), ( पुं० ) ॥ २८४ ॥

**पीतांबर**–विष्णु, नट, ( पुं० )

**पीतसार**–गोमेद–मणि, मलयज ( चंदन ), ( पुं० ) ॥ २८५ ॥

**पूर्णपात्र**–पूर्णहुवा पात्र, वृद्धिकरनेवाला, यात्रा, पहट ( बाजा ), (न०) ॥ २८६ ॥

**प्रतीहार**–द्वार, द्वारपाल, ( पुं० )

**प्रतीहारी**–द्वारपालनी ( स्त्री० )

**प्रतिसर**–माला, सेनापीठ, कंकण, ॥ २८७ ॥ आभूषण, व्रणशुद्धि, प्रेरणेके योग्य, हस्तिके ललाटका मर्म, मंत्रभेद, ( स्त्री० पुं० ) हस्तसूत्र ( पुं० न० )

**प्रतीकार**–सम ( तुल्य ), प्रतिक्रिया ( बदला ), भट ( योद्धा ), २८८

**प्रभाकर**–सूर्य, अग्नि, ( पुं० )

**वक्रनक्र**–सूवा, खल-पुरुष, ( पुं० ) ॥ २८९ ॥

"Aho Shrutgyanam"

**बलभद्रा** कुमार्यां स्यात्त्रायमाणे बले पुमान् ।
**वार्वटीर**स्त्रपौ चूतास्थ्यङ्कुरे गणिकासुते ॥ २९० ॥
उकणे **वारकीरः** स्यान्नीराजितहयेऽपि च ।
**वीरभद्रो**ऽश्वमेघाश्वे महावीरेऽपि वीरणे ॥ २९१ ॥
क्लीबं **वीरतरं** वीरश्रेष्ठे वीरणगुन्द्रयोः ।
**मणिच्छिद्रा** तु मेदायामृषभाख्यौषधावपि ॥ २९२ ॥
**महावीर**स्तु गरुडे शूरे कण्ठीरवे पवौ ।
**महावीरः** पिके चाश्वमखाग्नौ च जराटके ॥ २९३ ॥
**महामात्रो** हस्तिपके समूहामात्ययोरपि ।
**रथकार**स्तु माहिष्यात्करणीजेऽपि तक्षणि ॥ २९४ ॥
**रागसूत्रं** तुलासूत्रे पट्टसूत्रेऽपि न द्वयोः ।
वसन्तकङ्कणाभिख्यशङ्खे नोगण्डिपट्टके ॥ २९५ ॥

---

**बलभद्रा**–घीकुमार, त्रायमान, (स्त्री०) **बलभद्र**–बलदेव ( पुं० ) ॥ २९० ॥

**बार्बटीर**–सीसा, या राँगा, आमकी गुठली और अंकुर, वेश्याका पुत्र, ( पुं० ) ॥ २९१ ॥

**बारकीर**–...आरती कियाहुवा अश्व, ( पुं० )

**वीरभद्र**–अश्वमेध यज्ञका अश्व, महावीर, ( पुं० ) बीरनमूल ( न० ) ॥ २९२ ॥

**वीरतर**–वीरश्रेष्ठ, वीरनमूल, शर, ( पुं० )

**मणिच्छिद्रा**–मेदा–औषधि, ऋषभाख्य औषधि, (स्त्री०) ॥२९३॥

**महावीर**–गरुड, शूर, सिंह, वज्र, कोयल–पक्षी, अश्वमेधयज्ञका अग्नि, ( पुं० ) ॥ २९३ ॥

**महामात्र**–फीलवान, समूह, मंत्री, ( पुं० )

**रथकार**–वैश्याके क्षत्रियसे उपजे पुरुषसे शूद्रीके वैश्यसे उपजी स्त्रीमें उत्पन्नहुवा, (बढई) (पुं०) ॥२९४॥

**रागसूत्र**–तराजूका सूत्र, पाटका सूत्र, ( न० ) वसंतकंकण नाम शंख, हस्तीका पट्टा, ( पुं० ) ॥ २९५ ॥

"Aho Shrutgyanam"

दग्धदीपदशाब्वेष मतो लङ्कश्चतुः पुमान् ।
**लम्बोदरः** स्यादुध्माने हेरम्बे लम्बकुक्षिके ॥ २९६ ॥
**लक्ष्मीपुत्रस्तु** कन्दर्पे **लक्ष्मीपुत्रस्तुरङ्गमे** ।
**वातपुत्रो** महाधूर्ते हनूमद्भीमयोरपि ॥ २९७ ॥
**बिन्दुतन्त्रः** पुमाञ्शारिफलके चतुरङ्गके ।
**विभाकरो** बृहद्भानौ चित्रभानौ **विभाकरः** ॥ २९८ ॥
**विभावरी** तमस्विन्यां हरिद्रायां **विभावरी** ।
विवाहवस्त्रगुण्ठ्याञ्च कुट्टिन्यां वक्रयोषिति ॥ २९९ ॥
**विश्वम्भरो** हरौ शक्रे स्त्रियां **विश्वम्भरा** भुवि ।
**विश्वकद्रुः** खले ध्वाने स्यादाखेटिककुक्कुरे ॥ ३०० ॥
**वीतिहोत्रो** बृहद्भानौ **वीतिहोत्रो** दिवाकरे ।
**भवेद्व्यतिकरः** पुंसि व्यसनव्यतिषङ्गयोः ॥ १ ॥
**व्यवहारो** व्यवहृतौ वृक्षभेदे स्थितावपि ।
**शतपत्रो** राजकीरे दार्वाघाटे शिखण्डिनि ॥ २ ॥

---

**लम्बोदर**—जलंधर रोगवाला, गणेश, लंबापेटवाला, ( पुं० ) ॥ २९६ ॥
**लक्ष्मीपुत्र**—कामदेव, अश्व ( पुं० )
**वातपुत्र**—महाधूर्त, हनूमान, भीमसेन, ( पुं० ) ॥ २९७ ॥
**बिन्दुतंत्र**—चौपटखेलनेका पट, चतुरंग—खेल, (पुं०)
**विभाकर**—अग्नि, सूर्य, ( पुं० ) ॥ २९८ ॥
**विभावरी**—रात्रि,हलदी,कुट्टिनी—स्त्री, वक्र स्त्री ( स्त्री० ) ॥ २९९ ॥
**विश्वंभर**—विष्णु, इंद्र, ( पुं० )
**विश्वंभरा**—पृथ्वी, ( स्त्री० )
**विश्वकद्रु**—खल—पुरुष, शब्द, शिकारी कुत्ता, ( पुं० ) ॥ ३०० ॥
**वीतिहोत्र**—अग्नि, सूर्य, ( पुं० )
**व्यतिकर**—शौक (मदिरापानआदि), उलटा, ( पुं० ) ॥ १ ॥
**व्यवहार**—व्यवहार, वृक्षभेद, स्थिति ( ठहरना ), ( पुं० )
**शतपत्र**—राजकीर ( बडा-सूवा ), मुरगा, मोर, ( पुं० ) ॥ २ ॥

"Aho Shrutgyanam"

**शतपत्रं** तु राजीवे वरीशुण्ठ्योः **शतावरी** ।
**शिशुमारो** जलकपौ तारात्मकहरावपि ॥ ३ ॥
**समुद्रारु**र्मतः सेतुबन्धे ग्राहे तिमिङ्गिले ।
**संप्रहारो** मृतौ युद्धे झिण्ट्यां **सहचरी** द्वयोः ॥ ४ ॥
स्याद्वयस्ये **सहचर**स्त्रिषु प्रतिकृतौ पुमान् ।
**सालसारो** मतो हिङ्गौ **सालसारो** महीरुहे ॥ ५ ॥
**सुकुमार**स्तु पुण्ड्रेक्षौ कोमले त्वभिधेयवत् ।
**सूत्रधारो** मतः शिल्पिप्रभेदेऽपि पुरन्दरे ॥ ६ ॥
नान्द्यनन्तरसञ्चारिपात्रभेदेऽपि स स्मृतः ।
**स्थिरदंष्ट्रो** भुजङ्गे स्याद्वराहाकृतिकेशवे ॥ ७ ॥

रपञ्चमम् ।

**उत्पलपत्रं** तूत्पलच्छदे योषिन्नखक्षते ।
स्वर्गनद्यां तु **कपिलधारा** तीर्थान्तरे पुमान् ॥ ८ ॥

---

**शतपत्र**–कमल ( न० )
**शतावरी**–शतावर, सौंठ, ( स्त्री० )
**शिशुमार**–जलजंतु ( मकरभेद ), तारात्मक विष्णु, ( पुं० ) ॥ ३ ॥
**समुद्रारु**–सेतुबंध, ग्राह, तिमिंगिल ( मकरभेद ), ( पुं० )
**संप्रहार**–मृत्यु, युद्ध, ( पुं० )
**सहचरी**–कटसरैया वृक्ष (पुं० स्त्री०) ॥ ४ ॥
**सहचर**–समानउमरवाला, ( त्रि० ) मूर्त्ति ( पुं० )
**सालसार**–हींग, वृक्ष, ( पुं० )॥५॥
**सुकुमार**–पौंडा ( ऊख ) ( पुं० ) कोमल ( त्रि० )
**सूत्रधार**–शिल्पिभेद, इंद्र, ॥ ६ ॥ नांदीके पीछे आनेवाला नाटकका पात्रभेद, ( पुं० )
**स्थिरदंष्ट्र**–सर्प, वराह अवतार, (पुं०) ॥ ७ ॥

**रपंचम ।**

**उत्पलपत्र**–कमलपत्र, स्त्रीके नखसे हुवा घाव, ( न० )
**कपिलधारा**–स्वर्गनदी ( स्त्री० )
**कपिलधार**–तीर्थभेद ( पुं० ) ॥८॥

"Aho Shrutgyanam"

**तमालपत्रं** तिलके तापिच्छे पत्रकेऽपि च ।
**तालीशपत्रं** तालीशे तामलक्यां च न द्वयोः ॥ ९ ॥

सैकते करके छागे पिप्पले **पादचत्वरः** ।
परदीपप्रकाशैकतत्परेऽपि मतो नरे ॥ ३१० ॥

क्लीबं तु **पीतकावेरं** पित्तले कुङ्कुमेऽपि च ।
**स्यात्पांशुचामरो** धूलीगुच्छकेऽपि प्रशंसने ॥ ११ ॥

वर्द्धापके पुरोटौ च दूर्वाञ्चिततटीभुवि ।
बकुले वेधके नागकुसुमे **नागकेसरः** ॥ १२ ॥

**स्याद्राजबदरं** रक्तामलके लवलीफले ।
रोमगुच्छे च मन्तौ च **रोमकेसर** इष्यते ॥ १३ ॥

**वस्वौकसारा** श्रीदस्य नलिन्यामलकापुरि ।
**विप्रतीसारः** कौकृत्ये रोषेऽप्यनुशयेऽपि च ॥ १४ ॥

---

**तमालपत्र**—तिलक—पुष्पवृक्ष, तमाल—वृक्ष, तेजपात, ( न० )

**तालीशपत्र**—तालीशपत्र, भुंई आँवला ( न० ) ॥ ९ ॥

**पादचत्वर**—रेतीवाला—स्थल, ओला ( वर्षाका पत्थर ), बकरा, पीपल—वृक्ष, दूसरेके दोष प्रकाशितकरना—एक इसी काममें तत्पर मनुष्य, ( पुं० ) ॥ ३१० ॥

**पीतकावेर**—पीतल, केसर, ( न० )

**पांशुचामर**—धूलिगुच्छ, प्रशंसा ११ वर्धापक ( ........ ), पुरोटि ( ........ ) दूब जमे हुये तटवाली पृथ्वी, ( पुं० )

**नागकेसर**—बौलश्री, अम्लबेत, नागकेसर ( पुं० ) ॥ १२ ॥

**राजबदर**—लालआँवला, हरपारेवड़ीका फल, ( न० )

**रोमकेसर**—रोमोंका गुच्छा, अपराध, ( पुं० ) ॥ १३ ॥

**वस्वौकसारा**—कुबेरकी अलका नामकी पुरी, कमलिनी, ( स्त्री० )

**विप्रतीसार**—क्रोध, पछताना, (पुं०) ॥ १४ ॥

"Aho Shrutgyanam"

मतः **समभिहारस्तु** पौनःपुन्ये भृशार्थके ।
पुंस्येव **सर्वतोभद्रः** काव्यचित्रे गृहान्तरे ॥ १५ ॥
निम्बेऽथ **सर्वतोभद्रा** गम्भार्यां नटयोषिति ॥ ३१६ ॥
इति विश्वलोचनेऽपराभिधानायां मुक्तावल्यां **रेफान्तवर्गः** समाप्तः॥

---

## अथ लान्तवर्गः ।

### लैकम् ।

**ल** इन्द्रे **ला** तु दाने स्यादाश्लेषेऽपि लयेऽपि च ।
अपि **लूश्छेदके** पुंसि लवणे **लूरपि** स्मृता ॥ १ ॥

### लद्वितीयम् ।

**अम्लो** रसप्रभेदे स्याद**म्ली** चाङ्गेरिकौषधौ ।
**अलिर्भृङ्गे** सुरायां स्त्री स्या**दालिः** पिण्डले स्त्रियाम् ॥ २ ॥
सख्यां पङ्क्तावपि ख्याता वाच्यवद्विशदाशये ।
**आलुर्गलन्तिकायां** स्त्री क्लीबे भेलककन्दयोः ॥ ३ ॥

---

**समभिहार**–बारबार, अत्यंत (पुं०) **सर्वतोभद्र**–काव्य-चित्रबंध, गृह (घर) भेद ॥१५॥ नींब वृक्ष (पुं०) **सर्वतोभद्रा**–कंभारी, नटकी स्त्री, (स्त्री०) ॥ ३१६ ॥

॥ इस प्रकार विश्वलोचनकी भाषा टीकामें रान्तवर्ग समाप्त हुवा ॥

---

## अथ लान्तवर्गः ।

### लैक ।

**ल**–इन्द्र ( पुं० )
**ला** दान, मिलना, प्रलय, (पुं०) **लू**–काटनेवाला, ( पुं० ) **लू**–नमक ( स्त्री० ) ॥ १ ॥

### लद्वितीय ।

**अम्ल**–रसभेद ( पुं० )
**अम्ली**–चूका-औषधि ( स्त्री० )
**अलि**–भौंरा ( पुं० ) मदिरा (स्त्री०)
**आलि**–पुल, ॥ २ ॥ सखी, पंक्ति, (स्त्री०) स्वच्छहृदयवाला (त्रि०)
**आलु**–झारी ( स्त्री० ) भेलक ( नदीतैरनेको पूलाआदि ), कन्द, (न० ) ॥ ३ ॥

"Aho Shrutgyanam"

**इला** गोभूमिपीयूषे भारत्यां सौम्ययोषिति ।
**ओलस्तु** सूरणे पुंसि स्यादार्द्रे त्वभिधेयवत् ॥ ४ ॥
**कलस्तु** मधुराव्यक्तशब्देऽजीर्णे **कलं** सिते ।
**कला** तु षोडशांशे स्यादिन्दोरप्यंशमात्रके ॥ ५ ॥
मूलार्थवृद्धौ शिल्पादौ कलनाकालभेदयोः ।
**कलिरन्त्ययुगे** कन्दे कन्दले सुभटे पुमान् ॥ ६ ॥
**कालस्तु** समये मृत्यौ महाकाले यमे शितौ ॥
कृष्णे त्रिष्वथ **काली** स्यात्कालिकामातृभेदयोः ॥ ७ ॥
गौर्यां नवाम्बुदानीके क्षीरकीटापवादयोः ।
**काला** तु कृष्णत्रिवृत्ति नीलीमञ्जिष्ठयोरपि ॥ ८ ॥
**कीला** कफोणिघाते स्यात्कीले शङ्कौ च **कीलवत्** ।
**कुलं** सजातीयगणे गोत्राङ्गगृहनीवृति ॥ ९ ॥

---

**इला**—गौ, भूमि, अमृत, वाणी ( सरस्वती ), बुधग्रहकी स्त्री, ( स्त्री० )

**ओल**—जमीकंद ( पुं० ) गीला (त्रि०) ॥ ४ ॥

**कल**—मधुर और अप्रकट शब्द, ( पुं० ) अजीर्ण ( त्रि० )

**कल**—वीर्य ( न० )

**कला**—सोलहवाँ भाग, चंद्रमाकी कला, ॥ ५ ॥ मूलद्रव्यकी वृद्धि, शिल्पआदि, कलना ( संख्या-जोडना ), कालभेद, ( स्त्री० )

**कलि**—कलियुग, कन्द, कंदल ( नवीन अंकुर ), योद्धा, ( पुं० ) ॥ ६ ॥

**काल**—समय, मत्यु, महाकाल, धर्मराज, नीला रंग, ( पुं० ) काला रंगवाला ( त्रि० )

**काली**—काला रंगवाली, मातृभेद ( देवीभेद ), ( स्त्री० ) ॥ ७ ॥ गौरी, नवीनमेघकी घटा, दुग्धका कीट, निंदा, ( स्त्री० )

**काला**—काली निसोथ, नीली, मँजीठ, ( स्त्री० ) ॥ ८ ॥

**कीला—कील**—कोंहनीसे मारना, अग्नितेज, शंकु (कीला), (स्त्री० पुं०)

**कुल**—सजातीयसमूह, गोत्र, शरीर, घर, देश, ( न० ) ॥ ९ ॥

"Aho Shrutgyanam"

कूलं प्रतीरे सैन्यस्य पृष्ठे स्तूपतडागयोः ।
**कोलो**ऽङ्कपालावुत्सङ्गे क्रोडे भेलकचित्रयोः ॥ १० ॥
खञ्जे **कोलं** तु कुवले **कोला** पिप्पलिचव्ययोः ।
**खलः** शठेऽधमे नीचे त्रिषु स्यात्तु **खलं** भुवि ॥ ११ ॥
**खलं** स्थानेऽपि कल्केऽपि सस्यस्थानेऽपि न द्वयोः ।
**खल्ला** चर्म्मणि निम्नेऽपि वस्त्रभेदेऽपि चातके ॥ १२ ॥
**खल्ली** तु हस्तपादावमर्द्दनाख्यरुजि स्त्रियाम् ।
**खिलं** भवेदप्रहते सारसङ्क्षिप्तवेधसोः ॥ १३ ॥
**गलः** कण्ठे सर्ज्जरसे **गलः** स्कन्धे महीरुहे ।
**गोला** गोदावरीसख्योर्**गोला** पत्राञ्जने मता ॥ १४ ॥
कुनट्यामपि **गोलं** तु मणिके मण्डलेऽपि च ।
**चल**श्**चला**चले कम्पे कमलाविद्युतोश्**चला** ॥ १५ ॥

---

**कूल**–तीर–नदीआदिका, सेनाकी पीठ, बड़ाआदि, तालाब, (न०)
**कोल**–गोदका सिरा या धाय, गोद, सूकर, नदीतरनेका पूलाआदि, चीता औषधि ॥ १० ॥ लँगड़ा, (पुं० )
**कोल**–बेर ( न० )
**कोला**–पीपल, चव्य, ( स्त्री० )
**खल**–मूर्ख, अधम, नीच, ( त्रि० )
**खल**–पृथ्वी, ॥ ११ ॥ स्थान, तिलआदिकी खली, तृणस्थान, (न०)
**खल्ला**–चर्म, खड्डा, वस्त्रभेद, पपीहा ( स्त्री० ) ॥ १२ ॥
**खल्ली**–हाथपैरोंमें अवमर्दन नामका रोग, ( स्त्री० )
**खिल**–नवीन, सारसंक्षिप्त, ( त्रि० ) ब्रह्मा ( पुं० ) ॥ १३ ॥
**गल**–कंठ, रालवृक्ष, कंधा, वृक्ष, (पुं०)
**गोला**–गोदावरी–नदी, सखी, तेजपात, मनसिल, ( स्त्री० )
**गोल**–बड़ाकुंभ, गोल आकारवाला मंडल, ( न० ) ॥ १४ ॥
**चल**–चलनेके स्वभाववाला, काँपना, ( त्रि० )
**चला**–लक्ष्मी, बिजली, ( स्त्री० ) ॥ १५ ॥

"Aho Shrutgyanam"

चालश्छदिषि पुंस्येव चालः स्यात्कम्पनेऽपि च ।
क्लिन्नाक्षितायिनोश्चिल्लश्चिल्ली स्यात्क्षुद्रवास्तुके ॥ १६ ॥

क्लिन्ननेत्रयुते तु स्याच्चिल्लः खुल्लश्च वाच्यवत् ।
चुल्लः क्लिन्नेऽक्षिण चुल्ली तु चितावुद्धानवाद्ययोः ॥ १७ ॥

चेलं स्यादंशुके नीचे गर्हितेप्यभिधेयवत् ।
छल्ली तु वल्कले पुष्पभेदे सन्ततिवीरुधोः ॥ १८ ॥

छलं तु स्खलितेऽपि स्याद्व्याजेऽपि छलमद्वयोः ।
जलं शोकरवे नीरे ह्रीवेरेऽपि जडे त्रिषु ॥ १९ ॥

जालस्तु क्षारकानायगवाक्षे दम्भवृक्षयोः ।
जाली पटोलिकायां स्याज्जालो नीपमहीरुहे ॥ २० ॥

झला स्यादातपस्योर्मौ तथा पुत्रीखुलुकयोः ।
झिल्ली स्यातपरुग्वन्द्यां झीरुकोद्वर्त्तनांशयोः ॥ २१ ॥

---

**चाल**—छप्पर, काँपना ( पुं० )
**चिल्ल**—चिड़पड़ानेत्रवाला, चील्ह—पक्षी ( पुं० )
**चिल्ली**—छोटा बथुवा (स्त्री०) ॥ १६ ॥
**चिल्ल—खुल्ल**-चिड़पड़ानेत्रवाला (त्रि०)
**चुल्ल**—चिड़पड़ानेत्र ( पुं० )
**चुल्ली**—चिता, चूल्हा, बाजा ( स्त्री० ) ॥ १७ ॥
**चेल**—वस्त्र ( न० ) नीच, निंदित, ( त्रि० )
**छल्ली**—वृक्षका बकला, पुष्पभेद, संतति ( संतान ), बेल, ( स्त्री० ) ॥१८॥
**छल**—छलना, बहना, ( न० )
**जल**—शोक का शब्द, पनी, नेत्रबाला, ( न० ) जड ( त्रि० ) ॥ १९ ॥
**जाल**—जवाखार, जाल, जाली झरोखा, दम्भ, वृक्ष, ( पुं० )
**जाली**—परवल—शाक ( स्त्री० )
**जाल**—कदंब—वृक्ष ॥ २० ॥
**झला**—धूपकी लहरी, पुत्री, ( स्त्री० )
**झिल्ली**—आतपकांति, बन्दी, चीरी-कीट, ( स्त्री० )
**झीरुका**—उबटना, विभाग, ( पुं० ) ॥ २१ ॥

"Aho Shrutgyanam"

**तल**स्ताले **तलं** खड्गमुष्टौ ज्याघातवारणे ।
वने चपेटे न स्त्री तु स्वरूपाऽऽधारयोस्**तलम्** ॥ २२ ॥
**तली** तरुण्यां **तल्ल**स्तु विल्ले पुंसि नपुंसके ।
**तालो** द्रुमान्तरेङ्गुष्ठमध्यमाभ्यां च सम्मिते ॥ २३ ॥
गीतकालक्रियाभावे **तालः** खड्गादिमुष्टिषु ।
**तालः** स्यात्कांस्यरचितवाद्यभाण्डान्तरे तथा ॥ २४ ॥
करास्फारे करतले **तालं** तु हरितालके ।
**तुला** राशौ पलशते तुल्यतामानभेदयोः ॥ २५ ॥
बन्धाय गृहदारूणां पीठिकायां सभाजने ।
**तूलः** पिचौ पुमांस्**तूल**माकाशे ब्रह्मदारुणि ॥ २६ ॥
अपद्रव्ये छदोच्छ्रायखण्डे शस्त्रीछदे **दलम्** ।
**डुलिः** पुंसि मुनेर्भेदे कमठ्यां तु स्त्रियां **डुलिः** ॥ २७ ॥

---

**तल**–ताड–वृक्ष ( पुं० ) **तल**–खड्गकी मूठ, धनुषके ज्याघातको रोकनेवाला, वन, थप्पड, ( पुं० न० ) स्वरूप, आधार, ( न० ) ॥ २२ ॥

**तल्ली**–जवान स्त्री ( स्त्री० ) **तल्ल**–हींग ( पुं० न० )

**ताल**–अँगूठा और मध्यमा अँगुलीका प्रमाण, ॥ २३ ॥ गानेकी कालक्रियाका मान, खड्ग आदिकी मूँठ, काँसीका बजानेका पात्र ॥ २४ ॥ दोनों हाथ फैलाकर प्रमाण, ( पुरस ) हथेली, ( पुं० ) हरिताल ( न० )

**तुला**–तुला–राशि, सौ ( १०० ) तोले, तुल्यता, तोलभेद, ॥ २५ ॥ घरका काठ बाँधनेके लिये पीठिका ( चौकीरूप काष्ठ ), सत्कार, ( स्त्री० )

**तूल**–रूईका गीला फोया, ( पुं० )
**तूल**–आकाश, ब्रह्मदारु, ( न० ) ॥ २६ ॥

**दल**–अपद्रव्य ( खराब वस्तु ), पत्ता, ऊँचा, टुकडा, छुरीको निवारण करनेवाला द्रव्य, ( न० )

**डुलि**–मुनिभेद ( पुं० ) **डुलि**–कछवी ( स्त्री० ) ॥ २७ ॥

"Aho Shrutgyanam"

**दोला** यानान्तरे नीलयां **धूलिः** शङ्ख्यान्तरे रजे।
**नलः** पोटगले राज्ञि कपीशे पितृदैवते ॥ २८ ॥
**नली** मनःशिलायां स्यान्नलं तु सरसीरुहे।
पद्मदण्डे न ना **नाला नाली** शाककदम्बके ॥ २९ ॥
**नाला** पानकरङ्कादिरन्ध्रे **नालस्तु** पञ्जरे।
**नीलस्तु** कृष्णवर्णे स्यात्त्रिषु **नीलः** कपीश्वरे ॥ ३० ॥
**नीलो** नगान्तरे कृष्णे **नीलं** वृक्षाङ्कभेदयोः।
**पल्ली** तु कुटयां कुग्रामे **पल्लः** स्थूलकुसूलयोः ॥ ३१ ॥
**पलं** मांसे तथोन्माने **पालिः** पङ्क्तिप्रदेशयोः।
प्रस्थे कर्णलताग्रेंऽशे यूकासश्मश्रुयोषितोः ॥ ३२ ॥
इन्द्रादेर्देयभागे च विश्राम्य चागतज्वरे।
अश्रौ चिह्ने च **पिल्लस्तु** क्लिन्नेऽक्षिण त्रिषु तद्वति ॥ ३३ ॥

---

**दोला**–सवारीभेद ( डोली ), नीली, ( स्त्री० )
**धूलि**–संख्याभेद, रज (धूल), (स्त्री०)
**नल**–कास या देवनल, नल–राजा, वानरोंका राजा, पितृदेव, (पुं०) २८
**नली**–मनसिल (स्त्री०) **नल**–कमल ( न० )
**नाला**–कमलकी डंडी ( स्त्री० न० )
**नाली**–शाकका समूह ( स्त्री० ) ॥ २९ ॥
**नाला**–पीना, हड्डीआदिका छिद्र, ( स्त्री० )
**नाल**–पिंजरा ( पुं० )
**नील**–काला रंग ( त्रि० ) **नील**–कपीश्वर ( पुं० ) ॥ ३० ॥
**नील**–पर्वतभेद, काला द्रव्य, ( पुं० )
**नील**–वृक्ष, अंकभेद, ( न० )
**पल्ली**–कुटिया, कुग्राम, ( स्त्री० )
**पल्ल**–बडा, कुठला, ( पुं० ) ॥ ३१ ॥
**पल**–मांस, उन्मान ( तोल ), चार तोला, ( न० )
**पालि**–पंक्ति, प्रदेश ( स्थल ), ६४ तोला, कर्णलताका अग्रभाग, विभाग, जूं, डाढीमूछोंवाली स्त्री ॥ ३२ ॥ इंद्रआदिको देनेयोग्य भाग, विश्राम करके आयाहुवा ज्वर, कोण चिह्न, ( त्रि० )
**पिल्ल**–चिड़पडा नेत्र, चिडपडानेत्र-वाला, ( त्रि० ) ॥ ३३ ॥

"Aho Shrutgyanam"

पीलुर्द्रुमे गजे पुष्पे काण्डतालास्थिखण्डयोः ।
अणुमात्रेऽप्यथ **पुलः** पुलके विपुले त्रिषु ॥ ३४ ॥
**फलं** तु सस्ये हेत्वर्थे फलके व्युष्टिलाभयोः ।
जातीफलेऽपि कङ्कोले मार्गणाग्रेऽपि न द्वयोः ॥ ३५ ॥
स्यात्**फलं** त्रिफलायां च फलिन्यां तु **फली** स्त्रियाम् ।
**फालं** सीरस्य लौहे स्यात्कर्पासादेश्च वाससि ॥ ३६ ॥
**बलो** हलिनि दैत्येऽङ्गे काके बलिनि वाच्यवत् ।
**बलं** गन्धरसे सैन्ये स्थामनि स्थौल्यरूपयोः ॥ ३७ ॥
**बला** वाट्यालके प्रोक्ता **बलिः** पुंस्यसुरान्तरे ।
बलिश्चामरदण्डेपि करपूजोपहारयोः ॥ ३८ ॥
सैन्धवेपि **बलिः** स्त्री तु जरसा श्लथचर्म्मणि ।
कुक्षिभागविशेषे च गृहकाष्ठान्तरे द्वयोः ॥ ३९ ॥

---

**पीलु**–पीलु ( जाल ) वृक्ष, हस्ती, पुष्प, दंड या बाण, ताडकी गुठलीका टुकडा, अणुमात्र, ( पुं० )

**पुल**–फूलना, विपुल ( बहुत ), ( त्रि० ) ॥ ३४ ॥

**फल**–वृक्षआदिका फल, किसीकारणसे उत्पन्नहुवा, ढाल, फल या समृद्धि, लाभ, जायफल, कंकोल, बाणका अग्रभाग, ( पुं० न० ) ॥ ३५ ॥

**फल**–त्रिफला, ( न० ) **फली**–प्रियंगु–वृक्ष, ( स्त्री० )

**फाल**–हलका लोहा ( कुस ), कपास आदिका वस्त्र, ( न० ) ॥ ३६ ॥

**बल**–बलदेव, एक दैत्य, अंग, काग, ( पुं० ) बलवान ( त्रि० )

**बल**–गोपरस, सेना, स्थिरभाव, मोटापन, रूप, ( न० ) ॥ ३७ ॥

**बला**–खरैंहटी ( स्त्री० )

**बलि**–असुरभेद ( बलि ), चँवरकी डाँडी, राजाका कर, पूजामें भेट ॥ ३८ ॥ सेंधा–नमक, ( पुं० )

**बलि**–वृद्धता करके शिथिलहुवा शरीरचर्म ( स्त्री० ) उदरका एक भाग, घरका काष्ठभेद, ( न० ) ॥ ३९ ॥

"Aho Shrutgyanam"

**वल्ली** स्यादजमोदायां लतायां कुसुमान्तरे ।
**बालः** पुंसि शिशौ केशे वाजिवारणबालधौ ॥ ४० ॥
मूर्खेऽपि **बालो** **बालं** तु ह्रीबेरे पुंनपुंसकम् ।
**बिलं** गुहायां रन्ध्रे च **बिलस्त्विन्द्रहये** पुमान् ॥ ४१ ॥
**वेला** कालेऽपि सीमायामीश्वराणां च भोजने ।
दत्तमांसेऽ**धिवेला** स्यात्पयोनाशेऽपि नीरधेः ॥ ४२ ॥
तन्नीरेऽक्लिष्टमरणे राशौ वाचि बुधस्त्रियाम् ।
**भल्लो** वाणेऽपि भल्लूके **भल्ली** भल्लातबाणयोः ॥ ४३ ॥
**भालं** तु न द्वयोरेव ललाटमहसोर्मतम् ।
ऋषिभेदे प्लवे **भेलो** **भेलं** भीरुहृदि त्रिषु ॥ ४४ ॥
**मल**स्त्रिष्वेव कृपणे न स्त्री विट्किट्टकिल्बिषे ।
**मल्लः** पात्रे कपाले च मत्स्यभेदे कपालिनि ॥ ४५ ॥

---

**वल्ली**–अजमोद, बेल, पुष्पभेद (स्त्री०)
**बाल**–शिशु (छोटा लडका), (त्रि०) केश ( बाल ), घोडे और हस्तीका केशसमूहयुक्त पूँछ, (पुं०) ॥४०॥ मूर्ख ( त्रि० )
**बाल**–नेत्रवाला ( पुं० न० )
**बिल**–गुफा, छिद्र, ( न० ) **बिल**-इंद्रका अश्व ( उच्चैःश्रवा ) ( पुं० ) ॥ ४१ ॥
**वेला**–काल, सीमा, राजाआदिकोंका भोजन, दत्तमांस (दियाहुवा मांस),
**अधिवेला**–समुद्रके जलका नाश, समुद्रका जल, एकांतका मरण, राशि ( समूह ), वाणी, बुधकी स्त्री, ( स्त्री० ) ॥ ४२ ॥
**भल्ल**–वाण ( भाला ), रीछ, ( पुं० )
**भल्ली**–भिलावा, बाण ( भाला ), ( स्त्री० ) ॥ ४३ ॥
**भाल**–मस्तक, (ललाट), तेज, (न०)
**भेल**–ऋषिभेद, छोटी नौका, ( पुं० )
**भेल**–डरपोकहृदय (त्रि०) ॥ ४४ ॥
**मल**–कृपण ( कंजूस ) ( त्रि० )
**मल**–विष्ठा, कानआदिका मल, पाप, ( पुं० न० )
**मल्ल**–पात्र, कपाल, मत्स्यभेद, कपालवाला, ( पुं० ) ॥ ४५ ॥

"Aho Shrutgyanam"

**मल्लो** बलाढ्ये सुभगे **मल्ली** तु कुसुमान्तरे ।
**मालुः** पत्रलतायां स्याद्वनितायामपि स्त्रियाम् ॥ ४६ ॥
**मालं** क्षेत्रे जने **मालो** **माला** पुष्पादिदामनि ।
**मूल**माद्यशिफापार्श्वकुञ्जे मूलेऽपि तारके ॥ ४७ ॥
मसिमेलकयो**र्मेला** **मौलि**र्धम्मिल्लचूडयोः ।
किरीटेऽपि द्वयोरेव पुंसि वञ्जुलपादपे ॥ ४८ ॥
**लीला** हावान्तरे स्त्रीणां केलौ खेलाविलासयोः ।
**लोला** जिह्वाश्रियो**र्लोलः** सतृष्णचलयोस्त्रिषु ॥ ४९ ॥
**व्यालः** शठे भुजङ्गे च श्वापदे दुष्टदन्तिनि ।
**शलं** तु शल्लकीलोम्नि **शलो** भृङ्गिगणे विधौ ॥ ५० ॥
**शालो** मत्स्यान्तरे वृक्षसामान्ये हालभूभुजि ।
**शाला** वेश्मनि वेश्मैकप्रदेशे स्कन्धशाखयोः ॥ ५१ ॥

---

**मल्ल**–पहलवान, अच्छे ऐश्वर्यवाला, ( पुं० )

**मल्ली**–पुष्पभेद, ( मोतिया–भेद ) ( स्त्री० )

**मालु**–पान–बेल, स्त्री, (स्त्री०) ॥४६॥

**माल**–क्षेत्र, ( न० )

**माल**–जन ( पुं० )

**माला**–पुष्पआदिकी लडी, ( स्त्री० )

**मूल**–आदिमें होनेवाला, वृक्षकी जड, समीप, कुंज ( लताकुटी ), मूल-नक्षत्र ( न० ) ॥ ४७ ॥

**मेला**–स्याही ( अंजन ), मिलना ( स्त्री० )

**मौलि**–केशवेश, चोटी, मुकुट ( पुं० स्त्री०) अशोक-वृक्ष (पुं०) ॥ ४८ ॥

**लीला**–स्त्रियोंका हावभेद, क्रीडा, खेलना कूदना, विलास, ( स्त्री० )

**लोला**–जीभ, लक्ष्मी, ( स्त्री० )

**लोल**–तृष्णावाला, चंचल ( त्रि० ) ॥ ४९ ॥

**व्याल**–शठ ( मूर्ख ), सर्प, वनजीव, खोटाहस्ती ( पुं० )

**शल**–सेहकी शूल ( न० ) भृंगिनामका गण, चंद्रमा ( पुं० ) ॥ ५० ॥

**शाल**–मत्स्यभेद, वृक्षमात्र, हाल नामका राजा, ( पुं० )

**शाला**–मकान, मकानका एक हिस्सा, डाहला, शाखा ( टहनी ) ( स्त्री० ) ॥ ५१ ॥



"Aho Shrutgyanam"

**शालुः** कषायद्रव्येपि **शालुश्चो**राख्यभेषजे ।
मतः **शालिः** पुमान् गन्धमार्जारे कलमादिषु ॥ ५२ ॥
**शिला** कुनट्यां द्वाराधोदारुणि ग्रावणि स्त्रियाम् ॥
**शिल**मुञ्छशिले क्लीबं गण्डूपद्यां **शिली** मता ॥ ५३ ॥
**शीलं** स्वभावे सद्वृत्ते **शुक्लो** धवलयोगयोः ।
**शुक्लं** तु रूप्यके **शुक्लो** त्रिषु शुक्लगुणान्विते ॥ ५४ ॥
**शूलं** मृत्यौ ध्वजे ना तु योगे न स्त्री रुगस्त्रयोः ।
**शूला** तु पण्ययोषायां दुष्टनाशाय कीलकः ॥ ५५ ॥
**शैलः** क्ष्माभृति **शैलं** तु शैलेये तार्क्ष्यशैलके ।
**शालः** स्याद्वरणे हाले पादपे सर्जपादपे ॥
**स्थालं** भाजनभेदे स्या**त्स्थाली** स्यात्पाटलोखयोः ॥ ५६ ॥

---

**शालु**—कसैला द्रव्य, असवरग या भटेउर औषधि ( पुं० )
**शालि**—गंधमार्जार, ( गंधविलाव ) कलम ( साँठी चावल ) ( पुं० ) ॥ ५२ ॥
**शिला**—मनशिल, द्वारके नीचेका काष्ठ, पत्थर ( शिला ) ( स्त्री० )
**शिल**—उंछ ( दुकानआदिसे पड़ा ) अन्नका इकट्ठाकरना, खेतमें से अन्न लेना, ( न० )
**शिली**—गिँडोवा, ( स्त्री० ) ॥ ५३ ॥
**शील**—स्वभाव, श्रेष्ठवृत्तांत, ( न० )
**शुक्ल**—श्वेत ( सफेद ), योग ( पुं० )
**शुक्ल**—चाँदी ( न० )
**शुक्ल**—सफेदरंगवाला ( त्रि० ) ॥५४॥
**शूल**—मृत्यु, ( न० ) ध्वजा, योग ( पुं० ) रोग, अस्त्र ( पुं० न० )
**शूला**—वेश्या, दुष्टोंके मारनेकेलिये कीला ( शूली ) ( स्त्री० ) ॥ ५५ ॥
**शैल**—पर्वत, ( पुं० )
**शैल**—शिलाजीत, रसोत ( न० )
**साल**—सखुवा वृक्ष, साल वृक्ष, रालका वृक्ष ( पुं० ) ।
**स्थाल**—पात्रभेद (थाल), **स्थाली**—पाठरि, बटलोई ( स्त्री० ) ॥ ५६ ॥

"Aho Shrutgyanam"

**स्थूल**स्तु वाच्यवत्पीने कूटनिष्प्रज्ञयोरपि ।
**हाला** मद्ये नृपे **हालो हेला**ऽवज्ञाविलासयोः ॥ ५७ ॥

लतृतीयम् ।

स्याद**ङ्गुली** तु मातङ्गकर्णिकाकरशाखयोः
**अचलः** पर्वते कीले निश्चलेऽप्य**चला** भुवि ॥ ५८ ॥
**अञ्जलिः** पुंसि कुडवे करसंपुटकेऽ**ञ्जलिः** ।
**अनलो** वसुभेदेऽग्नावनि**लो** वसुवातयोः ॥ ५९ ॥
**अवेलः** पूगरागेऽपि स्वतोयचशालयोः ।
अपलापेऽप्य**वेलं** स्या**दवेला** पूगचूर्णयोः ॥ ६० ॥
**अमला** कमलायां स्या**दमलं** विशदेऽभ्रके ।
स्या**दरालः** पुमान्सर्जे मत्तेभे कुटिलेऽन्यवत् ॥ ६१ ॥

---

**स्थूल**–मोटा ( त्रि० ) ढेर, बुद्धिहीन, ( पुं० )

**हाला**–मदिरा, ( स्त्री० )

**हाल**–एकराजा ( पुं० )

**हेला**–तिरस्कार, स्त्रियोंका विलास ( स्त्री० ) ॥ ५७ ॥

**लतृतीय ।**

**अंगुली**–हस्तीकी कर्णिका ( सूँड ), हाथकी शाखा ( अंगुली ) (स्त्री०)

**अचल**–पर्वत, कीला, निश्चल ( नहीं चलनेवाला ) ( पुं० )

**अचला**–पृथ्वी ( स्त्री० ) ॥ ५८ ॥

**अंजलि**–कुडव ( १६ तोला ), हाथोंका संपुट ( अंजलि ) ( पु० )

**अनल**–वसुभेद, अग्नि, ( पुं० )

**अनिल**–वसु, वायु ( पुं० )॥ ५९ ॥

**अवेल**–सुपारीका रंग,..... ( पुं० )

**अवेल**–गोप्य ( न० )

**अवेला**–सुपारी, चूना ( स्त्री० ) ॥ ६० ॥

**अमला**–लक्ष्मी, ( स्त्री० )

**अमल**–निर्मल ( त्रि० ) भोडल ( न० )

**अराल**–राल–वृक्ष, उन्मत्त हस्ती ( पुं० ) कुटिल ( त्रि० ) ॥६१॥

"Aho Shrutgyanam"

अन्तःकपाटयोर्दण्डे कल्लोलेऽप्यर्गलं त्रिषु ।
**आभीलं** न द्वयोः कष्टे त्रिष्वाभीलं भयानके ॥ ६२ ॥
मृगशीर्षशिरस्तारास्विल्वलाः स्युरथेल्वलः ।
मीने दैत्यप्रभेदे च शृङ्गार **उज्वलः** पुमान् ॥ ६३ ॥
**उज्ज्वलो** वाच्यवद्दीप्ते परिव्यक्तविकाशिषु ।
**उत्तालो** मर्कटे श्रेष्ठे विकरालोत्कटे त्रिषु ॥ ६४ ॥
**उत्पलं** कुवले कुष्ठे निर्म्मांसे तु त्रिषूत्पलम् ।
**उत्फुल्लः** करणे स्त्रीणामुत्ताने विकचेऽन्यवत् ॥ ६५ ॥
**उत्ताल** उद्गते श्रेष्ठेप्यूर्ध्वनालेऽपि वाच्यवत् ।
**उपला** शर्करायां स्यादुपलो ग्रावरत्नयोः ॥ ६६ ॥
**कदली**भपताकायां पताकायां मृगान्तरे ।
रम्भायां चाथ **कदली** पृश्न्यां डिम्ब्यां च शाल्मलौ ॥ ६७ ॥

---

**अर्गल**–भीतरका किवाडोंका डंडा ( अरली ), तरंग ( त्रि० )
**आभील**–कष्ट ( न० ) भयानक ( त्रि० ) ॥ ६२ ॥
**इल्वला**–मृगशिरनक्षत्रके शिरऊपरकी तारा, ( स्त्री० )
**इल्वल**–मच्छी, दैत्यभेद, ( पुं० )
**उज्वल**–शृंगार ( पुं० ) ॥ ६३ ॥
**उज्ज्वल**–दीप्त, प्रकट, प्रकाशवाला ( त्रि० )
**उत्ताल**–बन्दर, श्रेष्ठ, विकराल ( भयंकर ), उत्कट ( तेज ) ( त्रि० ) ॥ ६४ ॥
**उत्पल**–कमल या बदरीफल ( बेर ) ( न० ) मांसरहित ( त्रि० )
**उत्फुल्ल**–स्त्रियोंका कारण ( हाव ) भावादि ( पुं० ) सीधा, खिला-हुवा ( त्रि० ) ॥ ६५ ॥
**उत्ताल**–ऊपरको प्राप्त, श्रेष्ठ, ऊपरकी नालवाला ( त्रि० )
**उपला**–शर्करा ( शक्कर ) ( स्त्री० )
**उपल**–पत्थर, रत्न ( पुं० ) ॥६६॥
**कदली**–हस्तीकी ध्वजा, ध्वजामात्र, मृगभेद, केला, पृश्नि ( एडी ), मारी, साल-वृक्ष, ( स्त्री० ) ॥ ६७ ॥

"Aho Shrutgyanam"

**कन्दलं** कलहे युद्धे नवाङ्कुरकपालयोः ।
कलध्वनौ चाथ तरौ मृगभेदेऽपि **कन्दली** ॥ ६८ ॥
**कपिलो** मुनिभेदेऽग्नौ शुनि पिङ्गे तु वाच्यवत् ।
**कपिला** शिंशपागोत्रभिद्वह्निदिग्दन्तयोषिति ॥ ६९ ॥
रेणुकायां च **कपिला कपालो**ऽस्त्री शिरोस्थनि ।
घटादिशकले कुष्ठरोगभेदे व्रजेऽपि च ॥ ७० ॥
**कमलं** जलजे नीरे क्लोम्नि तोषे च भेषजे ।
**कमलो** मृगभेदे स्यात्**कमला** श्रीवरस्त्रियाम् ॥ ७१ ॥
**कम्बलो** नागराजे ना सास्नायां च कुथे कृमौ ।
अपि स्यादुत्तरासङ्गे क्लीबं पयसि **कम्बलम्** ॥ ७२ ॥
**करालो** दन्तुरे तुङ्गे भीषणेऽप्यभिधेयवत् ।
**करालो** धूनतैले स्यात्**करालं** तु कुठेरके ॥ ७३ ॥

---

**कंदल**–कलह, युद्ध, नवीन अंकुर, कपाल, मधुरध्वनि ( न० )

**कन्दली**–केला, मृगभेद ( स्त्री० ) ॥ ६८ ॥

**कपिल**–कपिल–मुनि, अग्नि, कुत्ता, ( पुं० ) कपिलवर्णवाला ( त्रि० )

**कपिला**–सीसम-वृक्ष, पर्वतभेद, अग्निकोणके हाथीकी हथनी (स्त्री०) ॥ ६९ ॥

**कपिला**–रेणुका, ( स्त्री० )

**कपाल**–शिरकी खोपरी, घडाआदिका टुकडा, कुष्ठरोग-भेद, समूह ( पुं० न० ) ॥ ७० ॥

**कमल**–कँवल, जल, फेफडा, संतोष, औषधि ( न० )

**कमल**–मृगभेद, ( पुं० )

**कमला**–लक्ष्मी, श्रेष्ठ स्त्री, ( स्त्री० ) ॥ ७१ ॥

**कंबल**–नागराज, गौके गलकी चर्म, हस्तीकी पीठपर बिछानेका कपडा, कृमि, डुपट्टा, ( पुं० )

**कंबल**–जल ( न० ) ॥ ७२ ॥

**कराल**–बड़ेदाँतोंवाला, ऊँचा, भयंकर ( त्रि० )

**कराल**–रालका तेल, ( पुं० )

**कराल**–सफेदवनतुलसी ( न० ) ॥ ७३ ॥

"Aho Shrutgyanam"

**कल्लोलः** स्यात उल्लोलः प्रमोदपरिपन्थिषु ।
**काकोलो** द्रोणकाके स्याद्विषभेदकुलालयोः ॥ ७४ ॥
अपि **काकोलकाकोल्यौ** स्यातामोषधिभेदयोः ।
**काकीलस्तु** कलाजीवे कामकेलिप्रणालयोः ॥ ७५ ॥
अपाश्रयमनोहारितरुच्छायार्थकोप्ययम् ।
**कामलः** कामुके रोगभेदे मरुवसन्तयोः ॥ ७६ ॥
**काहली** तु तरुण्यां स्यात्**काहलं** भृशशुष्कयोः ।
**काहला** वाद्यभाण्डस्य विशेषे **काहलः** खले ॥ ७७ ॥
**किट्टालस्**ताम्रकलशे लोहगूथेऽप्ययं पुमान् ।
**कीलालं** रुधिरेऽपि स्यात्पानीयेऽपि नपुंसकम् ॥ ७८ ॥
**कुकूलं** शङ्कुसङ्कीर्णश्वभ्रे पुंसि तुषानले ।
**कुचेला** विद्धकर्ण्यां स्यात्**कुचेलो** मलिनांशुके ॥ ७९ ॥

---

**कल्लोल**—भारीतरंग, आनंद, शत्रु, ( पुं० )
**काकोल**—कागभेद, विषभेद कुम्हार ( पुं० ) ॥ ७४ ॥
**काकोल—काकोली**—औषधिभेद ( क्रमसे पुं० स्त्री० )
**काकील**—कलासे आजीविका करनेवाला, कामकेलि, प्रणालि ( जलनिर्गमस्थान ) ( पुं० ) ॥ ७५ ॥ आश्रयरहित, सुंदर वस्तु, वृक्षछाया ( पुं० )
**कामल**—कामी पुरुष, रोगभेद, मरुस्थल, वसंत—ऋतु ( पुं० ) ७६ ॥
**काहली**—जवान स्त्री, ( स्त्री० )
**काहला**—अत्यंत, सूखा ( न० )
**काहला**—वाद्यभांडभेद ( स्त्री० )
**काहल**—खल—पुरुष ( पुं० ) ॥७७॥
**किट्टाल**—ताम्रकलश, लोहेका मल, ( पुं० )
**कीलाल**—रुधिर, जल ( न० ) ॥ ७८ ॥
**कुकूल**—शंकु ( कीलाआदि ) सेकियाहुवा खड्डा, तुषका अग्नि ( पुं० )
**कुचेला**—सोनापाठा ( स्त्री० )
**कुचेल**—मलिनवस्त्रोंवाला ( त्रि० ) ॥ ७९ ॥

"Aho Shrutgyanam"

**कुटिलं** वाच्यवद्दुर्गे **कुटिला** निम्नगान्तरे ।
**कुण्डलं** कर्णभूषायां तथा वलयपाशयोः ॥ ८० ॥
काञ्चनद्रौ गुडूच्यां च **कुण्डली** वर्तते स्त्रियाम् ।
**कुद्दालो** युगपत्रे स्यात्**कुद्दालो** भूमिदारणे ॥ ८१ ॥
**कुन्तलाः** स्युर्जनपदे देशे केशे च **कुन्तलः**
**कुन्तलो** लाङ्गलेऽपि स्याद्यवे भालेऽपि दृश्यते ॥ ८२ ॥
श्लोकच्छायाहरे चौरे श्याले मीने च **कुम्भिलः** ।
**कुरलः** पक्षिभेदे स्यात्**कुरल**श्चूर्णकुन्तले ॥ ८३ ॥
**कुलालः** कुम्भकारेऽपि कुक्कुभे कौशिकेपि च ।
**कुवलं** तूत्पले मुक्ताफलेऽपि बदरीफले ॥ ८४ ॥
**कुशलं** धर्मपर्याप्तिक्षेमेषु त्रिषु शिक्षिते ।
वाच्यवत्**केवल**स्त्वेककृत्स्नयोः कुहनेऽपि च ॥ ८५ ॥

---

**कुटिल**–दुर्गमस्थानआदि ( त्रि० )

**कुटिला**–नदी, ( स्त्री० )

**कुंडल**–कर्णोंका आभूषण, कंकण, पाश ( फाँशी ) ( न० ) ॥ ८० ॥

**कुंडली**–सुवर्णवृक्ष ( नागकेसर ), गिलोय, ( स्त्री० )

**कुद्दाल**–कचनार, खुदाल ( पुं० ) ॥ ८१ ॥

**कुन्तल**–जनपद देशभेद ( पुं० बहुवचनान्त ) **कुंतल**–केश (बाल), हल, जव, भाला, ( पुं० ) ॥८२॥

**कुंभिल**–श्लोककी छायाहरनेवाला, चोर, साला, मच्छ, ( पुं० )

**कुरल**–पक्षिभेद, जुल्फके बाल,(पुं०) ॥ ८३ ॥

**कुलाल**–कुम्हार, वनमुर्गी, उल्लू-पक्षी ( पुं० )

**कुवल**–कमल, मोती, बेर ( न० ) ॥ ८४ ॥

**कुशल**–धर्म, सामर्थ्य, क्षेम, (न०)

**कुशल**–शिक्षित ( त्रि० )

**केवल**–एक, संपूर्ण ( त्रि० ) कुहन ( ठगनेकेलिये तपआदि करनेवाला) ( पुं ) ॥ ८५ ॥

"Aho Shrutgyanam"

निर्णीते **केवलं** ज्ञानभेदे स्यात्**केवली** न ना ।
मतः कौ वारिके केशद्रुमजातेऽपि **कैशिलः** ॥ ८६ ॥
**कोमलं** मृदुले नीरे मुनौ मद्ये च **कोहलः** ।
**गन्धोली** वरटायां स्याद्भद्राशट्योरपि स्मृता ॥ ८७ ॥
विषे मानेऽपि **गरलं गरलं** तृणपूलके ।
**गोकिलो** मुसले सीरे **गोपालो** गोपभूपयोः ॥ ८८ ॥
**गौरिलो** लोहचूर्णे स्याद्**गौरिलो** गौरसर्षपे ।
**ग्रन्थिल**स्त्रिषु संग्रन्थौ ना करीरे विकङ्कते ॥ ८९ ॥
**चञ्चला** च तडिल्लक्ष्म्योश्**चञ्चल**श्चलकामिनोः ।
वाते पुंस्यथ **चत्वालः** स्याद्गर्भे हेमकुण्डले ॥ ९० ॥
**चन्द्रिल**श्चन्द्रमौलौ च वास्तूके नापितेऽपि च ।
**चपलः** क्षणिके शीघ्रे चञ्चलेऽप्यभिधेयवत् ॥ ९१ ॥

---

**केवल**–निर्णयकियाहुवा, ( न० )
**केवली** ज्ञानभेद ( स्त्री० )
**कैशिल**–पृथ्वी, जल, केशसमूह, वृक्षसमूह ( पुं० ) ॥ ८६ ॥
**कोमल**–सुकुमार, जल, ( न० )
**कोहल**–मुनि, मद्य ( पुं० )
**गन्धोली**–हंसी, पीपलरायसनआदि, कचूर ( स्त्री० ) ॥ ८७ ॥
**गरल**–विष, प्रमाण, तृणका पूला ( न० )
**गोकिल**–मूसल, हल ( पुं० )
**गोपाल**–गोप, राजा ( पुं० )॥८८॥
**गौरिल**–लोहचूर्ण, सफेद-सरसों ( पुं० )
**ग्रंथिल**–गाँठोंवाला, ( त्रि० ) कैर-वृक्ष, कटाई या विकंकत–वृक्ष ( पुं० ) ॥ ८९ ॥
**चंचला**–बिजली लक्ष्मी ( स्त्री० )
**चंचल**–चलायमान, कामी ( पुं० )
**चत्वाल**–वायु, गर्भ, सुवर्ण–कुंडल ( पुं० ) ॥ ९० ॥
**चंद्रिल**–महादेव, बथुवा–शाक, नाई ( पुं० )
**चपल**–अस्थिर बुद्धिवाला, शीघ्रता-वाला, चंचल, ( त्रि० ) ॥ ९१ ॥

"Aho Shrutgyanam"

**चपलः** पारदे मीने शिलाभेदेऽपि चोरके ।
**चपला** कमला विद्युत्पुंश्चलीपिप्पलीष्वपि ॥ ९२ ॥
**चूडाला** चक्रलायां स्याद्वाच्यवच्चूडयान्विते ।
**छगली** छागयोषायां **छगली** वृद्धदारके ॥ ९३ ॥
**छगलस्तु** मतश्छागे **छगलं** नीलवाससि ।
**जगलो** मेदके मद्ये कैतवे मदनद्रुमे ॥ ९४ ॥
**जङ्गलस्त्रिषु** निर्वारिदेशेऽस्त्री **जङ्गलं** पले ।
**जटिलस्तु** जटायुक्ते **जटिला** मांसिकौषधौ ॥ ९५ ॥
**जम्भलः** पुंसि जम्बीरे **जम्भलो** देवतान्तरे ।
**जम्बूलो** जम्बुविटपे **जम्बूलः** क्रकचच्छदे ॥ ९६ ॥
**जम्बालः** शैवले पङ्के **जाङ्गलस्तु** कपिञ्जले ।
वाच्यवज्जङ्गलोद्भूते शूकशिम्ब्यां तु **जाङ्गली** ॥ ९७ ॥

---

**चपल**–पारा, मच्छ, शिलाभेद, चोर, ( पुं० )
**चपला**–लक्ष्मी, बिजली, पुंश्चली स्त्री, पीपल, ( स्त्री० ) ॥ ९२ ॥
**चूडाला**–निर्विषी-घास, ( स्त्री० ) चोटीवाला ( त्रि० )
**छगली**–बकरी, भिदारा-औषधि ( स्त्री० ) ॥ ९३ ॥
**छगल**–बकरा ( पुं० )
**छगल**–नीला वस्त्र ( न० )
**जगल**–मेदक ( जगल ), मदिरा, कपट, मौलसिरी या मैनफल-वृक्ष ( पुं० ) ॥ ९४ ॥
**जंगल**–जलरहितदेश ( त्रि० )
**जंगल**–मांस ( पुं० न० )
**जटिल**–जटावाला, ( त्रि० )
**जटिला**–जटामांसी-औषधि ( स्त्री० ) ॥ ९५ ॥
**जम्भल**–जंबीरी-नीबू, देवताभेद ( पुं० )
**जंबूल**–जामन–वृक्ष, शाक–वृक्ष ( पुं० ) ॥ ९६ ॥
**जम्बाल**–सिवाल, कीच, ( पुं० )
**जांगल**–कपिंजल–पक्षी, ( पुं० ) जंगलमें होनेवाला ( त्रि० )
**जांगली**–कौंचकी फली ( स्त्री० ) ॥ ९७ ॥

"Aho Shrutgyanam"

**जाङ्गुली** विषविद्यायां **जाङ्गुलं** जालिनीफले ।
स्या**त्तण्डुल**स्तु धान्यादिनिकरेऽपि विडङ्गके ॥ ९८ ॥
**तमालः** खड्गे तापिच्छे तिलके वरुणद्रुमे ।
**तरल**श्चञ्चले खड्गे भासुरे त्रिषु पुंसि तु ॥ ९९ ॥
हारमध्यमणौ मद्ययवाग्वो**स्तरला** स्त्रियाम् ।
**ताम्बूली** नागवल्ल्यां स्या**त्ताम्बूलं** क्रमुके मतम् ॥ १०० ॥
**तुमुलं** रणसङ्घट्टे **तुमुल**स्तु कलिद्रुमे ।
**तैतिलो** गण्डके पुंसि **तैतिलं** करणान्तरे ॥ १०१ ॥
**दुकूल**मद्वयोः क्षौमे **दुकूलः** सूक्ष्मवाससि ।
**धवलः** सुन्दरे श्वेते त्रिषु पुंसि महावृषे ॥ १०२ ॥
**धवली** सौरभेय्यां स्या**न्नकुलः** पाण्डवान्तरे ।
बभ्रौ च **नकुली** तु स्यात्कुक्कुटयां मांसिकौषधौ ॥ १०३ ॥

---

**जांगुली**—विषविद्या ( स्त्री० )
**जांगुल**—झिमनी तोरईके फल (न०)
**तंडुल**—धान्यआदिका समूह, बायविडंग ( पुं० ) ॥ ९८ ॥
**तमाल**—खड्ग, तमाल—वृक्ष, तिलक—पुष्पवृक्ष, बरना—वृक्ष ( पुं० )
**तरल**—चंचल, खड्ग, ( पुं० ) तेजवाला ( त्रि० ) ॥ ९९ ॥
हारकी मध्यमणि, ( पुं० )
**तरला**—मदिरा, यवागू ( पतला रँधा हुवा अन्न ( स्त्री० )
**तांबूली**—नागरबेल, ( स्त्री० )
**तांबूल**—सुपारी ( न० ) ॥ १०० ॥
**तुमुल** रणसंघट्ट ( रणसमूह, ) (न०)
**तुमुल**—बहेडा—वृक्ष ( पुं० )
**तैतिल**—गैंडा ( पुं० )
**तैतिल**—करण ( न० ) ॥ १०१ ॥
**दुकूल**—रेशमीवस्त्र ( न० )
**दुकूल**—बारीकवस्त्र ( पुं० )
**धवल**—सुंदर, श्वेत ( सफेद ) (त्रि०) बडाबैल ( पुं० ) ॥ १०२ ॥
**धवली**—गौ, ( स्त्री० )
**नकुल**—एक पांडव, नौला ( पुं० )
**नकुली**—सेमर—वृक्ष, जटामांसी ( औषधि ) ( स्त्री० ) ॥ १०३ ॥

"Aho Shrutgyanam"

**नाकुली** कुक्कुटीकन्दे **नाकुली** चव्यरास्नयोः ।
**नाभीलं** नाभिगर्भाण्डे वङ्क्षणे चोत्तमस्त्रियः ॥ १०४ ॥
**निचुलस्तु** निचोले स्या**न्निचुलो** हिज्जलद्रुमे ।
निर्म्माल्येऽप्यभ्रके क्लीबं विमले त्रिषु **निर्मलम्** ॥ १०५ ॥
**निष्कलस्तु** कलाशून्ये नष्टबीजेऽपि वाच्यवत् ।
**निष्कला** तु मता तस्यां या नारी विगतार्त्तवा ॥ १०६ ॥
वर्तुलेऽपि चलेऽपि स्या**न्निस्तलं** वाच्यलिङ्गकम् ।
**नैपाली** नवमाल्यां स्यात्कुनटीसुवहाख्ययोः ॥ १०७ ॥
**पञ्चाली** पुत्रिकागीत्योः **पञ्चालो** जनदेशयोः ।
**पटलं** तु छदिर्नेत्ररुक्पिटके परिच्छदे ॥ १०८ ॥
न पुंसि वृन्दे **पटलं** **पटोलं** कर्कशच्छदे ।
**पटोलं** वस्त्रभेदे स्याज्ज्योत्स्निकायां **पटोल्यपि** ॥ १०९ ॥

---

**नाकुली**–कुकुटीकंद, चव्य, रायसन ( स्त्री० )

**नाभील**–श्रेष्ठस्त्रीकी नाभि ( टूंडी )के भीतरका अंडा, जंघा की संधि ( न० ) ॥ १०४ ॥

**निचुल**–अंगरखा,हिज्जल (जलवेत)का भेद ( पुं )

**निर्मल**–निर्माल्य ( भोगीहुईवस्तु ), भोडल, ( न० ) मलरहित (त्रि०) ॥ १०५ ॥

**निष्कल**–कलारहित, नष्टबीज ( नष्टवीर्य ) पुरुषआदि ( त्रि० )

**निष्कला**–रजस्वलाहोनेसे बंदहुई स्त्री ( स्त्री० ) ॥ १०६ ॥

**निस्तल**–गोल आकार, चल ( अस्थिर ) ( त्रि० )

**नैपाली**–नेवारी, मनसिल, काले फूलवाली निर्गुंडी ( स्त्री० ) ॥ १०७ ॥

**पंचाली**–पुतली, गीति, ( स्त्री० )

**पंचाल**–जन, देश ( पुं० )

**पटल**–परदा, नेत्ररोग, पिटारी, ढकना, ( न० ) ॥ १०८ ॥

**पटल**–समूह ( स्त्री० न० )

**पटोल**–परवल, वस्त्रभेद, ( न० )

**पटोली**–सफेद फूलकी तोरई या रेणुका ( स्त्री० ) ॥ १०९ ॥

"Aho Shrutgyanam"

तिलचूर्णे पले पङ्के **पललं** राक्षसे पुमान् ।
**पाकलं** कुष्ठभैषज्ये **पाकलः** कुञ्जरज्वरे ॥ ११० ॥
कुटपूर्वश्च तत्रैव नवपाके तु **पाकली** ।
**पाचलो** राधनद्रव्ये दहने पवनेऽपि च ॥ १११ ॥
**पाटला** पाटलितरौ पुष्पे स्यात्पाटला न ना ।
**पाटली** पाटलायां स्यादाशुव्रीहौ तु **पाटलः** ॥ ११२ ॥
**पाटलः** श्वेतरक्तेऽपि तद्वति त्रिषु **पाटलम्** ।
**मृत्पात्रभेदे** वामायां वागुरायां च **पातिली** ॥ ११३ ॥
**पातालं** भूतलेऽप्यौर्वे बन्धक्यां भुवि **पांशुला** ।
**पांशुलः** पुंश्चले शम्भुखट्वाङ्गे पांशुसंयुते ॥ ११४ ॥
**पिङ्गलो** मुनिभेदेऽग्नौ चण्डांशोः पारिपार्श्विके ।
निधिभेदे कपौ रुद्रे **पिङ्गलः** कपिलेऽन्यवत् ॥ ११५ ॥

---

**पलल**–तिलचूर्ण, पल ( कालमान ) कीच ( न० )
**पलल**–राक्षस, ( पुं० )
**पाकल**–कूट-औषधि, ( न० )
**पाकल**–हस्तीका ज्वर ( पुं० ) ॥ ११० ॥
**कुटपाकल**–हस्तीका ज्वर ( पुं० )
**पाकली**–नवीन–पाक ( स्त्री० )
**पाचल**–राधन ( सिद्ध ) द्रव्य, अग्नि, पवन, ( पुं० ) ॥ १११ ॥
**पाटला**–पाढर–वृक्ष, पाडलके पुष्प ( स्त्री० न० )
**पाटली**–मोखा या पाढल, ( स्त्री० )
**पाटल**–आशुधान ( पुं० )॥ ११२ ॥
**पाटल**–श्वेतमिश्रित रक्तवर्ण, ( पुं० ) श्वेतरक्तवर्णवाला ( त्रि० )
**पातिली**–मिट्टीके पात्रका भेद, स्त्री-भेद, मृगबंधिनी (बावर) (स्त्री०) ॥ ११३ ॥
**पाताल**–पृथ्वीका तलभाग, वडवानल ( पुं० )
**पांशुला**–व्यभिचारिणी स्त्री, पृथ्वी ( स्त्री० )
**पांशुल**–व्यभिचारी-पुरुष, शिवका खट्वांग ( पु० ) धूलियुक्त ( त्रि०) ॥ ११४ ॥
**पिंगल**–मुनिभेद, अग्नि, सूर्यका समीपवर्ती, निधिभेद, बंदर, रुद्र, ( पुं० ) पिंगलवर्णवाला ( त्रि० ) ॥ ११५ ॥

"Aho Shrutgyanam"

स्त्रियां करायिकावेश्या कुमुदस्त्रीषु **पिङ्गला** ।
**पिचुलो** झबुके पुंसि निचुले वारिवायसे ॥ ११६ ॥
**पिच्छिला** शाल्मलौ सिन्धुभेदेशिंशपयोः स्त्रियाम् ।
स्त्रियामुपोदिकायां च **पिच्छिलो** विजिले त्रिषु ॥ ११७ ॥
**पिञ्जलं** कुशपत्रे स्यात्पीतेऽपि त्रिषु **पिञ्जलम्** ।
**पित्तलं** तैजसद्रव्ये पित्तयुक्ते तु वाच्यवत् ॥ ११८ ॥
**पिप्पला** जलपिप्पल्यां बोधिवृक्षे तु **पिप्पलः** ।
निरंशुले पक्षिभेदे **पिप्पलः** **पिप्पलं** जले ॥ ११९ ॥
वसनच्छेदभेदेऽपि कणायां तु च **पिप्पली** ।
**पुद्गलः** सुन्दराकारे देहे चात्मनि **पुद्गलः** ॥ १२० ॥
**पेशलो** रुचिरे दक्षे चारुशीलेऽपि वाच्यवत् ।
**प्रस्खलो** वाजिसन्नाहे त्रिषु ह्यन्तश्चले चले ॥ १२१ ॥

---

**पिंगला**–पक्षिणीभेद, वेश्याभेद, कुमुदिनी ( स्त्री० )
**पिचुल**–झाऊ–वृक्ष, जलवेतका भेद, जलकाग ( पुं० ) ॥ ११६ ॥
**पिच्छिला**–साल–वृक्ष, नदीभेद, सीसम–वृक्ष, शकुन–चिड़ी (स्त्री०)
**पिच्छिल**–मंडयुक्त दधिआदि (त्रि०) ॥ ११७ )
**पिंजल**–कुशाका पत्र ( न० ) पीला रंगवाला ( त्रि० )
**पित्तल**–पीतल–धातु, ( न० ) पित्तयुक्त ( त्रि० ) ॥ ११८ ॥
**पिप्पला**–जलपीपल ( स्त्री० )
**पिप्पल**–पीपल–वृक्ष ( पुं० )
**पिप्पल**–कांतिहीन, पक्षिभेद, (पुं०)
**पिप्पल**–जल ( न० ) ॥ ११९ ॥
वस्त्र फटनेका भेद, ( पुं० )
**पिप्पली**–पीपल–औषधि ( स्त्री० )
**पुद्गल**–सुंदर आकारवाला शरीर, आत्मा, ( पुं० ) ॥ १२० ॥
**पेशल**–सुंदर, चतुर, अच्छे स्वभाववाला ( त्रि० )
**प्रस्खल**–अश्वका कवच, ( पुं० ) अंतःकरणसे चलित, ॥ १२१ ॥

"Aho Shrutgyanam"

**प्रतलः** स्यात्संहतयोर्वामदक्षिणहस्तयोः ।
पाताललोके **प्रतल**स्तताङ्गुलिकरेऽपि च ॥ १२२ ॥
वीणादण्डे **प्रवालो**ऽस्त्री विद्रुमे नवपल्लवे ।
**फेनिलो**ऽरिष्टवृक्षे स्यात्**फेनिलं** बदरीफले ॥ १२३ ॥
मदनद्रुफले चैव सफेने **फेनिल**स्त्रिषु ।
**बन्धल**स्त्वामले पुञ्जे पल्वले मत्तकुञ्जरे ॥ १२४ ॥
**बहुलं** व्योम्नि **बहुला** त्वेलानीलिकयोर्भुवि ।
**बहुलाः** कृत्तिकासु स्युः कृष्णपक्षेऽनले पुमान् ॥ १२५ ॥
**बहुल**स्तु मतः प्राज्ये कृष्णवर्णेऽपि वाच्यवत् ।
**बार्दलो** दुर्दिने पुंसि मसीधानेऽपि **बार्दलः** ॥ १२६ ॥
**मङ्गला** श्वेतदूर्वायां **मङ्गल**स्तु महीसुते ।
**मङ्गलं** श्रेयसि क्लीबं तथा लब्धार्थरक्षणे ॥ १२७ ॥

---

**प्रतल**—बायें दायें दोनों हाथ मिले हुए, पाताललोक, फैलीहुई अंगुलियोंवाला हाथ ( पुं० ) ॥१२२॥
**प्रवाल**—बीणाका दंड, मूँगा, नवीन पल्लव ( पुं० )
**फेनिल**—रीठाका वृक्ष, ( पुं० )
**फेनिल**—बेरीका फल ( बेर )॥१२३॥ मैनफल ( न० )
**फेनिल**—फेनों ( झागों ) वाला ( त्रि० )
**बन्धल**—आँवला, समूह, छोटी तालाई, उन्मत्त हस्ती ( पुं० ) १२४
**बहुल**—आकाश, ( न० )
**बहुला**—इलायची, नीला ( नील ), पृथ्वी ( स्त्री० )
**बहुला**—छहों कृत्तिका ( स्त्री० )
**बहुल**—कृष्णपक्ष, अग्नि ( पुं० ) ॥ १२५ ॥ बहुत, काला रंगवाला (त्रि०)
**बार्दल**—मेघोंसे छायादिन, दवात ( पुं० ) ॥ १२६ ॥
**मंगला**—सफेद दूब, ( स्त्री० )
**मंगल**—मंगल-ग्रह ( पुं० )
**मंगल**—कल्याण, लब्धद्रव्यकी रक्षा ( न० ) ॥ १२७ ॥

"Aho Shrutgyanam"

**मञ्जुलो** जलरङ्कौ स्यान्मञ्जौ तु त्रिषु पेषलः ।
**मलञ्जुं** शैवले कुञ्जे बिम्बेषु त्रिषु **मण्डलम्** ॥ १२८ ॥
**मण्डलं** निकुरुम्बेऽपि देशे द्वादशराजके ।
कुष्ठाहिभेदे परिधौ चक्रवाले च **मण्डलम्** ॥ १२९ ॥
**मण्डलं** स्यान्मण्डलके सारमेये तु मण्डलः ।
**महिला** तु महेलायां **महिला**ऽभीरुगुन्द्रयोः ॥ १३० ॥
**माचलो** वन्दिचौरे स्यादामये ग्राहयादसोः ।
धत्तूरे सामके व्रीहौ मदनद्रौ च **मातुलः** ॥ १३१ ॥
समन्तात्तालमूल्याखुकर्ण्योस्तु **मुसली** स्त्रियाम् ।
**मुसली** गृहगोधायामयोग्रे **मुसलं** मतम् ॥ १३२ ॥
काञ्च्यां शैलनितम्बे च खड्गबन्धे च **मेखला** ।
**मेखला** कटिदेशे च **रसालः** सरसे त्रिषु ॥ १३३ ॥

---

**मंजुल**–जलमृग, (पुं०) सुंदर, (त्रि०)

**चतुर**–सुंदर (त्रि०)

**मंजुल**–सिवाल, कुंज, (न०)

**मंडल**–बिंब (त्रि०) ॥ १२८ ॥

**मंडल**–समूह (न०) बारह राजाओंके मध्यका देश, कुष्ठभेद, सर्पभेद, कभी दीखनेवाला सूर्यका कुंडल, (गोल घेरा) (पुं०) १२९

**मंडल**–गोल मंडल, (न०) कुत्ता (पुं०)

**महिला**–स्त्री, शतावर, फूल प्रियंगू (स्त्री०) ॥ १३० ॥

**माचल**–वन्दिचोर, रोग, ग्राह, जलजंतु (पुं०)

**मातुल**–धतूरा, सामक, व्रीहि, मैनफल–वृक्ष, (पुं०) ॥ १३१ ॥

**मुसली**–तालमूली, मूसाकनी, छपकली, (स्त्री०)

**मुसल**–मूसल (न०) ॥ १३२ ॥

**मेखला**–करधनी, पर्वतका नितंब, खड्गबंध, कटिदेश, (स्त्री०)

**रसाल**–रसवाला, (त्रि०) ॥ १३३ ॥

"Aho Shrutgyanam"

**रसाल** इक्षौ चूते च **रसालं** बेलिसिह्लयोः ।
**रसाला** मार्जितायां स्याज्जिह्वादूर्वाविदारिषु ॥ १३४ ॥

**रामिलो** रमणे कामे **लाङ्गूलं** पुच्छशेफयोः ।
**लाङ्गली** जलपिप्पल्यां **लाङ्गलं** कुसुमान्तरे ॥ १३५ ॥

गृहदारुविशेषे च सीरे ताले च **लाङ्गलम्** ।
**लोहलः** शृङ्खलाधार्ये त्रिषु त्वव्यक्तभाषिणि ॥ १३६ ॥

**वण्टालः** शूरयोर्युद्धे पुंसि नौकाखनित्रके ।
**वातुलो** वातसंघाते वातले मारुताऽसहे ॥ १३७ ॥

**वातलं** राजकूष्माण्डबीजकोलास्थिबीजयोः ।
**वामिलो** दाम्भिकेऽपि स्यात्रिषु वामेऽपि **वामिलः** ॥ १३८ ॥

**बिडालः** पुंसि मार्जारे **बिडालो** विहगान्तरे ।
**विपुलः** पृथुलेऽगाधे मेरुपश्चिमपर्वते ॥ १३९ ॥

---

**रसाल**–ऊस, आम, ( पुं० ) बोल, शिलारस ( न० )
**रसाला**–दही शहद खांड मिरच अदरक आदिसे बनाई हुई चटनी, जीभ, दूब, विदारीकंद ( स्त्री० ) ॥ १३४ ॥
**रामिल**–रमण ( पति ), कामदेव, ( पुं० )
**लांगूल**–पूँछ, लिंग, ( न० )
**लाङ्गली**–जलपीपल, ( स्त्री० )
**लांगल**–पुष्पभेद, ( न० ) ॥१३५॥
गृहकाष्ठविशेष, हल, ताड–वृक्ष, (न०)
**लोहल**–शृंखलाधार्य ( संकलसे रोकनेयोग्य) ( पुं० ) अप्रकट बोलनेवाला ( त्रि० ) ॥ १३६ ॥
**वण्टाल**–शूरवीरोंका जुद्ध, नौका, जमीन खोदनेका औजार ( पुं० )
**वातूल**–वायुका समूह ( पुं० ) वातवाला, वायुको नहीं सहनेवाला ( त्रि० ) ॥ १३७ ॥
**वातल**–कोहलाके बीज, बेरकी गुँठली, ( न० )
**वामिल**–दंभी, सुंदर ( त्रि० )१३८
**बिडाल**–बिलाव, पक्षिभेद ( पुं० )
**विपुल**–बडा, बिनाथाहवाला, सुमेरुका पश्चिमपर्वत ( पुं० )॥१३९॥

"Aho Shrutgyanam"

**विमला** शातलाभूमिभेदयोर्निर्म्मले त्रिषु ।
**विशालो** वृक्षभेदे स्याद्विशाले विपुलेऽन्यवत् ॥ १४० ॥
**विशाला** त्विन्द्रवारुण्यामुज्जयिन्यां च दृश्यते ।
**वृषलः** पुंसि शूद्रे स्याच्चन्द्रगुप्तेऽपि राजनि ॥ १४१ ॥
**शकलं** वल्कले खण्डे रागवस्तुत्वचोरपि ।
क्लीबं पाथेयकुलयोर्म्मत्सरे त्रिषु **शम्बलम्** ॥ १४२ ॥
**शयालुः** शुन्यजगरे निद्राशीले तु वाच्यवत् ।
**शरालं** नीरसोपाने वास्तुपोतेऽपि पञ्जरे ॥ १४३ ॥
ऋजौ वक्रे च शीले च **शार्दूलो** राक्षसान्तरे ।
अष्टापदेऽपि व्याघ्रेऽपि श्रेष्ठे स्यादुत्तरस्थितः ॥ १४४ ॥
**शाल्मलिस्तु** द्वयोर्वृक्षभेदे द्वीपान्तरेऽपि च ।
**शीतलं** शैलजे पुष्पे काशीशे मलयोद्भवे ॥ १४५ ॥

---

**विमला**–शातला ( थूअर ) भेद, पृथ्वीभेद, (स्त्री०) निर्मल, ( त्रि० )

**विशाल**–वृक्षभेद, ( पुं० ) बडा, वहुत, ( त्रि० ) ॥ १४० ॥

**विशाला**–इंद्रायण-औषधि, उज्जैन-नगरी ( स्त्री० )

**वृषल**–शूद्र, चंद्रगुप्त राजा ( पुं० ) ॥ १४१ ॥

**शकल**–वृक्षका वल्कल, टुकड़ा, रँगनेकी वस्तु, चर्म ( न० )

**शम्बल**–मार्गकी खरची, कुल, (न०) मत्सरी–पुरुषआदि ( त्रि० ) ॥ १४२ ॥

**शयालु**–कुत्ता, अजगर, ( पुं० ) निद्राशील ( त्रि० )

**शराल**–तालावकी पैड़ी, गृहनौका, पींजरा, ( न० ) ॥ १४३ ॥ सरल, वक्र, शील, ( त्रि० )

**शार्दूल**–राक्षसभेद, अष्टापद ( धतूरा या सोना ) बघेरा, और दूसरे शब्दके आगे जुडा होनेसे श्रेष्ठ, ( पुं० ) ॥ १४४ ॥

**शाल्मलि**–वृक्षभेद, द्वीपभेद, ( पुं० स्त्री० )

**शीतल**–पत्थरका फूल या भूरिछरीला, कसीस, मलयाचलमें होनेवाला ( चंदन ) ( न० ) ॥ १४५ ॥



"Aho Shrutgyanam"

शीते चासनपर्ण्यां च **शीतलः** शीतले त्रिषु ।
शेवाले **शीतलं** क्लीबं शैलेयेऽपि च **शीतलम्** ॥ १४६ ॥
**शृगाली** तु शिवाभीत्योः **शृगालः** फेरुदैत्ययोः ।
**शृङ्खला** निगडेऽपि स्यात्पुंस्कटीवस्त्रबन्धने ॥ १४७ ॥
शेवाले पद्मकाष्ठेऽपि **शैवलं** मतमद्वयोः ।
**शौष्कलः** शुष्कमांसस्य पाणिके पिशिताशिनि ॥ १४८ ॥
**श्यामल**स्त्वसितेऽस्वच्छे श्यामवर्णे तु वाच्यवत् ।
**श्रद्धालु**र्दोहदिन्यां स्याद्वाच्यवच्छ्रद्धयान्विते ॥ १४९ ॥
**श्रीफली** नीलिकाधात्र्योर्म्मालूरे **श्रीफली** पुमान् ।
**षण्डाली** तु सरोजिन्यां कामुकीतैलमानयोः ॥ १५० ॥
**सङ्कुलं** वाच्यवद्व्याप्तेऽस्पष्टार्थवचनेऽपि च ।
**सन्धिला** तु सुरङ्गायां नदीमदिरयोरपि ॥ १५१ ॥

---

**शीतल**–ठंढ, रसुनियां घास या कोयल, ( पुं० ) ठंढा, ( त्रि० ) शिलाजीत ( न० ) ॥ १४६ ॥
**शृगाली**–गीदडी, भीति, (भय)(स्त्री०)
**शृगाल**–गीदड, दैत्य, ( पुं० )
**शृंखला**–वेडी, पुरुषकी कटिवस्त्रका बंधन ( स्त्री० ) ॥ १४७ ॥
**शैवल**–सिवाल, पद्माख–औषधि ( न० )
**शौष्कल**–सूखे मांसकी दुकानवाला, मांसभक्षी ( पुं० ) ॥ १४८ ॥
**श्यामल**–नीलवर्ण, मलिनवर्ण ( पुं० ) श्यामवर्णवाला ( त्रि० )
**श्रद्धालु**–दोहद ( इच्छा ) वाली स्त्री, ( स्त्री० ) श्रद्धायुक्त, ( त्रि० ) ॥ १४९ ॥
**श्रीफली**–नीली, ( नीलका पेड ), आँवला, ( स्त्री० )
**श्रीफल**–बेल-वृक्ष, ( पुं० )
**षण्डाली**–कमलिनी, संभोगकी इच्छावाली स्त्री, तैलप्रमाण, ( स्त्री० ) ॥ १५० ॥
**सङ्कुल**–व्याप्त, ( त्रि० ) असस्पष्टअर्थवाला वचन, ( न० )
**संधिला**–सुरंग, नदी, मदिरा, ( स्त्री० ) ॥ १५१ ॥

"Aho Shrutgyanam"

लचतुर्थम् ।

बलाभेदे त्वातिबला प्रबलेऽतिबलस्त्रिषु ॥
**अक्षमाला** विजानीयादरुन्धत्यक्षसूत्रयोः ॥ १५२ ॥
**उदूखलं** गुग्गुलौ स्यादुलूखलमुलूखले ।
**एकाष्ठीला** स्त्रियां पुंसि पापचेल्यां बुके क्रमात् ॥ १५३ ॥
**कचमालो** मरुद्वाहे नागभेदे जटान्तरे ।
**कन्दरालः** पुमान्गर्द्दभाण्डेऽक्षप्लक्षवृक्षयोः ॥ १५४ ॥
अस्त्री **कमण्डलुः** कुण्ड्यां पर्क्कटीपादपे पुमान् ।
क्लीबं **कर्म्मफलं** कर्म्मरङ्गकर्म्मविपाकयोः ॥ १५५ ॥
पुंसि कोलाहले सर्जरसे **कलकलः** स्मृतः ।
**कुतूहलं** कौतुके स्यात्त्रिषु शस्ते **कुतूहलम्** ॥ १५६ ॥
**कृताञ्जलिस्तु** भैषज्ये विहितो येन चाञ्जलिः ।
**खतमालः** पुमान्धूमे **खतमालो** बलाहके ॥ १५७ ॥

---

**लचतुर्थ ।**

**अतिबला**–खरँहटीभेद ( पीलेरंगकी खरँहटी, ) ( स्त्री० )

**अतिबल**–प्रबल-पुरुष आदि ( त्रि० )

**अक्षमाला**–अरुंधती ( वसिष्ठकी स्त्री ), रुद्राक्षकी माला, ( स्त्री० ) ॥ १५२ ॥

**उदू(लू)खल**–गूगल, ऊँखल, ( न० )

**एकाष्ठीला**–सोनापाठा, ( स्त्री० )

**एकाष्ठील**–गूमा-औषधि ( पुं० ) ॥ १५३ ॥

**कचमाल**–······,नागभेद, जटाभेद ( पुं० )

**कन्दराल**–पारसपीपल, अखरोट या बहेडा, पिलखनवृक्ष, ( पुं० ) ॥ १५४ ॥

**कमंडलु**–कूंडी, पिलखन-वृक्ष, (पुं०) ( पुं० न० )

**कर्मफल**–कमरख फल, कर्मोंका फल, ( न० ) ॥ १५५ ॥

**कलकल**–कोलाहल, ( हल्ला ), राल–वृक्ष, ( पुं० )

**कुतूहल**–कौतुक, श्रेष्ठ, ( न० ) ॥ १५६ ॥

**कृतांजलि**–औषधि, जिसने अंजलि करी है वह, ( पुं० )

**खतमाल**–धूवाँ, मेघ, ( पुं० ) १५७

"Aho Shrutgyanam"

**गण्डशैलो** गिरिभ्रष्टस्थूलोपलकपोलयोः ।
स्त्रियां **गन्धफली** फल्यां तथा चम्पककोरके ॥ १५८ ॥

**गोलांगूलं** तु गोपुच्छे **गोलाङ्गूलः** कपौ पुमान् ।
**चक्रबालो** गिरेर्भेदे **चक्रवालं** तु मण्डले ॥ १५९ ॥

**जलाञ्चलं** तु शैवाले स्वतः पानीयनिर्गमे ।
**दलामलं** मरुबके दमनेऽपि **दलामलम्** ॥ १६० ॥

**ध्वनिनाला** तु वीणायां वेणुकाहलयोरपि ।
भवेत्**परिमल**श्चित्तहारिगन्धविमर्दयोः ॥ १६१ ॥

रतामर्दसमुन्मीलदङ्गरागादिसौरभे ।
**पीठकेलिः** पीठमर्द्दे करकाकेक्षिरागयोः ॥ १६२ ॥

दौर्गतौ वारिवाहे च **पीठकेलि**पदाभिधा ।
स्त्रीपुंसयोर्**बहुफला** मलयूनीपयोः क्रमात् ॥ १६३ ॥

---

**गंडशैल**—पर्वतसे गिराहुवा बडा पत्थर, कपोल ( गाल ), ( पुं० )

**गंधफली**—फूलप्रियंगू, चंपाकी कली, ( स्त्री० ) ॥ १५८ ॥

**गोलांगूल**—गौकी पूंछ, (न०) बन्दर, ( पुं० )

**चक्रवाल**—पर्वतभेद, ( पुं० ) मंडल, ( न० ) ॥ १५९ ॥

**जलांचल**—शिवाल, आपसे पानीका झिरना, ( न० )

**दलामल**—मरुवा, दौना, ( न० ) ॥ १६० ॥

**ध्वनिनाला**—बीणा, वेणु ( वंशी ), काहल, ( बडा ) नगारा, (स्त्री०)

**परिमल**—चित्तको हरनेवाला गंध, ( पुं० ) ॥ १६१ ॥

विशेषमर्दन, सुरतके मर्दनमें उत्पन्न हुवा अंगरागका गंध, ( पुं० ) ॥ १६२ ॥

**पीठकेलि**—अतिधृष्ट, ओला, नेत्ररंजन, दुर्गतिवाला, मेघ, (पुं० स्त्री०)

**बहुफला**—कठूमर, ( स्त्री० )

**बहुफल**—कदंब-वृक्ष, (पुं०) ॥१६३॥

"Aho Shrutgyanam"

**बृहन्नलो** गुडाकेशे महापोटगलेऽपि च ।
**भद्रकाली** तु पार्वत्यां गन्धोल्यामोषधीभिदि ॥ १६४ ॥
**भस्मतूलं** हिमे पांशुवर्षणग्रामकूटयोः ।
**मणिमाला** मता योषिद्दशनक्षतहारयोः ॥ १६५ ॥
**मदकलः** स्यान्मत्तेभे मदेनाऽव्यक्तवाचि च ।
**महाकालो** महादेवे किम्पाके प्रमथान्तरे ॥ १६६ ॥
**महानीलो** नागभेदे **महानीलश्च** मार्कवे ।
**महाबलं** सीसके च बलप्रौढे तु वाच्यवत् ॥ १६७ ॥
गोरक्षतण्डुलायां तु स्त्रियामेव **महाबला** ।
**मुक्ताफलं** तु मुक्तायां कर्णपूरे बले फले ॥ १६८ ॥
स्यात्कदल्यां **मृत्युफली** महाकालतरौ पुमान् ।
पुमान्**यवफलो** वेणौ कुटजे मांसिकौषधौ ॥ १६९ ॥

---

**बृहन्नल**–अर्जुन, बडा देवनल या काश, (पुं०)
**भद्रकाली**–पार्वती, छोटाकचूर, औषधिभेद, (स्त्री०) ॥ १६४ ॥
**भस्मतूल**–हिम (ठंढ), गाँवका कुरड़, रजका बरसना,
**मणिमाला**–स्त्रीके दांतोंसे काटनेका चिह्न, हार, (स्त्री०) ॥ १६५ ॥
**मदकल**–*उन्मत्त हस्ती, मदसे अव्यक्तवाणीवाला*, (पुं०)
**महाकाल**–महादेव, महाकाललता, शिवगणभेद, (पुं०) ॥ १६६ ॥
**महानील**–नागभेद, कूकरभंगरा, (पुं०)
**महाबल**–महाबल शीशा, (न०) बहुतबलवान, (त्रि०) ॥ १६७ ॥
**महाबला**–गंगेरन (स्त्री०)
**मुक्ताफल**–मोती, कर्णआभूषण, बल, फल, (न०) ॥ १६८ ॥
***मृत्युफली**–केला, (स्त्री०)*
**कदल**–महाकाल-वृक्ष, (पुं०)
**यवफल**–बांस, इंद्रजव, जटामांसी औषधि, (पुं०) ॥ १६९ ॥

"Aho Shrutgyanam"

**रजस्वलस्तु** महिषे पुष्पवत्यां **रजस्वला** ।
**वातकेलिः** कलालापे षिङ्गानां दन्तखण्डने ॥ १७० ॥
क्लीबं **वायुफलं** शक्रकार्मुके वर्षणोपले ।
पुमान्**विचकिलो** मल्लीभेदे दमनकेऽपि च ॥ १७१ ॥
उदुम्बरे स्कन्धफले नालिकेरे **सदाफलः** ।
**हरिताली** नभोरेखाखड्गदूर्वासु दृश्यते ॥ १७२ ॥
**हलाहलो** ब्रह्मसर्प्पे ज्येष्ठिकायां विषान्तरे ।
ऐरावते **हस्तिमल्लो हस्तिमल्लो** विनायके ॥ १७३ ॥

लपंचमम् ।

**आसुतीबलशब्दस्तु** मतो यज्वनि शौण्डिके ।
भवेदु**द्दण्डपालस्तु** मत्स्यसर्प्पप्रभेदयोः ॥ १७४ ॥
राजराजेऽपि कालिन्दीभेदनेऽप्ये**ककुण्डलः** ।
गजपित्तज्वरे पाके पवने **कूटपाकलः** ॥ १७५ ॥

---

**रजस्वल**—भैंसा, ( पुं० )
**रजस्वला**—ऋतुधर्मवाली स्त्री, (स्त्री०)
**वातकेलि**—सूक्ष्मशब्दसे आलाप, कामीपुरुषके दांतोंसे काटना, (स्त्री०) ॥ १७० ॥
**वायुफल**—इंद्रधनुष, वर्षाका पत्थर ( ओला ), ( न० )
**विचकिल**—मल्लिकाभेद, दौना, (पुं०) ॥ १७१ ॥
**सदाफल**—गूलर,......, नालीर ( पुं० )
**हरिताली**—आकाशरेखा, खड्ग, दूब, ( स्त्री० ) ॥ १७२ ॥
**हलाहल**—ब्रह्मसर्प ( नागभेद ), जेठीमधु, विषभेद ( पुं० )
**हस्तिमल्ल**—ऐरावत हस्ती, गणेश ( पुं० ) ॥ १७३ ॥

**लपंचम** ।

**आसुतीबल**—यज्ञकरनेवाला, मदिरा बेचनेवाला, ( पुं० )
**उद्दंडपाल**—मच्छभेद, सर्पभेद,(पुं०) ॥ १७४ ॥
**एककुंडल**—कुबेर, बलदेव, ( पुं० )
**कूटपाकल**—हस्तीका पित्तज्वर, पाक, पवित्रकरना, ( पुं० ) ॥ १७५ ॥

"Aho Shrutgyanam"

**कूपीटपालः** पुंस्येव केनिपातसमुद्रयोः ॥ १७६ ॥ ॥
स्यात्**पाण्डुकम्बलः** श्वेतकम्बले ग्रावदन्तरे ।
विवाहदिनसम्बन्धशिरोमाल्येऽपि सम्मता ॥ १७७ ॥
मता **सुरतताली** तु दूतिकामस्तकस्रजोः ।
**मन्त्रचूर्णल**मिच्छन्ति वशीकरणवेदिनि ॥ १७८ ॥
डाकिनीमोक्षमन्त्रज्ञे कुशाम्बुप्रोक्षणेऽपि च ॥ १७९ ॥

इति विश्वलोचनेऽपराभिधानायां मुक्तावल्यां लकारान्तवर्गः ॥

---

## अथ वान्तवर्गः ।

वैकम् ।

**वः** कुम्भे वरुणे **व** स्यादिवार्थे सांत्वनेऽव्ययम् ।
**वा** वाततातयोर्ग्रन्थौ **विः** खगाकाशयोः पुमान् ॥ १ ॥
**स्वो** ज्ञातावात्मनि **स्वं** तु त्रिष्वात्मीये धनेऽस्त्रियाम् ।

---

**कूपीटपाल**–पतवार, समुद्र, ( पुं० ) ॥ १७६ ॥

**पांडुकंबल**–सफेद कंबल, पत्थरभेद, ( पुं० )

**सुरतताली**–विवाहदिनकी शिरकी माला, ( स्त्री० ) ॥ १७७ ॥ दूती, मस्तककी माला, ( स्त्री० ) ॥ १७८ ॥

**मंत्रचूर्णल**–वशी करण जाननेवाला, डाकिनी छोडनेका मंत्र जाननेवाला, कुशाके जलसे प्रोक्षण (छींटादेना), ( पुं० ) ॥ १७९ ॥

इस प्रकार विश्वलोचनकी भाषाटीकामें लान्तवर्ग समाप्त हुवा ॥

---

### अथ वान्तवर्गः ।

वैकम् ।

**व**–कुंभ, वरुण, ( पुं० ) व–इव-अव्ययका अर्थ ( सादृश्यार्थ ), सांत्वना ( अव्यय ),
**वा**–वायु, तात (पिता पुत्र आदि), ( पुं० )

**वि**–पक्षी, आकाश ( पुं० ) ॥ १ ॥

**स्व**–जाति, आत्मा ( पुं० ) **स्व**–आत्मीय ( अपना ), ( त्रि० ) धन, ( पुं० न० )

"Aho Shrutgyanam"

वद्वितीयम् ।

**कविः** शुक्रेऽपि वाल्मीके सूरौ काव्यकरे पुमान् ॥ २ ॥
**किण्वं** पापे सुराबीजे **क्लीबः** पण्डेऽप्यविक्रमे ।
**खर्वो** ह्रस्वे न्यगर्थेपि **खर्वः** स्यादभिधेयवत् ॥ ३ ॥
**ग्रीवा** ग्रीवाशिरायां स्याद्**ग्रीवा** स्यात्कन्धराभिधा ।
**छविः** स्यादपि शोभायां द्युतावपि मतश्**छविः** ॥ ४ ॥
ओन्ड्रपुष्पे **जवा** वेगे **जवो** वेगिनि वाच्यवत् ।
**जीवो** वाचस्पतौ वृक्षप्रभेदे प्राणिमात्रयोः ॥ ५ ॥
**जीवा** जीवन्तिकामौर्वीक्षितिशिञ्जितवृत्तिषु ।
मता **जीवा** वचायां च **जीवा जीवं** च जीविते ॥ ६ ॥
**तत्त्वं** स्वरूपे नृत्यस्य प्रभेदे परमात्मनि ।
**दवो दावश्च** पुंस्येव वनेऽपि वनपावके ॥ ७ ॥
**दिवं** स्वर्गेऽन्तरिक्षे च **द्यौर्द्यौर्**दिवि च खे स्त्रियाम् ।
**देवो** राज्ञि सुरे मेघे **देवं** स्यादिन्द्रिये मतम् ॥ ८ ॥

---

**वद्वितीय ।**

**कवि**–शुक्र, वाल्मीक, पंडित, काव्यको रचनेवाला, ( पुं० ) ॥ २ ॥
**किण्व**–पाप, मदिराका बीज, क्लीब (नपुंसक), पराक्रमरहित, (त्रि०)
**खर्व**–छोटा, ( बौना ), नीच, (त्रि०) ॥ ३ ॥
**ग्रीवा**–गरदनकी नाड़ी, गरदन, (स्त्री०)
**छवि**–शोभा, दीप्ति, (स्त्री०) ॥ ४ ॥
**जवा**–गुडहरपुष्प, ( स्त्री० )
**जव**–वेग (शीघ्रता), वेगवाला, (त्रि०)
**जीव**–बृहस्पति, वृक्षभेद, प्राणीमात्र, ( पुं० ) ॥ ५ ॥
**जीव**–जीवन्ती, मेंढासींगी, पृथ्वी, भूषणोंका शब्द, वृत्ति ( जीविका ), बच, ( स्त्री० ) **जीव**–जीवित, ( पुं० न० ) ॥ ६ ॥
**तत्त्व**–स्वरूप, नृत्यभेद, परमात्मा, ( न० )
**दव–दाव**–वन, वनअग्नि, ( पुं० ) ॥ ७ ॥
**दिव**–स्वर्ग, अंतरिक्ष, (पृथ्वी और आकाशका मध्य ), ( न० )
**दिव्**–स्वर्ग, आकाश, ( स्त्री० )
**देव**–राजा, देवता, मेघ, ( पुं० )
**देव**–इंद्रिय, ( न० ) ॥ ८ ॥

"Aho Shrutgyanam"

**देवी** भट्टारिकायां च तेजनीपृक्कयोरपि ।
नाट्योक्त्यां चाभिषिक्तायां **देवी देवी** नृपस्त्रियाम् ॥ ९ ॥
**द्रवः** स्यान्नर्मणि रसे प्रद्रावे विद्रवे गतौ ।
**द्वन्द्वं** तु मिथुने युग्मे **द्वन्द्वः** कलहगुह्ययोः ॥ १० ॥
**धवः** पत्यौ पुमान्वृक्षभेदे धूर्त्ते नरेऽपि च ।
**ध्रुवः** क्लीबे शिवे शङ्कौ मुनौ योगे वटे वसौ ॥ ११ ॥
**ध्रुवं** तु निश्चिते तर्के नित्यनिश्चलयोस्त्रिषु ।
**ध्रुवा** मूर्वाशालिपर्ण्योर्गीतिस्रुग्भेदयोरपि ॥ १२ ॥
**नवः** काके स्तुतौ पुंसि **नवं** नव्येऽभिधेयवत् ।
**नीवी** तु स्त्रीकटीवस्त्रग्रन्थौ मूलधनेऽस्त्रियाम् ॥ १३ ॥
मतं **पक्कं** परिणते विनाशाभिमुखे त्रिषु ।
**पार्श्वं** कक्षाऽधरे चक्रोपान्ते पर्शुगणाऽन्तिके ॥ १४ ॥

---

**देवी**–भट्टारककी स्त्री, बड़ी मालकांगनी, असवरग, ( स्त्री० ) नाट्यमें अभिषेककरी हुई रानी, राजाकी रानी ( स्त्री० ) ॥ ९ ॥

**द्रव**–ठट्ठा, रस, झिरना, विद्रव ( दौड़ना ), ( पुं० )

**द्वंद्व**–स्त्रीपुरुषका जोड़ा, दो संख्या, ( न० ) **द्वंद्व**–कलह गोप्य, (पुं०) ॥ १० ॥

**धव**–पति, वृक्षभेद, धूर्त मनुष्य, ( पुं० )

**ध्रुव**–नपुंसक, शिव, कीला, मुनि, योगभेद, बड़वृक्ष, वसुभेद, (पुं०) ॥ ११ ॥

**ध्रुव**–निश्चित, तर्क, ( न० ) नित्य, निश्चल ( त्रि० )

**ध्रुवा**–चुरनहार या मरोरफली, माषपर्णी या मषवन, गीतिभेद, स्रुक्–भेद, ( स्त्री० ) ॥ १२ ॥

**नव**–काग, स्तुति, ( पुं० ) **नव**-नवीन, ( त्रि० )

**नीवी**–स्त्रीके कटिवस्त्रकी ग्रंथि (बंधन), मूलधन, ( स्त्री० ) ॥ १३ ॥

**पक्क**–परिणामको प्राप्तहुवा, नाशको प्राप्त होनेवाला, ( त्रि० )

**पार्श्व**–बगलके नीचे का भाग, (पसवाड़ा ), चक्र का अंतभाग, पाँसुवोंका समूह, समीप, ( न० ) ॥ १४ ॥

"Aho Shrutgyanam"

**पृथ्वी** भुवि पृथौ हिङ्गुपत्रिकाकृष्णजीरयोः ।
**प्राध्वं** तु बन्धने प्रह्वेऽप्यतिदूरपथे तथा ॥ १५ ॥

**प्लवः** कारण्डवे भेके भेलके वारिवायसे ।
प्लक्षे प्लुतिगतौ शब्दे निषादे कुलके कपौ ॥ १६ ॥

क्रमनिम्नक्षितौ गन्धतृणेऽपि न द्वयोः **प्लवम्** ।
**भवः** श्रीकण्ठसंसारश्रेयःसत्ताप्तिजन्मसु ॥ १७ ॥

**भावः** स्वभावचेष्टाऽभिप्रायसत्त्वात्मजन्मनि ।
**भावः** क्रियायां लीलायां पदार्थेऽभिनयान्तरे ॥ १८ ॥

जन्तौ बुधे विभूतौ च नाट्योक्त्या पण्डितेऽपि च ।
**रेवा** जंबालिनीभेदे **रेवा** नीलीस्मरस्त्रियोः ॥ १९ ॥

मता **लघ्वी** तु ह्रस्वायां प्रकारे स्यन्दनस्य च ।
**लट्वा** करंजभेदे स्यात्फले वाद्ये खगान्तरे ॥ २० ॥

---

**पृथ्वी**—भूमि, महती ( बडी ), हींगत्री या वंशपत्री, स्याहजीरा, ( स्त्री० )

**प्राध्व**--बंधन, प्रह्व ( ...... ), अति दूरमार्ग ( न० ) ॥ १५ ॥

**प्लव**—करड्डवा पक्षी, मेंडक, छोटी नौका, जलकाग, पिलखन वृक्ष, कूदकर चलना, शब्द, निषाद (भील), कुलक ( ...... ), बंदर, ( पुं० ) ॥ १६ )

**प्लव**—क्रमसे नीची पृथ्वी, सुगंधितृण-विशेष ( शखान ), ( न० )

**भव**—महादेव, संसार, कल्याण, सत्ता, प्राप्ति, जन्म, ( पुं० ) ॥ १७ ॥

**भाव**—स्वभाव, चेष्टा, अभिप्राय, सत्त्व, ( सतोगुण ), जन्म, क्रिया, लीला, पदार्थ, अभिनय, ॥ १८ ॥ जन्तु, पंडित, विभूति, नाट्योक्तिमें पंडित, ( पुं० )

**रेवा**—नदीभेद, नीली ( लील ), काम-देवकी स्त्री, ( स्त्री० ) ॥ १९ ॥

**लघ्वी**—छोटी, रथका भेद, ( स्त्री० )

**लट्वा**—करंजुवाभेद, फल, बाजा, पक्षि-भेद, ( स्त्री० ) ॥ २० ॥

"Aho Shrutgyanam"

**लवो** लेशे विलासे च च्छेदने रामनन्दने ।
श्रीफलेऽपि फले **बिल्वं** **विश्वे** देवेषु नागरे ॥ २१ ॥
**विश्वा** विषायां सर्वस्मिन्विश्वं स्यादभिधेयवत् ।
**विश्वं** तु विष्टपे क्लीबं **शिबिर्भूर्जे** नृपान्तरे ॥ २२ ॥
**शिवो** हरे योगभेदे वेदे कीलेऽपि बालुके ।
गुग्गुले पुण्डरीकद्रौ **शिवं** मोक्षे सुखे जले ॥ २३ ॥
कुशलेऽपि **शिवा** तु स्याद्गौर्यामलकहेतुषु ।
**शिवा** झाटामलापथ्याक्रोष्ट्रीसक्तुफलासु च ॥ २४ ॥
**सत्त्वं** जन्तुषु न स्त्री स्यात्सत्त्वं प्राणात्मभावयोः ।
द्रव्ये बले पिशाचादौ सत्तायां गुणवित्तयोः ॥ २५ ॥
स्वभावे व्यवसाये च **सत्त्व**मित्यभिधीयते ।
**सवं** जलाढ्ययोः स्नाने **सवः** सन्धानयज्ञयोः ॥ २६ ॥

---

**लव**–लेश, ( थोड़ा ), विलास, छेदन, रामचंद्रका पुत्र, ( पुं० )
**बिल्व**–बेलका वृक्ष, बेलका फल, ( न० )
**विश्व**–विश्वेदेव, (पुं०) **विश्व**–सोंठ, ( न० ) ॥ २१ ॥
**विश्वा**–अतीस,(स्त्री०) संपूर्ण, (त्रि०)
**विश्व**–जगत्, ( न० )
**शिबि**–भोजपत्र, शिबि–राजा, (पुं०) ॥ २२ ॥
**शिव**–महादेव, ग्रहयोगभेद, वेद, कीला, बालू ( रेती ), गूगल, पुंडरीक-वृक्ष, ( पुं० )
**शिव**–मोक्ष, सुख, जल, ॥ २३ ॥ कुशल, ( न० )
**शिवा**–पार्वती, आँवला, हेतु, (स्त्री०)
**शिवा**–भुईआंवला, हरड़, गीदड़ी, जांट–वृक्ष, ( स्त्री० ) ॥ २४ ॥
**सत्त्व**–जन्तु, प्राण, आत्मभाव, द्रव्य, बल, पिशाचआदि, सत्ता, गुण, धन. ॥ २५ ॥ स्वभाव, निश्चय, ( पु० न० )
**सव**–जल, धनी, स्नान, ( न० )
**सव**–सन्तान, यज्ञ, ( पुं० ) ॥ २६ ॥

"Aho Shrutgyanam"

**सान्त्वं** दाक्षिण्यमात्रेऽपि **सांत्वं** सामनि च स्मृतम् ।
**स्रुवा** स्रुग्भेदशल्लक्योर्मूर्वायां च मता **स्रुवा** ॥ २७ ॥
**हवः** स्यादध्वराह्वाननिदेशेषु मतः पुमान् ।
**ह्रस्वः** खर्वे न्यगर्थेपि राजिकायां क्षुते **क्षवः** ॥ २८ ॥

वतृतीयम् ।

**अभावः** स्यादसत्तायामभावो मरणेऽपि च ।
**अक्षीव**स्त्रिष्वमन्दे स्याद**क्षीवो**ऽवसरे पुमान् ॥ २९ ॥
**आर्त्तवं** पुष्परजसोः समुद्भूते तु वाच्यवत् ।
**आश्रवः** स्यात्प्रतिज्ञायां क्लेशेऽपि वचनस्थिते ॥ ३० ॥
**आहव**स्तु पुमान्यागे सङ्गरेऽप्या**हव**स्तथा ।
**उत्सवो** मह उत्सेध इच्छाप्रसरकोपयोः ॥ ३१ ॥
**उद्धव**स्तूत्सवे कृष्णमातुले यज्ञपावके ।
**कारवी** दीप्यमधुरात्वक्पत्रीकृष्णजीरके ॥ ३२ ॥

---

**सान्त्व**—चतुराई, साम (समझाना), ( न० )

**स्रुवा**—स्रुग्भेद ( यज्ञपात्र ), सेह-प्राणी, चुरनहार-औषधि, (स्त्री०) ॥ २७ ॥

**हव**—यज्ञ, बुलाना, आज्ञा, ( पुं० )

**ह्रस्व**—बौना, नीच, ( पुं० )

**क्षव**—छींक, ( पुं० ) ॥ २८ ॥

**वतृतीय ।**

**अभाव**—असत्ता ( नहींहोना ), मरना, ( पुं० ),

**अक्षीव**—अमंद ( तेज ), ( त्रि० ) अवसर, ( पुं० ) ॥ २९ ॥

**आर्तव**—पुष्प, स्त्रीका रजस्, ( न० ) ऋतुमें उत्पन्नहुवा, ( त्रि० )

**आश्रव**—प्रतिज्ञा, क्लेश, वचनमें स्थित, ( त्रि० ) ॥ ३० ॥

**आहव**—यज्ञ, युद्ध ( पुं० )

**उत्सव**—उत्सव, ऊँचाई, इच्छाका फैलना, क्रोध, ( पुं० ) ॥ ३१ ॥

**उद्धव**—उत्सव, कृष्णका मामा, ( उद्धव ), यज्ञका अग्नि, ( पुं० )

**कारवी**—अजवायन, सौंप, हींगपत्री, कालाजीरा, ( स्त्री० ) ॥ ३२ ॥

"Aho Shrutgyanam"

**कितवः** पुंसि धुस्तूरे मत्तवञ्चकयोरपि ।
पुन्नागे माधवे पुंसि केशाढ्ये त्रिषु **केशवः** ॥ ३३ ॥
**कैतवं** तु छले द्यूते **कैरवः** शत्रुधूर्त्तयोः ।
**कैरवं** कुमुदे क्लीबं चन्द्रिकायां तु **कैरवी** ॥ ३४ ॥
**कौट्टवी** चण्डिकायां स्यात्तथा नग्नस्त्रियामपि ।
**गाण्डीवगाण्डिवौ** न स्त्री कार्मुकेऽर्जुनकार्मुके ॥ ३५ ॥
**गालवस्तु** मुनौ लोध्रे **ताण्डवं** तृणनृत्ययोः ।
स्वर्गेऽन्तरिक्षे **त्रिदिवस्त्रिदिवा** सरिदन्तरे ॥ ३६ ॥
**दीदिविस्त्रिदशाचार्ये** भवेदन्नेऽपि **दीदिविः** ।
**द्विजिह्वः** पन्नगे पुंसि सूचके त्वभिधेयवत् ॥ ३७ ॥
**निष्पावः** शूर्प्पपवने पचने च कडङ्गरे ।
**निष्पावो** निर्विकल्पेऽपि शिम्बिकाराजमाषयोः ॥ ३८ ॥
अपलापेऽपि निकृतावविश्वासेऽपि **निह्नवः** ।
**पञ्चत्वं** स्यात्तु पञ्चानां भावेऽपि निधनेऽपि च ॥ ३९ ॥

---

**कितव**–धतूरा, उन्मत्त, ठग, (पुं०)
**केशव**–पुन्नाग–वृक्ष, विष्णु, ( पुं० ) बहुतकेशोंवाला, (त्रि०) ॥ ३३ ॥
**कैतव**–छल, जूवा, ( न० )
**कैरव**–शत्रु, धूर्त, ( पुं० ) **कैरव**–कमोदनी, ( न० )
**कैरवी**–चांदकी चांदनी, ( स्त्री० ) ॥ ३४ ॥
**कौट्टवी**–चंडिका, नग्न स्त्री, ( स्त्री० )
**गांडीव–गांडिव**–धनुष्, अर्जुनका धनुष्, ( पुं० न० ) ॥ ३५ ॥
**गालव**–मुनि ( गालव ), लोध-वृक्ष, ( पुं० )
**तांडव**–तृण, नृत्य, ( न० )
**त्रिदिव**–स्वर्ग, आकाश, ( पुं० )
**त्रिदिवा**–नदी, ( स्त्री० ) ॥ ३६ ॥
**दीदिवि**–बृहस्पति, अन्न, ( पुं० )
**द्विजिह्व**–सर्प, ( पुं० ) चुगलखोर, ( त्रि० ) ॥ ३७ ॥
**निष्पाव**–छाजका वायु, वायु, भूसा, ( पुं० ) निर्विकल्प, ( त्रि० ) फली, उड़द, ( पुं० ) ॥ ३८ ॥
**निह्नव**–वचनको गोप्यकरना, शठता, अविश्वास, ( पुं० )
**पंचत्व**–पाँचोंका भाव, मृत्यु, (पुं०) ॥ ३९ ॥

"Aho Shrutgyanam"

**पल्लवो** विस्तरे खड्गे श्रृङ्गारेलक्तरागयोः ।
चलेऽप्यस्त्री तु किसले विटपेऽपि च **पल्लवः** ॥ ४० ॥

तुगायां **पार्थिवी** भूपे पुमान्भूविकृतौ त्रिषु ।
**पुङ्गवो** वृषभे श्रेष्ठे गवोभेषजलान्तरे ॥ ४१ ॥

**प्रभवो** जन्महेतौ स्यादपांमूले पराक्रमे ।
**प्रभवः** किंवदन्तीनां सञ्चारगतिकारके ॥ ४२ ॥

आद्योपलब्धये स्थाने **प्रभावः** शक्तितेजसोः ।
**प्रसवो** गर्भमोक्षे स्याद्वृक्षाणां फलपुष्पयोः ॥ ४३ ॥

परंपराप्रसङ्गे च लोकोत्पादे च पुत्रयोः ।
**प्रसेवो** वल्लकीवाद्यकाष्ठे स्यूतेऽपि दृश्यते ॥ ४४ ॥

**फेरवो** राक्षसे फेरौ **बल्लवः** सूदगोपयोः ।
भीमसेनेऽप्यथ पुमान्बन्धौ सुहृदि **बान्धवः** ॥ ४५ ॥

---

**पल्लव**–शब्दविस्तार, खड्ग, शृंगार, महावरका रंग, चल, कोमलपत्ता, वृक्षकी टहनी, ( पुं० ) ॥ ४० ॥

**पार्थिवी**–वंशलोचन, ( स्त्री० )

**पार्थिव**–राजा, (पुं०) पृथ्वी–विकार, ( त्रि० )

**पुंगव**–बैल, श्रेष्ठ, (पु०)...॥ ४१ ॥

**प्रभव**–जन्म ( उत्पत्ति ), का हेतु, जलोंका मूल, पराक्रम, ( बल ) ( पुं० ) किंवदंती ( चुरघा ), का संचार व गति करनेवाला प्रथमदर्श-नके लिये स्थान, ( पुं० ॥ ४२ ॥

**प्रभाव**–प्रभाव (शक्ति), तेज, (पुं०)

**प्रसव**–गर्भका छूटना, वृक्षोंके फल और पुष्प, ॥ ४३ ॥

परंपराका प्रसंग, मनुष्योंसे उत्पाद-न कियाहुवा, पुत्री-पुत्र, ( पुं० )

**प्रसेव**–वीणाके बाजनेके लिये तूंबा या काष्ठ, सीयाहुवा, ( पुं० ) ॥ ४४ ॥

**फेरव**–राक्षस, गीदड़, ( पुं० )

**बल्लव**–रसोईकरनेवाला, गोप, भीम-सेन, ( पुं० )

**बांधव**–बंधु, मित्र, ( पुं० ) ॥ ४५॥

"Aho Shrutgyanam"

**भार्गवः** शुक्रगजयोः परशुरामे सुधन्वनि ।
**भार्गवी** पार्वतीलक्ष्मीसितदूर्वासु सम्मता ॥ ४६ ॥
**भैरवः** पुंसि भर्गे स्याद्भैरवं भीषणे त्रिषु ।
**माधवः** केशवे राधे वसन्तेऽप्यथ **माधवी** ॥ ४७ ॥
मधूत्थशर्करामद्यकुट्टनीष्वतिमुक्तके ।
**राघवस्तु** महामीनप्रभेदे रघुवंशजे ॥ ४८ ॥
**राजीवो** मत्स्यमृगयोस्त्रिषु राजोपजीविनि ।
क्लीबं पद्मे **रौरवस्तु** नरके त्रिषु भैरवे ॥ ४९ ॥
**वडवा**ऽश्वाकुम्भदास्योः स्त्रीविशेषे द्विजस्त्रियाम् ।
**वाडवा** वडवासङ्घे स्त्रीणां च करणान्तरे ॥ ५० ॥
पाताले न स्त्रियामौर्वे विप्रे च नरि **वाडवः** ।
**पद्रवो**ऽपक्रमे बुद्धौ **विभवो** निर्वृतौ धने ॥ ५१ ॥

---

**भार्गव**–शुक्र, हस्ती, परशुराम, श्रेष्ठ, धनुषवाला, ( पुं० )
**भार्गवी**–पार्वती, लक्ष्मी श्वेतदूर्वा, ( स्त्री० ) ॥ ४६ ॥
**भैरव**–महादेव, ( पुं० ) भयंकर, ( त्रि० )
**माधव**–विष्णु, वैशाख–मास, वसन्त-ऋतु, ( पुं० ) ॥ ४७ ॥
**माधवी**–मधु ( शहद ) की शक्कर, मदिरा कुट्टनी स्त्री, कस्तूर मोगरा ( स्त्री० )
**राघव**–बडामच्छभेद, रघु-वंशमें होनेवाला, ( पुं० ) ॥ ४८ ॥
**राजीव**–मच्छ, मृग ( पुं० ) राजासे आजीविकावाला, (त्रि०) **राजीव**-कमल ( न० )
**रौरव**–नरक, (पुं०) भयंकर, (त्रि०) ॥ ४९ ॥
**वडवा**–घोडी, जललानेवाली दासी, स्त्रीभेद, ब्राह्मणकी स्त्री, ( स्त्री० )
**वाडव**–घोडियोंका समूह, स्त्रियोंका करण (हावादि), ( न० ) ॥५०॥ पाताल, ( पुं० न० ) **वाडव**-जलाग्नि ( वाडवानल ), ब्राह्मण, ( पुं० )
**पद्रव**–उलटा जाना, बुद्धि, ( पुं० )
**विभव**–आनंद, धन, (पुं०) ॥ ५१ ॥

"Aho Shrutgyanam"

**विभावः** स्यात्परिचये कामस्योद्दीपनेऽपि च
शत्रूणां भावसंहत्योः **शात्रवं शात्रवो** द्विषि ॥ ५२ ॥
**सुषवी** कारवेल्ले स्याज्जीरके कृष्णजीरके ।
**षाडवस्तु** रसे नागेऽप्याशुव्रीहिप्रसूनयोः ॥ ५३ ॥
नौकायां वासने चाथ **सचिवो** भृत्यमन्त्रिणोः ।
**सम्भवः** स्मृत उत्पत्तौ हेतौ सत्त्वे च मेलके ॥ ५४ ॥
आधारानतिरिक्तत्वे आधेयस्य च **सम्भवः** ।
**सुग्रीवो** वानरपतौ चारुग्रीवे तु वाच्यवत् ॥ ५५ ॥
**सैन्धवो** मणिमन्थेऽश्वे सिन्धुदेशभवे त्रिषु ।

वचतुर्थम् ।

**अनुभावः** प्रभावे स्यान्निश्चये भावसूचके ।
**अपह्नवो**ऽपलापेऽपि पुंसि स्नेहेऽप्यपह्नवः ॥ ५६ ॥

---

**विभाव**—परिचय (पहचान), कामको उद्दीपन करनेवाला रस, (पुं०)

**शात्रव**—शत्रुवोंका भाव और संहति (समूह), (न०)

**शात्रव**—शत्रु, (पुं०) ॥ ५२ ॥

**सुषवी**—करेला, जीरा, कालाजीरा, (स्त्री०)

**षाडव**—रस, सीसा, चावल, पुष्प, ॥ ५३ ॥ नौका, वासना, (त्रि०)

**सचिव**—नौकर, मंत्री, (पुं०)

**सम्भव**—उत्पत्ति, हेतु (कारण), सत्त्व (सत्य), मिलना, ॥ ५४ ॥ आधेयकी आधारसे एकता, (पुं०)

**सुग्रीव**—बंदरोंका पति, (पुं०) सुंदरग्रीवावाला, (त्रि०) ॥ ५५ ॥

**सैंधव**—सेंधानमक, अश्व, (पुं०) सिंधुदेशमें होनेवाला, (त्रि०)

**वचतुर्थ ।**

**अनुभाव**—प्रभाव, निश्चय, भावको सूचन करनेवाला, (पुं)

**अपह्नव**—छिपाहुवा वाक्य, स्नेह, (पुं०) ॥ ५६ ॥

"Aho Shrutgyanam"

स्नानेऽपि मद्यसन्धाने यज्ञे चाभिषवः पुमान् ।
**आदीनव**स्तु दोषे स्यात्परिक्लिष्टदुरन्तयोः ॥ ५७ ॥
उत्पाते विप्लवे चैव सैंहिकेयेऽप्युपप्लवः ।
वल्मीकजन्मनि नटे याचके च **कुशीलवः** ॥ ५८ ॥
एकयोक्त्या मतौ रामपुत्रयोश्च **कुशीलवौ** ।
**जलबिल्वो** मतः कूर्म्मे कर्कटे जलचत्वरे ॥ ५९ ॥
**जीवंजीव**श्चकोरे स्यात्पक्षिभेदे द्रुमान्तरे ।
**दोलाजीवो** वार्द्धुषिके मिथ्याज्ञानप्रहर्षिते ॥ ६० ॥
**धामार्गव**स्त्वपामार्गे देवदाल्यामपि स्मृतः ।
चञ्चले व्याकुलेऽपि स्याद्वाच्यलिङ्गः **परिप्लवः** ॥ ६१ ॥
**पराभव**स्तिरस्कारे विनाशे च **पराभवः** ।
मतः **पारशवः** पारस्त्रैणे शूद्रासुते द्विजात् ॥ ६२ ॥

---

**अभिषव**–स्नान, मदिराका निकालना, यज्ञ ( पुं० )

**आदीनव**–दोष, अति क्लेशित, अपार ( पुं० ) ॥ ५७ ॥

**उपप्लव**–उत्पात, विप्लव ( मनुष्यों की लूटना आदि पीडा ) राहुग्रह ( पुं० )

**कुशीलव**–वाल्मीकि–ऋषि, नट, याचक ( पुं० ) ॥ ५८ ॥

**कुशीलव**–एक बार बोलनेमें रामचंद्रके पुत्र, ( पुं० द्वि० )



**जलबिल्व**–कछुवा, ककोड़ा–जंतु, जलका हौज, ( पुं० ) ॥ ५९ ॥

**जीवंजीव**–चकोर, पक्षिभेद, वृक्षभेद ( पुं० )

**दोलाजीव**–व्याजसे जीनेवाला, झूठे ज्ञानसे हर्षित ( पुं० ) ॥६०॥

**धामार्गव**–ऊँगा, देवदाली, ( पुं० )

**परिप्लव**–चंचल, व्याकुल, ( त्रि० ) ॥ ६१ ॥

**पराभव**–तिरस्कार, विनाश ( पुं० )

**पारशव**–परस्त्रीका पुत्र, ब्राह्मणसे, उत्पन्न हुवा शूद्राका पुत्र, ॥ ६२ ॥

"Aho Shrutgyanam"

शस्त्रेऽप्यथ **पुटग्रीवो** गर्गरीताम्रकुम्भयोः ।
वार्द्धुषिके **बलदेवः** स्याद्बलदेवो बलेऽनिले ॥ ६३ ॥
**रोहिताश्वो** हरिश्चन्द्रतनये जातवेदसि ।
शैलेये सैन्धवे क्लीबं मिश्यां **शीतशिवः** पुमान् ॥ ६४ ॥
**सहदेवा** बलादण्डोत्पलयोः शारिवौषधौ ।
**सहदेवी** भुजङ्गाक्ष्यां **सहदेवस्तु** पाण्डवे ॥ ६५ ॥

वपंचमम् ।

**स्यादाशितंभवस्तृप्तावन्नाद्ये त्वाशितंभवम्** ॥ ६६ ॥

इति विश्वलोचनेऽपराभिधानायां मुक्तावल्यां वकारान्तवर्गः ॥

---

## अथ शान्तवर्गः ।

शैकम् ।

**शः** शतायुषि हिंसायां **शं** धर्म्मे **शा** तु मातरि ।
**शी** स्त्रीषु स्वपरस्त्रीषु **शीः** स्यात्सदननिद्रयोः ॥ १ ॥

---

शस्त्र ( पुं० )

**पुटग्रीव**-गगरी, ताँबाका कलश ( पुं० )

**बलदेव**-व्याजको लेनेवाला, बलभद्र, वायु ( पुं० ) ॥ ६३ ॥

**रोहिताश्व**-हरिश्चंद्रराजाका पुत्र, अग्नि ( पुं० )

**शीतशिव**-शिलाजीत, सेंधानमक, ( न० ) सौंफ ( पुं० ) ॥ ६४ ॥

**सहदेवा**-खरँहटीकी डंडी, कमल, सरिवन, ( स्त्री० )

**सहदेवी**-खरँहटी, गंडनी ( स्त्री० )

**सहदेव**-पंडु राजाका एक पुत्र (पुं०) ॥ ६५ ॥

**वपंचम ।**

**आशितंभव**-तृप्ति ( पुं० )

**आशितंभव**-अन्नादि ( न० ) ६६

इसप्रकार विश्वलोचनकी भाषाटीकामें वान्तवर्ग समाप्तहुआ ॥

---

**अथ शान्तवर्ग ।**

शैक ।

**श**- सौवर्षकी आयुवाला, हिंसा, ( पुं० )

**श**-धर्म ( न० )

**शा**-माता ( स्त्री० )

**शी**-अपना, पराया, स्त्री, ( त्रि० )

**श**-मकान, निद्रा ( न० ) ॥ १ ॥

"Aho Shrutgyanam"

शद्वितीयम् ।

**आशा** तृष्णादिशोराशुर्व्रीहौ क्लीबं तु सत्वरे ।
**ईशा** लाङ्गलदण्डे स्यादीशः स्यादीश्वरे प्रभौ ॥ २ ॥
**अंशु**स्त्विषि रवौ लेशे **काश**स्तु क्षवथौ तृणे ।
वाराणस्यां तु **काशी** स्यात्**कीशो** मर्कटनग्नयोः ॥ ३ ॥
**कुशो** रामसुते द्वीपे योक्त्रे दर्भे तु न स्त्रियाम् ।
**कुशो** मत्तेऽपि पापिष्ठे त्रिषु क्लीबे तु वारिणि ॥ ४ ॥
मता **कुशा** तु बलायां **कुशी** फाले प्रकीर्तिता ।
**केशो** बालेऽपि ह्रीबेरे दैत्यभेदप्रचेतसोः ॥ ५ ॥
**क्लेशो** दुःखेऽपि रोगादौ व्यवसाये च दृश्यते ।
**दर्श**स्तु दशमे पुंसि **दर्शः** सूर्येन्दुसङ्गमे ॥ ६ ॥
पक्षान्तवैदिकविधौ **दशा** तु वसनांशुके ।
**दशा** कर्मविपाकेऽपि स्याद्**दशा** वर्त्त्यवस्थयोः ॥ ७ ॥

---

**शद्वितीयम् ।**

**आशा**–तृष्णा, दिशा ( स्त्री० )
**आशु**–व्रीहि ( धान ) ( पुं० )
**आशु**–शीघ्रता ( न० )
**ईशा**–हलका दंड ( हाल ) ( स्त्री० )
**ईश**–महादेव, प्रभु, ( पुं० ) ॥ २ ॥
**अंशु**–किरण, सूर्य, लेश ( पुं० )
**काश**–छींक, तृण ( काँस ) ( पुं० )
**काशी**–काशी-पुरी ( स्त्री० )
**कीश**–बंदर, नग्न ( नंगा ) ( पुं० ) ॥ ३ ॥
**कुश**–रामका पुत्र, कुश द्वीप, जोत ( पुं० )
**कुश**–दर्भ ( डाभ ) ( पुं०न० )
**कुश**–उन्मत्त–पापी, ( त्रि० )
**कुश**–जल ( न० ) ॥ ४ ॥
**कुशा**–खरँहटी, ( स्त्री० )
**कुशी**–फाल ( हलकी कुश ) (स्त्री०)
**केश**–बाल, नेत्रबाला, दैत्यभेद, वरुण ( पुं० ) ॥ ५ ॥
**क्लेश**–दुःख, रोग आदि, व्यवसाय, ( पुं० )
**दर्श**–दशवाँ पुरुष, सूर्यचंद्रमाका संगम ( अमावस्या ) ॥ ६ ॥ पक्षके अंतकी वैदिकविधि ( पुं० )
**दशा**–कर्मफल, बत्ती, अवस्था,(स्त्री०) ॥ ७ ॥

"Aho Shrutgyanam"

**दृग्** दर्शने च नेत्रे स्त्री ज्ञातृदर्शकयोस्त्रिषु ।
**दंशः** सन्नाहवनमक्षिकयोर्भुजगक्षते ॥ ८ ॥
दोषेऽपि खण्डने **दंशो दंशो** मर्म्मणि च स्मृतः ।
**नाशः** पलायनेऽपि स्यान्निधनानुपलम्भयोः ॥ ९ ॥
स्यान्निशा निगडे क्वापि स्त्रियां रात्रिहरिद्रयोः ।
**निशा** दारुहरिद्रायां **महापूर्वा** निशार्द्धके ॥ १० ॥
**पशुर्मृ**गादौ च प्रमथे **पशुर्मा**सारिकात्मनि ।
अज्ञाने छागमात्रेऽपि **पशु** हव्यर्थमव्ययम् ॥ ११ ॥
**पाशः** पक्षादिबन्धे स्याच्चयार्थस्तु कचात्परः ।
छात्राद्यन्ते च निन्दार्थः कर्णाते शोभनार्थकः ॥ १२ ॥
**पांशुर्धू**लिषु शस्यार्थचिरसञ्चितगोमये ।
**पेशी** पललपिण्ड्यां स्यान्मांसीखड्गपिधानयोः ॥ १३ ॥

---

**दृक्**—दर्शन, नेत्र, ( स्त्री० ) जाननेवाला, देखनेवाला ( त्रि० )

**दंश**—कवच, वनमक्खी, सर्पका डंक ॥ ८ ॥ दोष, खंडन, मर्म, (पुं०)

**नाश**—भागना, मरना, नहीं प्राप्त-होना ( पुं० ) ॥ ९ ॥

**निशा**—बेडी, रात्रि, हलदी, दारु-हलदी, ( स्त्री० )

**महानिशा**—अर्धरात्रि ( स्त्री० ) १०

**पशु**—मृग आदि, शिवगण, मांसारि-का आत्मा, अज्ञानी, छागमात्र, ( पुं० )

**पशु**—देवताकी हविका दान, ( अ० ) ॥ ११ ॥

**पाश**—केशोंका बांधना, केशवाचक शब्दसे परे पाश-शब्द समूह अर्थ-वाला है जैसे 'केशपाश' अर्थात् केशसमूह, छात्रआदिके अंतमें निंदार्थक है जैसे 'छात्रपाश' कर्णके अंतमें सुंदरार्थक है जैसे 'कर्णपाश' ( पुं० ) ॥ १२ ॥

**पांशु**—धूलि, खेतीके लिये बहुतदिन-का इकट्ठाकिया गोबर, ( पुं० )

**पेशी**—मांसकी पिंडी, जटामांसी, तलवारका म्यान, अच्छा पका-हुवा कणिक, मंडभेद, (स्त्री०) १३

"Aho Shrutgyanam"

सुपक्ककणिके **पेशी** **पेशी** मण्डान्तरेऽपि च ।
**राशि**स्तु पुञ्जे पुंस्येव तथा मेषवृषादिषु ॥ १४ ॥

**वश**स्त्रिषु स्याद्विवशे **वशं** वाञ्छाप्रभुत्वयोः ।
**वशा** योषासुतावन्ध्यास्त्रीगवीकरिणीष्वपि ॥ १५ ॥

**विट्** पुंसि वैश्ये मनुजे प्रवेशे तु स्त्रियामियम् ।
**वेशः** प्रवेशे नेपथ्ये **वेशो** वेश्यागृहे गृहे ॥ १६ ॥

**वंशो** वेणौ कुले वर्गे पृष्ठस्यावयवास्थनि ।
नासाविवरदेशेऽपि वाद्यभाण्डान्तरेऽपि च ॥ १७ ॥

**शशः** पशौ गन्धरसे पुरुषान्तरलोध्रयोः ।
मतः **शश** इति क्कापि शीतांशोरपि लाञ्छने ॥ १८ ॥

**स्पर्श**स्तु स्पर्शने दाने रुजायां स्पर्शकेऽपि च ।
**स्पर्शः** स्यात्पुंसि सङ्ग्रामे प्रणिधौ च मतो ह्ययम् ॥ १९ ॥

---

**राशि**–समूह, मेष वृष आदि राशि ( पुं० ) ॥ १४ ॥

**वश**–वशमें होनेवाला, ( त्रि० )

**वश**–वांछा, प्रभुत्व, ( न० )

**वशा**–स्त्री, पुत्री, वन्ध्या, स्त्री, गौ, हथिनी ( स्त्री० ) ॥ १५ ॥

विश्(द) वैश्य, मनुष्य, ( पुं० )

**विश्(ट्)** प्रवेश, ( स्त्री० )

**वेश**–प्रवेश, वेशबनाना, वेश्याका घर, घर, ( पुं० ) ॥ १६ ॥

**वंश**–बाँस, कुल, पीठका अवयवरूप अस्थि ( हाड ), नासिकाका छिद्र-देश, बाजेका पात्र ( वंशी ) (पुं०) ॥ १७ ॥

**शश**–ससा, वणिक्द्रव्यविशेष, मनुष्यभेद, लोध, चंद्रमाका लांछन, ( पुं० ) ॥ १८ ॥

**स्पर्श**–स्पर्श करना, दान, रोग, स्पर्श करनेवाला, संग्राम ( युद्ध ) (पुं०)

**स्पर्श**–गुप्त बातको कहनेवाला हलकारा, ( पुं० ) ॥ १९ ॥

"Aho Shrutgyanam"

शतृतीयम् ।

**आदर्शः** पुंसि मुकुरे टीकायां प्रतिपुस्तके ।
**उड्डीशः** पार्वतीकान्ते ग्रन्थभेदे च स स्मृतः ॥ २० ॥
**उपांशुर्**जापभेदे स्या**दुपांशु** विजनेऽव्ययम् ।
माधव्यां **कपिशा** श्यावे त्रिषु पुंसि च सिह्लके ॥ २१ ॥
कम्पिल्लकासमर्देक्षुकृपाणे पुंसि **कर्कशः** ।
निर्दये परुषे क्रूरे दृढे साहसिके त्रिषु ॥ २२ ॥
**कुलिशो** मत्स्यभेदेऽस्थिसंहारे **कुलिशं** पशौ ।
**गिरीशः** शङ्करे वाचस्पतावद्रिपतावपि ॥ २३ ॥
**तुङ्गीशस्तु** हरे चन्द्रे **दुःस्पर्शः** स्याद्यवासके ।
कण्टकार्यां तु **दुःस्पर्शा** खरस्पर्शे तु वाच्यवत् ॥ २४ ॥
**निदेशः** स्यादुपान्तेऽपि शासने भाषणे पुमान् ।
**निर्वेशो** वेतने भोगे **निर्वेशो** मूर्छनेऽपि च ॥ २५ ॥

---

**शतृतीयम् ।**

**आदर्श**—दर्पण ( शीशा ), टीका, नकलपुस्तक ( पुं० )

**उड्डीश**—महादेव, ग्रंथभेद ( उड्डीशतंत्र ) ( पुं० ) ॥ २० ॥

**उपांशु**—जापभेद, ( पुं० )

**उपांशु**—एकांतस्थान ( अ० )

**कपिशा**—माधवीलता, ( स्त्री० )

**कपिश**—बंदरकेसे रंगवाला, ( त्रि० ) हींग ( पुं० ) ॥ २१ ॥

**कर्कश**—कमेला, कसोंदी या परवल, ऊस, तलवार, ( पुं० ) दयाहीन, कठोर, क्रूर, दृढ, साहसवाला (त्रि०) ॥ २२ ॥

**कुलिश**—मत्स्यभेद, अस्थियों ( हड्डियों ) का समूह, ( पुं० )

**कुलिश**— वज्र ( न० )

**गिरीश**—महादेव, बृहस्पति, पर्वतोंका पति ( पुं० ) ॥ २३ ॥

**तुंगीश**—महादेव, चंद्रमा, ( पुं० )

**दुःस्पर्श**—जवाँसा ( पुं० )

**दुःस्पर्शा**—कटेहली ( स्त्री० ) तीक्ष्ण स्पर्शवाला ( त्रि० ) ॥ २४ ॥

**निदेश**—समीप, शिक्षा, भाषण (पुं०)

**निर्वेश**—नौकरी, भोग, मूर्छा ( पुं० ) ॥ २५ ॥

"Aho Shrutgyanam"

**निवेशः** शिबिरे पुंसि तथोद्वाहविनाशयोः ।
**निस्त्रिंशो** निर्दये खड्गे **नीकाशो** निश्चये समे ॥ २६ ॥
**पलाशः** किंशुके शट्यां **पलाशो** निकषात्मजे ।
क्लीबं **पलाशं** छदने **पलाशो** हरिति त्रिषु ॥ २७ ॥
**पक्षीशो** गरुडे कृष्णे **पिङ्गाशं** जात्यकाञ्चने ।
मत्स्ये पल्लीपतौ पुंसि **पिङ्गाशी** नीलिकौषधौ ॥ २८ ॥
**प्रकाशो**ऽतिप्रसिद्धे च प्रहासे चाऽऽतपे स्फुटे ।
**प्रदेशो** देशभित्त्योः स्यात्तर्जन्यङ्गुष्ठसम्मिते ॥ २९ ॥
**बालिशस्तु** शिशौ बाल्यलिङ्गे मूर्खेऽपि **बालिशः** ।
**भूकेश्य**वल्गुजेऽपि स्याद्**भूकेशः** शैवले वटे ॥ ३० ॥
**लोमशस्तु** पुमान्मेषे वाच्यवल्लोमसंयुते ।
शृगालीमर्कटीमांसीशूकशिम्बिषु **लोमशा** ॥ ३१ ॥

---

**निवेश**–सेनास्थान, विवाह, नाश ( पुं० )
**निस्त्रिंश**–निर्दय, खड्ग ( पुं० )
**नीकाश**–निश्चय, तुल्य ( पुं० ) २६
**पलाश**–ढाक–वृक्ष, कचूर, राक्षस ( पुं० )
**पलाश**–पत्र ( न० )
**पलाश**–हरा रंगवाला ( त्रि० ) २७
**पक्षीश**–गरुड, कृष्ण, ( पुं० )
**पिंगाश**–सुवर्णभेद, ( न० ) मत्स्य, छोटा ग्रामका पति, ( पुं० )
**पिंगाशी**–नीलिका औषधि ( स्त्री० ) ॥ २८ ॥

**प्रकाश**–अतिप्रसिद्ध, ठट्ठा, धूप, प्रकट ( पुं० )
**प्रदेश**–देश, दीवार, तर्जनी और अँगूठेका परिमाण ( पुं० ) ॥२९॥
**बालिश**–बालक, बालभावका चिह्न, मूर्ख ( पुं० )
**भूकेशी**–बावची, ( स्त्री० )
**भूकेश**–सिवाल, वट ( बड़ ) (पुं०) ॥ ३० ॥
**लोमश**–मेंढा ( पुं० ) लोमोंवाला ( त्रि० )
**लोमशा**–गीदड़ी, बंदरी, जटामांसी-औषधि, कौंच ( स्त्री० ) ॥ ३१ ॥

"Aho Shrutgyanam"

**लोमशा** काकजङ्घायां काशीशे शाकिनीभिदि ।
महामेदातिबलयोर्**वीकाश**स्तु **विकाश**वत् ॥ ३२ ॥
प्रकाशे स्याद्विकसने विजनेऽपि मतः पुमान् ।
**विकोशः** पटवर्त्तौ स्याद्विकाशे विकचे त्रिषु ॥ ३३ ॥
**विपाशा** तु नदीभेदे त्रिषु पाशसमुद्गते ।
**विवशो** विह्वलेऽपि स्यादवश्यात्मनि च त्रिषु ॥ ३४ ॥
**सङ्काशः** सन्निधौ तुल्ये **सदृशं** तूचिते समे ।
**सदेशः** सन्निधौ देशे **सदेशो** देशवत्यपि ॥ ३५ ॥
**सुखाशो** राजतिनिशे वरुणे सुमनोरथे ।
आसनेऽपि च **संवेशः संवेशः** शयनेऽपि च ॥ ३६ ॥
**हताशो** वाच्यवत्क्रूरे निर्दये निर्वाञ्छिते ।

शचतुर्थम् ।

**अपदेशः** स्मृतो लक्ष्ये निमित्तव्याजयोरपि ॥ ३७ ॥

---

**लोमशा**—काकजंघा, काशीश, शाकिनीभेद, महामेदा, खरैंहटी-भेद, ( स्त्री० )
**वीकाश—विकाश**—प्रकाश, पुष्प आदिका खिलना, जनरहित स्थान, ( पुं० ) ॥ ३२ ॥
**विकोश**—वस्त्रकी वत्ती, विकाश, खिलना ( त्रि० ) ॥ ३३ ॥
**विपाशा**—नदीभेद, ( स्त्री० ) पाशसे निकलाहुवा ( त्रि० )
**विवश**—विह्वल, नहीं वश करनेयोग्य आत्मावाला ( त्रि० ) ॥ ३४ ॥
**संकाश**—समीप, तुल्य ( पुं० )
**सदृश**—उचित, तुल्य ( त्रि० )
**सदेश**—समीप देश, ( पुं० )
**सदेश**—देशवाला ( त्रि० ) ॥ ३५ ॥
**सुखाश**—बडा तिरिच्छ-वृक्ष, वरुण, अच्छा मनोरथ ( पुं० )
**संवेश**—आसन, शय्या ( पुं० ) ३६
**हताश**—क्रूर, निर्दय, आशारहित ( त्रि० )

**शचतुर्थ ।**

**अपदेश**—लक्ष्य ( निशाना ), निमित्त, व्याज ( बहाना ) ॥ ३७ ॥

"Aho Shrutgyanam"

**अपभ्रंशो** दुष्पतने भाषाभेदापशब्दयोः ।
**आश्रयाशो** बृहद्भानौ त्रिष्वेवाश्रयनाशके ॥ ३८ ॥
**उपदंशः** पुमान्मेढ्रे पीडायां च विदंशने ।
**उपस्पर्शस्तु** संस्पर्शे स्नानाचमनयोरपि ॥ ३९ ॥
**क्रूरदृक्** स्यात्खले वक्रे **खण्डपर्शुः** पिनाकिनि ।
राहौ खण्डामलकयोर्लेपकृत्पर्शुरामयोः ॥ ४० ॥
**जीवितेशो** यमे कान्ते जीवातौ जीवितेश्वरे ।
**नागपाशः** स्मृतः स्त्रीणां करणे वरुणायुधे ॥ ४१ ॥
वसेत्**पञ्चदशी** पौर्णमास्यमावस्ययोर्मता ।
**परिवेशः** परिवृतौ भानोश्चाभ्यर्णमण्डले ॥ ४२ ॥
**पलंकशा** तु मुण्डीर्यां लाक्षायां पुंसि गुग्गुले ।
**पादपाशी** चट्टकायां शृङ्खलाकटुकेऽपि च ॥ ४३ ॥

---

**अपभ्रंश**–पड़ना, भाषाभेद, बुरा शब्द ( पुं० )

**आश्रयाश**–अग्नि, ( पुं० ) आश्रयका नाश करनेवाला ( त्रि० )३८

**उपदंश**–लिंग–रोगभेद, बिच्छू आदिका डंक ( पुं० )

**उपस्पर्श**–स्पर्श करना, स्नान, आचमन ( पुं० ) ॥ ३९ ॥

क्रूरदृक् ( श् ) खल, वक्र (त्रि०)

**खंडपर्शु**–महादेव, राहु, खंडामलक ( खाँड और आँवला ), लेप करनेवाला, पर्शुराम ( पुं० ) ॥ ४० ॥

**जीवितेश**–धर्मराज, पति, जिलानेकी औषध, जीवितका स्वामी ( पुं० )

**नागपाश**–स्त्रियोंका करण (हावादि), वरुणका अस्त्र ( पुं० ) ॥ ४१ ॥

**पंचदशी**–पौर्णमासी, अमावास्या ( स्त्री० )

**परिवेश**–घेरा, सूर्यके चारोंतरफका मंडल (पुं०) ॥ ४२ ॥

**पलंकशा**–गोरखमुंडी, लाख, (स्त्री०)

**पलंक (ष)श**–गूगल ( पुं० )

**पादपाशी**–······, संकलका कड़ा ( स्त्री० ) ॥ ४३ ॥

"Aho Shrutgyanam"

**पुरोडाशो** हविर्भेदे तथा सोमलतारसे ।
पिष्टकस्य चमस्यां च हुतशेषे च सम्मतः ॥ ४४ ॥
वार्ताहरे पुरोगे च सहाये च **प्रतिष्कशः** ।
**भूमिस्पृक्** सम्मतो वैश्ये **भूमिस्पृग्** मनुजेपि च ॥ ४५ ॥

इति विश्वलोचनेऽपराभिधानायां मुक्तावल्यां शान्तवर्गः ॥

## अथ षान्तवर्गः ।

षैकम् ।

**ष**–कारस्तु मतः श्रेष्ठेऽपि स्याद्गर्भविमोचने ।

षद्वितीयम् ।

**उषा** बाणसुतायां स्यात्प्रभातेऽपि विभावरौ ।
**उषस्तु** कामुके पुंसि गुग्गुलादावुषः पुमान् ॥ १ ॥
**ऋषिश्छन्दे** वसिष्ठादौ दीधितौ तु **ऋषिः** स्त्रियाम् ।
**कर्षः** पलचतुर्थांशे **कर्षः** स्यात्कर्षणेऽपि च ॥ २ ॥

---

**पुरोडाश**–हविभेद, सोमलताका रस ( पुं० ) पीठीकी चमसी, हवनसे शेष रहा, ( पुं० ) ॥ ४४ ॥

**प्रतिष्कश**–हलकारा, आगे चलनेवाला, सहायता करनेवाला (पुं०)

**भूमिस्पृ(श्) क्**–वैश्यमात्र (पुं०) ॥ ४५ ॥

इसप्रकार विश्वलोचनकोशकी भाषा टीकामें शान्तवर्ग समाप्त हुवा ॥

**अथ षान्तवर्ग ।**

षैक ।

**ष**–श्रेष्ठ, गर्भका छुड़ाना, ( त्रि० )

**षद्वितीय ।**

**उषा**–बाणासुरकी पुत्री, प्रभात, रात्रि, ( स्त्री० )

**उष**–कामी पुरुष, गूगल आदि (पुं०) ॥ १ ॥

**ऋषि**–छंद, वसिष्ठ आदि, ( पुं० )

**ऋषि**–किरण ( स्त्री० )

**कर्ष**–एक तोला प्रमाण, खेंचना ( पुं० ) ॥ २ ॥

"Aho Shrutgyanam"

**कर्षूः** पुंसि करीषाग्नौ **कर्षूः** कुल्याभिधायिनी ।
**कोषो**ऽस्त्री कुड्मले दिव्ये पेश्यां शब्दादिसङ्ग्रहे ॥ ३ ॥
अर्थौघे जातिकोशे च पात्रखड्गपिधानयोः ।
पनसादिफलस्यापि **कोषः** स्यान्मध्यवर्त्तिनि ॥ ४ ॥
**घोषा** तु शतपुष्पायां **घोषः** कांस्येम्बुदध्वनौ ।
**घोषः** स्याद्घोषकाभीरनिस्वनाभीरपल्लिषु ॥ ५ ॥
**झषा** नागबलायां स्याज्झ**षो** वैसारिणि स्मृतः ।
पिपासालिक्षयो**स्तर्षस्तुषो** धान्यत्वगक्षयोः ॥ ६ ॥
**तृट् तृषा** च पिपासायां लिप्सायां च स्त्रियामुभे ।
**त्विट्** कान्तौ रुचि भारत्यां व्यवसायजिगीषयोः ॥ ७ ॥
**दोष**स्तु दूषणे पापे **दोषा** रात्रौ भुजेऽपि च ।
**पौषो** मासविशेषे स्यात्**पौष**मुद्धवयुद्धयोः ॥ ८ ॥

---

**कर्षू**–करिश ( अरना ) की अग्नि,
**कर्षू**–अस्थि ( स्त्री० )
**कोष**(**श**)–फूलकली, दिव्य, थेली, शब्द आदिका संग्रह (पुं०) ॥ ३ ॥ द्रव्यका समूह, जातिकोष ( एक-जातिका संग्रह ), पात्र, खड्गका कोश ( म्यान ), चमेलीका कोश, पनस आदिके फलका मध्यवर्ती भाग ( पुं० ) ॥ ४ ॥
**घोषा**–सौंफ ( स्त्री० )
**घोष**–काँसी–धातु, मेघकी ध्वनि ( शब्द ),घोषक ( गोपाल ) अहीरजाति, शब्द, अहीरोंका ग्राम, ( पुं० ) ॥ ५ ॥
**झषा**–गँगेरन–औषधि, ( स्त्री० )
**झष**–मत्स्य आदि ( पुं० )
**तर्ष**–प्यास, बांछा ( स्त्री० )
**तुष**–धान्यका तुष, बहेड़ा–औषधि ( पुं० ) ॥ ६ ॥
**तृट्**(**ष्**)–**तृषा**–प्यास, बांछा, (स्त्री०)
**त्विट्**(**ष्**)–कान्ति, प्रभा, सरस्वती, उद्यम ( वीर्यातिशय ), जीतनेकी इच्छा ( स्त्री० ) ॥ ७ ॥
**दोष**–दूषण, पाप, ( पुं० )
**दोषा**–रात्रि, भुजा ( बाहु ), (स्त्री०)
**पौष**–पौष–मास, ( पुं० )
**पौष**–उत्सव, युद्ध, ( न० )॥ ८ ॥

"Aho Shrutgyanam"

**पौषी** तु पौषपौर्णम्यां पुष्ययुक्ता भवेद्यदि ।
**प्रैषस्तु** प्रेषणोन्मानमर्द्दनक्लेशवाचकः ॥ ९ ॥

**भाषा** गिरि सरस्वत्यां विकल्पार्थे विपूर्वके ।
**माषो** व्रीह्यन्तरे माने मूर्खे त्वग्दूषणान्तरे ॥ १० ॥

**मिषस्तु** स्पर्द्धने व्याजे निमेषे तु निपूर्वकः ।
**मेषः** स्यादुरणे राशिभेदभैषज्यभेदयोः ॥ ११ ॥

**मेष** उत्पूर्वको वेधे **वर्षाः** स्युः प्रावृषि स्त्रियाम् ।
**वर्षमस्त्री** वर्षणेऽब्दे जम्बूद्वीपे घने पुमान् ॥ १२ ॥

**विषा** त्वतिविषायां स्याद्विषं तु गरले जले ।
**विड्** व्यापने पुरीषे च **वृषो** मूषकधर्म्मयोः ॥ १३ ॥

वृषभे वासके श्रेष्ठे राशौ श्रृङ्ग्यां च शुक्रले ।
शुक्रे पुरुषभेदेऽपि व्रतिनामासने **वृषी** ॥ १४ ॥

---

**पौषी**—जो पुष्यनक्षत्रयुक्त होवे वह पौषमासकी पूर्णिमा, ( स्त्री० )

**प्रैष**—भेजना, उन्मान, मर्दन, क्लेश ( पुं० ) ॥ ९ ॥

**भाषा**—वाणी, सरस्वती, ( स्त्री० )

**विभाषा**—विकल्प ( स्त्री० )

**माष**—व्रीहि (उड़द), तोल (मासाभर), मूर्ख, त्वचा-दोषभेद (पुं०) ॥१०॥

**मिष**—स्पर्द्धा ( ईर्षा ), बहाना, ( पुं )

**निमिष**—निमेष ( कालभेद ) ( पुं )

**मेष**—मेंढा, मेष—राशि, औषधिभेद ( पुं० ) ॥ ११ ॥

**उन्मेष**—बींधना, ( पुं० )

**वर्षा**—वर्षाऋतु ( स्त्री० ब० )

**वर्ष**—वर्षा, वर्ष ( पुं० न० ) जंबूद्वीप, मेघ ( पुं० ) ॥ १२ ॥

**विषा**—अतीस—औषधि ( स्त्री० )

**विष**—गरल ( जहर ), जल ( न० )

**विट्(ष्)**—प्रविष्ट होना, विष्ठा, (स्त्री०)

**वृष**—मूसा, धर्म, ॥ १३ ॥

बैल, बाँसा, श्रेष्ठ, वृष—राशि, काकडासींगी, वीर्यको बढानेवाला द्रव्य, वीर्य, पुरुषभेद ( पुं० )

**वृषी**—व्रतियोंका आसन, (स्त्री०) १४

"Aho Shrutgyanam"

**वृषा** मूषकपर्ण्यां स्यात्कपिकच्छ्वामपि स्मृता ।
**शुषिः** शोषे बिले स्त्र्यातः **शेषः** सङ्कर्षणे वधे ॥ १५ ॥
अनन्तेऽप्यवशिष्टेऽपि **शेषा** निर्म्माल्यभिद्यपि ।

षतृतीयम् ।

**अभीषुः** पुंसि भासि स्यादभीषुः प्रग्रहेऽपि च ॥ १६ ॥
**आकर्षस्त्वि**न्द्रिये स्त्र्यातो द्यूताकर्षणयोरपि ।
पाशके शारिफलके कोदण्डाभ्यासवस्तुनि ॥ १७ ॥
क्लीबमामिषमुत्कोचे मांसे सम्भोगलोभयोः ।
**आमिषं** सुंदराकाररूपादौ विषयेऽपि च ॥ १८ ॥
**उष्णीषं** तु शिरोवेष्टे किरीटे लक्षणान्तरे ।
**कल्माषो** राक्षसे कृष्णकृष्णपाण्डरयोरपि ॥ १९ ॥
**कलुषं** किल्बिषे क्लीबमाविले **कलुषं** त्रिषु ।
**किल्बिषं** वृजिने रोगेऽप्यपराधेऽपि **किल्बिषम्** ॥ २० ॥

---

**वृषा**–मूसाकन्नी, कौंच ( स्त्री० )
**शुषि**–शोष, बिल ( पुं० )
**शेष**–बलदेव, वध ॥ १५ ॥ अनंत (शेषनाग), अवशिष्ट (बाकीरहा) ( पुं० )
**शेषा**–निर्माल्यभेद, ( स्त्री० )

**षतृतीय ।**

**अभीषु**–किरण, अश्व आदिकी रस्सी ( पुं० ) ॥ १६ ॥
**आकर्ष**–इंद्रिय, जूवा, आकर्षण, पासा, चौपट, धनुषके समीपकी वस्तु, ( पुं० ) ॥ १७ ॥
**आमिष**–खिलना, मांस, संभोग, लोभ, सुंदर–आकाररूपआदि, विषय ( न० ) ॥ १८ ॥
**उष्णीष**–शिरपर बाँधनेका वस्त्र, मुकुट, लक्षणभेद ( न० )
**कल्माष**–राक्षस, काला रंग, काला और धौला रंग ( पुं० ) ॥ १९ ॥
**कलुष**–पाप ( न० ) मलिन ( त्रि० ) दुःख रोग, ( न० )
**किल्बिष**–पाप, रोग, अपराध, ( न० ) ॥ २० ॥

"Aho Shrutgyanam"

**कुल्माषो** यवके पुंसि चणके यवषष्टके ।
**कुल्माषं** काञ्जिके क्लीबं **गण्डूषः** प्रसृतोन्मिते ॥ २१ ॥

**गण्डूषो** मुखपूरेऽपि करिहस्ताङ्गुलावपि ।
**जिगीषा** जेतुमिच्छायां व्यवसायप्रकर्षयोः ॥ २२ ॥

**तरीषः** शोभनाकारे भेलेऽब्धिव्यवसाययोः ।
**ताविषस्तु** सरिन्नाथे कनकस्वर्गयोरपि ॥ २३ ॥

**नहुषो** राजभेदे स्यान्नहुषो भुजगान्तरे ।
**निकषः** कषपाषाणे **निकषा** यातुमातरि ॥ २४ ॥

**निमेषनिमिषौ** कालभेदे नेत्रनिमीलने ।
**परुषं** कर्बुरे रूक्षे त्रिषु निष्ठुरवाच्यपि ॥ २५ ॥

**पुरुषः** पुन्नागमातङ्गे माधवे परमात्मनि ।
**पौरुषं** तेजसि क्लीबं पुंसो भावेऽपि कर्म्मणि ॥ २६ ॥

---

**कुल्माष**—जव, चना, आधा सीजा हुवा धान्य ( पुं० )

**कुल्माष**—काँजी ( न० )

**गण्डूष**—एक अंजलि प्रमाण, ॥ २१ ॥ मुखका जल आदिसे पूरना, हाथीकी सूँड और अंगुली ( पुं० )

**जिगीषा**—जीतनेकी इच्छा, वीर्यातिशय, उद्यपन ( स्त्री० ) ॥ २२ ॥

**तरीष**—सुंदर आकार, छोटी नौका, समुद्र, वीर्यातिशय ( पुं० )

**ताविष**—समुद्र, सुवर्ण, स्वर्ग ( पुं० ) ॥ २३ ॥

**नहुष**—राजा नहुष, सर्पभेद ( पुं० )

**निकष**—कसौटीपत्थर ( पुं० )

**निकषा**—राक्षसोंकी माता (स्त्री) २४

**निमेष निमिष**—कालभेद, नेत्रोंका मीचना ( पुं० )

**परुष**—कबरा रंग, रूखा, ( न० ) कठोर बोलनेवाला (त्रि०) ॥ २५ ॥

**पुरुष**—पुंनाग—वृक्ष, हस्ती, विष्णु, परमात्मा ( पुं० )

**पौरुष**—तेज, पुरुषका भाव और कर्म ( न० ) ॥ २६ ॥

"Aho Shrutgyanam"

ऊर्द्ध्वविस्तृतदोःपाणिनृमाने त्रिषु **पौरुषम्** ।
**प्रत्यूषो**ऽहर्मुखे पुंसि **प्रत्यूषो** वसुदैवते ॥ २७ ॥
**प्रदोषः** पुंसि दोषे स्यान्नाट्योक्त्यार्यै च **मारिषः** ।
**रौहिषं** कतृणे पुंसि मृगभेदे तु **रौहिषः** ॥ २८ ॥
**विशेषो** भेदमात्रेऽपि **विशेष**स्तिलकेऽपि च ।
**विश्लेषः** स्याद्विघटने **विश्लेषो** विधुरे तथा ॥ २९ ॥
**व्याकर्षः** शारिफलके द्यूताक्षाकर्षणेषु च ।
**शुश्रूषा** श्रोतुमिच्छायां परिचर्याकथानयोः ॥ ३० ॥
कुशीलवेषे **शैलूषः शैलूषो** बिल्वपादपे ।
**सङ्घर्षः** स्पर्द्धने घर्षे प्रमोदेऽपि प्रभञ्जने ॥ ३१ ॥

षचतुर्थम् ।

**अनुकर्षो** रथस्याधोदारुण्यप्यनुकर्षणे ।
**अनुतर्षः** सुरापानपात्रे तृष्णाभिलाषयोः ॥ ३२ ॥

---

**पौरुष**–लंबी दोनों भुजाओंसे प्रमाण ( न० )

**प्रत्यूष**–दिनका मुख ( प्रातःकाल ), वसुदेवतावाला ( पुं० ) ॥ २७ ॥

**प्रदोष**–दोष ( पुं० )

**मारिष**–नाट्यकी उक्तिमें आर्य (पुं०)

**रौहिष**–रोहिष तृण, ( न० )

**रौहिष**–मृगभेद ( पुं० ) ॥ २८ ॥

**विशेष**–भेदमात्र, तिलक ( पुं० )

**विश्लेष**–वियोग, अत्यंत वियोग ( पुं० ) ॥ २९ ॥

**व्याकर्ष**–चौपड़, जूवा, पाशा, आकर्षण ( पुं० )

**शुश्रूषा**–सुननेकी इच्छा, परिचर्या ( टहल ), कथन ( पुं० ) ॥३०॥

**शैलूष**–नट, बिल्वका वृक्ष ( पुं० )

**संघर्ष**–ईर्षा, घिसना, आनंद, वायु ( पुं० ) ॥ ३१ ॥

**षचतुर्थ ।**

**अनुकर्ष**–रथके नीचेके भागका काष्ठ, अनुकर्षण ( पुं० )

**अनुतर्ष**–मदिरापीनेका पात्र, तृषा, अभिलाषा ( पुं० ) ॥ ३२ ॥

"Aho Shrutgyanam"

सुरे मत्स्येऽप्यनिमिषः सुरे मत्स्येऽनिमेषवत् ।
अम्बरीषो रणे भ्राष्ट्रेऽम्बरीषो भूभृदन्तरे ॥ ३३ ॥
मार्त्तण्डे खण्डपरशौ कपीतनकिशोरयोः ।
अलम्बुषः पुमानेव मतश्छर्दनपादपे ॥ ३४ ॥
अलम्बुषा तु मुण्डीरीस्वर्गवेश्याप्रभेदयोः ।
तुरङ्गवदने लोकभेदे किंपुरुषः पुमान् ॥ ३५ ॥
नन्दिघोषः पार्थरथे स्तुतिपाठकघोषणे ।
परिघोषस्त्ववाच्ये स्यान्निनादे वारिदध्वनौ ॥ ३६ ॥
पलङ्कषा गोक्षुरके लाक्षागुग्गुलकिंशुके ।
मुण्डीरीराखयोश्चैव राक्षसे तु पलङ्कषः ॥ ३७ ॥
शृङ्गीभेदे महाघोषा पुंसि हट्टेऽतिघोषयोः ।
वातरूषस्तु वातूलेऽप्युत्कोचे शक्रकार्मुके ॥ ३८ ॥

इति विश्वलोचनेऽपराभिधानायां मुक्तावल्यां षान्तवर्गः ॥

---

**अनिमिष–अनिमेष**–मच्छ, देवता ( पुं० )

**अम्बरीष**–रण, भाड, एक राजा ३३ सूर्य, महादेव, अंबाडा–वृक्ष, किशोर ( जवान ) ( पुं० )

**अलंबुष**–छर्दन ( वमन ) करनेका वृक्ष ( पुं० ) ॥ ३४ ॥

**अलंबुषा**– गोरखमुंडी, स्वर्गवेश्याभेद, ( स्त्री० )

**किंपुरुष**–देवयोनिभेद ( किन्नर ), लोकभेद ( पुं० ) ॥ ३५ ॥

**नंदिघोष**–अर्जुनका रथ, स्तुतिकरनेवालाका शब्द ( पुं० )

**परिघोष**–नहींकहनेयोग्य शब्द, शब्दमात्र, मेघका गर्जना ( पुं० ) ३६

**पलंकषा**–गोखरू, लाख, गूगल, केसू, गोरखमुंडी, रायसन ( स्त्री० )

**पलंकष**–राक्षस ( पुं० ) ॥ ३७ ॥

**महाघोषा**–काकडासींगी, ( स्त्री० )

**महाघोष**–हाट, अतिशब्द ( पुं० )

**वातरूष**–वायुको नहीं सहनेवाला, रिश्वत, इंद्रका धनुष ( पुं० ) ३८

इसप्रकार विश्वलोचनकी भाषाटीकामें षान्तवर्ग समाप्त हुवा ॥

"Aho Shrutgyanam"

# अथ सान्तवर्गः ।

सैकम् ।

**सा** पुंस्यन्धौ रमायां स्याद्रत्यां **से** श्रीश्रुतेऽपि **सः** ।
**सो**ऽरच्युते तु पार्वत्यामंसस्कन्धविभूषयोः ॥ १ ॥

सद्वितीयम् ।

**कासू**र्विकलवाचि स्यात्**कासूः** शक्त्यायुधे स्त्रियाम् ।
**कंसो** दैत्यान्तरे कांस्ये कांस्यभाजनमानयोः ॥ २ ॥
स्याद्गुत्सः स्तबके स्तम्बे हारभिद्ग्रन्थिपर्णयोः ।
**गोसः** प्रभाते पुंस्येव **गोसो** गन्धरसेऽपि च ॥ ३ ॥
**चासः** सुवर्णचूडे स्यात्प्रभेद इक्षुपर्वणः ।
मणिदोषे भये **त्रासो** दासो भृत्येऽपि धीवरे ॥ ४ ॥
शूद्रेऽपि दानपात्रेऽपि चेटीसिंनकयोः स्त्रियाम् ।
**नासा** तु नासिकायां स्यान्नासा **द्वारोर्द्ध्वदारुणि** ॥ ५ ॥

---

**अथ सान्तवर्ग ।**

सैक ।

**स**–कुँवा (पुं०) लक्ष्मी, रति (स्त्री०) श्रीश्रुत (......) (पुं०)

**सो**–विष्णु (पुं०) पार्वती (स्त्री०) कंधा, कंधोंके भूषण (पुं०) ॥१॥

**सद्वितीय ।**

**कासू**–विकलवाणी, शक्ति आयुध (स्त्री०)

**कंस**–कंस–दैत्य, कांसी–धातु, काँसीका पात्र, प्रमाण (पुं०) ॥२॥

**गुत्स**–गुच्छा, तृणआदिका समूह, हारभेद, ग्रंथिपर्णी (गठिवन) (पुं०)

**गोस**–प्रभात, बोल, (पुं०) ॥ ३ ॥

**चास**–पक्षिभेद, ऊखभेद, (पुं०)

**त्रास**–मणिदोष, भय (पुं०)

**दास**–भृत्य, धीवर (झीमर) ॥ ४ ॥ शूद्र, दानपात्र, (पुं०)

**दासी**–टहलनी (स्त्री०)

**नासा**–नासिका (नाक), द्वारके ऊपरका काष्ठ (स्त्री०) ॥ ५ ॥



"Aho Shrutgyanam"

**प्रसू**र्मातरि कन्दल्यामश्वायां पुंसि वीरुधि ।
**वसु**र्ना देवभेदे च योक्त्रे वह्नौ युधे त्रिषु ॥
**वसु** वृद्ध्यौषधे रत्नेऽपि श्यामे हट्टके धने ॥ ६ ॥
वाच्यवन्मधुरेऽपि **स्याद्भाः** प्रभावे रुचि स्त्रियाम् ।
**भास**स्तु भासि गृध्रे च गोष्ठकुक्कुटकेऽपि च ॥ ७ ॥
**मांसं** स्यादामिषे **मांसी** कक्कोलीजटयोः स्त्रियाम् ।
**माः** सुधीदीधितौ मासे चन्द्रे चन्द्रात्परोऽपि सः ॥ ८ ॥
**मिसिः** स्त्री मधुरीमांस्योः शतपुष्पाजमोदयोः ।
**प्रस**स्तु मुहिमूहे स्यान्**मूसो** मास्यामपि स्मृतः ॥ ९ ॥
**रसः** स्वादेऽपि तिक्तादौ शृङ्गारादौ द्रवे विषे ।
पारदे धातुवीर्याम्बुरागे गन्धरसे तनौ ॥ १० ॥
**रसो** घृतादावाहारपरिणामोद्भवेऽपि च ।
**रसा** जिह्वास्रुवापाठाशल्लकीकङ्गुषु स्त्रियाम् ॥ ११ ॥

---

**प्रसू**–माता, केला या कमलगट्टा, अश्वा ( घोड़ी ) ( स्त्री० )

**प्रसू**–बेल ( पुं० )

**वसु**–देवभेद, जोता, अग्नि, युद्ध ( त्रि० )

**वसु**–वृद्धि औषधि, रत्न, श्यामरंग, हाट, धन ( न० ) ॥ ६ ॥

**वसु**–मधुर ( त्रि० )

**भास्**–प्रभाव, प्रभा ( स्त्री० )

**भास**–प्रभा, गृध्रपक्षी, गौवोंके ठानका मुर्गा ( पुं० ) ॥ ७ ॥

**मांस**–मांस ( न० )

**मांसी**–कंकोल, जटामांसी ( स्त्री० )

**मास्**–पंडित, किरण, मास, चंद्रमा, चंद्रमासे परेका लोक ( पुं० )॥८॥

**मिसि**–सोआ, जटामांसी, सौंफ, अजमोद ( स्त्री० )

**प्रस**–......( पुं० )

**मूस**–जटामांसी ( पुं० ) ॥ ९ ॥

**रस**–स्वाद, तिक्त आदि रस, शृंगार आदि रस, द्रव, विष, पारा, धातु, वीर्य, जल, राग (अनुराग), बोल, शरीर ॥ १० ॥ घृत-आदि, भोजनका परिपाकद्रव, ( पुं० )

**रसा**–जिह्वा, स्रुवा, सोना-पाठा, साल–वृक्ष, मालकांगनी ( स्त्री० ) ॥ ११ ॥

"Aho Shrutgyanam"

**रासस्तु** गोपक्रीडायां भाषाश्रृङ्खलके ध्वनौ ।
पुत्रादौ तर्णके वर्षे **वत्सो वत्सं** तु वक्षसि ॥ १२ ॥
**वासो** गृहेऽप्यवस्थाने **वासा** स्यादाटरूषके ।
मुनिविस्तारयो**र्व्यासः शंसा** वचनवाञ्छयोः ॥ १३ ॥
**हिंसा** चौर्यादिवधयोः **हंसः** सूर्यमरालयोः ।
कृष्णेऽङ्गवाते निर्लोभनृपतौ परमात्मनि ॥ १४ ॥
योगिमन्त्रादिभेदे च मत्सरे तुरगान्तरे ।

सतृतीयम् ।

**अलसा** हंसपद्यां स्या**दागः** पापापराधयोः ॥ १५ ॥
**आशीः** स्त्री सर्प्पदंष्ट्रायां तथा स्त्री शुभशंसने ।
आख्यायिकापरिच्छेदेऽ**प्याश्वासो** निर्वृतावपि ॥ १६ ॥
**इष्वासः** स्याद्धनुर्म्मात्रे स्या**दिष्वासो** धनुर्धरे ।
**उच्छ्वासः** शासनाश्वासगद्यबन्धगुणान्तरे ॥ १७ ॥

---

**रास**–गोपक्रीडा, भाषाकी शृंखला, ध्वनि, ( पुं० )
**वत्स**–पुत्रआदि, बछड़ा, वर्ष ( पुं० )
**वत्स**–छाती ( न० ) ॥ १२ ॥
**वास**–घर, स्थिति ( पुं० )
**वासा**–अडूसा ( स्त्री० )
**व्यास**–मुनि, विस्तार, ( पुं० )
**शंसा**–वचन, वांछा ( स्त्री० )॥१३॥
**हिंसा**–चोरीआदि, प्राणीका मारना ( स्त्री० )
**हंस**–सूर्य, हंस-पक्षी, श्रीकृष्ण, शरीरका वायु, लोभरहित राजा, परमात्मा, ॥ १४ ॥ योगिभेद, मंत्र आदि भेद, मत्सरी, अश्वभेद (पुं०)

**सतृतीय ।**

**अलसा**–लालरंगका लजालू, (स्त्री०)
**आगस्**–पाप, अपराध ( न० ) १५
**आशिस्**–सर्पकी डाढ, शुभका कथन ( स्त्री० )
**आश्वास**–वार्ताका विश्राम, आनंद ( पुं० ) ॥ १६ ॥
**इष्वास**–धनुष,धनुष धारण करनेवाला ( पुं० )
**उच्छ्वास**–शिक्षा, आश्वासना, गद्यबन्धका विश्राम ( पुं० ) ॥ १७ ॥

"Aho Shrutgyanam"

**उत्तंसश्चावतंसश्च वतंसश्चेत्यमी** त्रयः ।
अस्त्रियामेव वर्त्तन्ते कर्णपूरेऽपि शेखरे ॥ १८ ॥
**उरस्तु** वक्षोवरयोरु**षः** सन्ध्याप्रभातयोः ।
**एनो**ऽपराधे कलुषेऽ**प्योक**स्त्वाश्रयसद्मनोः ॥ १९ ॥
**ओजो** दीप्तौ च सामर्थ्येऽप्यवष्टम्भप्रकाशयोः ।
**ओज**स्तेजसि धातूनामिति पञ्चसु दृश्यते ॥ २० ॥
**कीकसः** क्रिमिजातौ स्यात्**कीकसं** क्लीबमस्थनि ।
**चमसः** पिष्टभेदे स्यात्पर्प्पटे चूर्णसंबले ॥ २१ ॥
**छन्दः** श्रुतीच्छयोः पद्ये स्वाच्छन्द्ये ना तु वर्त्तते ।
**ज्यायां**स्त्रिष्विति वृद्धे स्यादपि श्रेष्ठातिशस्तयोः ॥ २२ ॥
गुणे कोपेऽप्यभिमतं **तरः** स्याद्बलवेगयोः ।
**तामसी** चण्डिकायां स्या**त्तामसः** खलसर्प्पयोः ॥ २३ ॥
**तेजः** पराक्रमे दीप्तौ प्रभावे बलशुक्रयोः ।
**धनुः** शरासने राशौ **धनुर्द्ध**न्विपियालयोः ॥ २४ ॥

---

**उत्तंस, अवतंस, वतंस**–मुकुट आदि, कर्णभूषण ( पुं०न० ) १८
**उरस्**-छाती, श्रेष्ठ, ( न० )
**उषस्**–संध्या, प्रभात ( न० )
**एनस्**–अपराध, पाप ( न० )
**ओकस्**–आश्रय, स्थान ( न० ) १९
**ओजस्**–दीप्ति, सामर्थ्य, रोकनेवाला, प्रकाश, धातुओंका तेज, (न०)२०
**कीकस**–क्रिमिजाति, ( पुं० )
**कीकस**–अस्थि ( हड्डी ) ( न० )
**चमस**–पिष्टभेद, पापड़, चूर्णलिपटाहुवा ( पुं० ) ॥ २१ ॥
**छन्दस्**–वेद, इच्छा, पद्य, स्वच्छंदता ( पुं० )
**ज्यायस्**–अतिवृद्ध, श्रेष्ठ, अतिप्रशंसनीय ( त्रि० ) ॥ २२ ॥
**तरस्**–गुण, कोप, बल, वेग ( न० )
**तामसी**–चंडिका, ( स्त्री० )
**तामस**–खल ( खोटा ), सर्प ( पुं० ) ॥ २३ ॥
**तेजस्**–पराक्रम, दीप्ति, प्रभाव, बल, वीर्य, ( न० )
**धनुस्**–धनुष, धन–राशि, (पुं०न०)
**धनुस्**–चिरोंजी, ( पुं० ) ॥ २४ ॥

"Aho Shrutgyanam"

**धनु**र्धनुर्धरेऽपि स्याद्धनुरर्जुनभूरुहे ।
**नभो** व्योम्नि **नभो** मेघे बिससूत्रे पतद्ग्रहे ॥ २५ ॥

वर्षासु श्रावणे घ्राणे **नभाः** पलितमस्तके ।
**पनसः** कण्टकिफले कण्टके कपिरुग्भिदोः ॥ २६ ॥

दुग्धे नीरे वटादीनां क्षीरेऽपि क्षीरवत्**पयः** ।
श्रीवासे **पायसः** पुंसि परमान्ने तु **पायसम्** ॥ २७ ॥

**पुष्कसी** कालिकानील्योः **पुष्कसः** श्वपचेऽधमे ।
**प्रहासः** स्यान्नटवटौ हास्यतीर्थविशेषयोः ॥ २८ ॥

पुनरर्थेऽव्ययं **भूयो भूयांस्**तु बहुषु त्रिषु ।
**मन**श्चित्ते मनीषायां **मह**स्तूत्सवतेजसोः ॥ २९ ॥

**मानसं** स्वान्तसरसो **रजः** स्यादार्त्तवे गुणे ।
**रजः** परागे रेणौ तु **रजवद्दृश्यते रजः** ॥ ३० ॥

---

